CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्म.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमं. ३२८६

श्री ५ को सरकार
वाल्मीकि संस्कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क· फा -८

श्रीः

अग्नि ... मन्त्रार्थदीपिका

मन्त्रार्थदीपिका

टीका

सल्यान अचानेग्राम
निवासिना
पं. वेदनाथशर्मणा
लामिछाने इत्युपाख्येन
विरचिता

संपादक
सूर्यभक्त जोशीत्यनेन
मुद्रिता
ठहिटी भगवती

३२७८

...सहितम्

प्रथम बार ...

१२
१३
१४
१५
१६
१७
१८
१९
बृहज्जातक सटीकम् २०
मुहूर्त्तमार्तण्डः सटीकः २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

294.5446
SMA

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क· फा – ८

श्रीः

अग्निस्थापनमन्त्रार्थदीपिका

टीकाग्रन्थविरचनविचारकरणे संगृहीता ग्रन्था:

यजुर्वेदमाध्यन्दिनशाखा उवट महीधरभाष्यसहिता १
ऋग्वेदशाकलशाखा सायनभाष्यसहिता २
पाणिनिव्याकरणसिद्धान्तकौमुदी तत्त्वबोधिनीसहिता ३
महाभाष्यं कैयटप्रदीप नागेशोद्योतसहितम् ४
पारस्करगृह्यसूत्रं कर्क जयराम हरिहर गदाधर
भाष्यसहितम् ५
आह्निकचन्द्रिका सायनभाष्यसहिता ६
दशोपनिषदः सटीकाः ७
आह्निकसूत्रावली ८
श्रीमद्भागवतं सटीकम् ९
श्री महाभारतं सटीकम् १०
हरिवंशं सटीकम् ११
श्री मद्भगवद्गीतासटीका १२
विष्णुसहस्रनाम शंकराचार्यटीकासहितम् १३
सप्तशती गुप्तवती शान्तनवी सर्वस्वटीकासहिता १४
याज्ञवल्क्यस्मृतिः सटीका १५
कात्यायनस्मृतिः १६
अत्रिस्मृतिः १७
अमरकोशं रामाश्रमटीकासहितम् १८
शान्तिमयूखः १९
बृहज्जातकं सटीकम् २०
मुहूर्त्तमार्तण्डः सटीकः २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भृगुसूत्रम् २२

शीघ्रबोधः २३

ज्योतिः सारः २४

स्वरोदयग्रन्थः २५

रामकृष्णविलोमकाव्यं सटीकम् २६

दशावतारगीतं सटीकम् २७

गायत्रीभाष्यम् २८

॥ शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

अथ
अग्निस्थापनमन्त्रार्थदीपिकाटीका
विषयानुक्रमणिका

	पृष्ठ
अक्षन्नमीमदन्तइति अक्षताप्रक्षेपमन्त्रार्थः	१५६
अग्नआयाहीतिचूडाकरणमन्त्रार्थः	५६
अग्नयेगायत्रायेतितिलकाभिमन्त्रणमन्त्रार्थः	३७८
अग्नावग्निरित्यग्निशोधनमन्त्रार्थः	४७
अग्निंदूतमिति आग्नेयदिग्भागपूजनमन्त्रार्थः	३४
अग्निंदूतमिति	२४७
अग्निंदूतमिति	२५३
अग्निदेवतावर्णनम्	३३१
अग्निरस्मीति अर्कमन्त्रार्थः	२७०
अग्निर्देवतेतिद्वादशदेवमन्त्रार्थः	२७७
अग्निरेकाक्षरेणेत्युपनयनमन्त्रार्थः	५८
अग्निमूर्धेत्यग्निस्थापनमन्त्रार्थः	६३
अग्निर्मूर्धा इतिसौममन्त्रार्थः	२७८
अग्नश्चेतियज्ञभूमिदक्षिणदिग्भागपूजनमन्त्रार्थः	३१
अग्निस्थापनप्रस्तावः	१
अग्निंप्रेहीतियजमानासनदानमन्त्रार्थः	७०
अग्नेर्गर्भाधानादिकर्मसुभरतादिनाम्नांव्याख्यातम्	११६
अग्नेर्जनित्रमसीतिमन्थनशकलनिधानमन्त्रार्थः	४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भृगुसूत्रम्	२२
शीघ्रबोधः	२३
ज्योतिः सारः	२४
स्वरोदयग्रन्थः	२५
रामकृष्णविलोमकाव्यं सटीकम्	२६
दशावतारगीतं सटीकम्	२७
गायत्रीभाष्यम्	२८

शुभम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

अथ
अग्निस्थापनमन्त्रार्थदीपिकाटीका
विषयानुक्रमणिका

	पृष्ठ
अक्षन्नमीमदन्तइति अक्षताप्रक्षेपमन्त्रार्थः	१५६
अग्नआयाहीतिचूडाकरणमन्त्रार्थः	५६
अग्नयेगायत्रायेति तिलकाभिमन्त्रणमन्त्रार्थः	३७८
अग्नावग्निरित्यग्निशोधनमन्त्रार्थः	४७
अग्निंदूतमिति आग्नेयदिग्भागपूजनमन्त्रार्थः	३४
अग्निंदूतमिति	२४७
अग्निंदूतमिति	२५३
अग्निदेवतावर्णनम्	३३१
अग्निरस्मीति अर्कमन्त्रार्थः	२७०
अग्निर्देवतेतिद्वादशदेवमन्त्रार्थः	२७७
अग्निरेकाक्षरेणेत्युपनयनमन्त्रार्थः	५८
अग्निर्मूर्धेत्यग्निस्थापनमन्त्रार्थः	६३
अग्निर्मूर्धा इतिभौममन्त्रार्थः	२७८
अग्न नश्चेतियज्ञभूमिदक्षिणदिग्भागपूजनमन्त्रार्थः	३१
अग्निस्थापनप्रस्तावः	१
अग्निप्रेहीतियजमानासनदानमन्त्रार्थः	७०
अग्नेर्गर्भाधानादिकर्मसुभरतादिनाम्नां व्याख्यातम्	११९
अग्नेर्जनित्रमसीति मन्थनशकलनिधानमन्त्रार्थः	४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
अग्नेरःद्वाहनमन्त्रार्थः	११२
अग्नेःपत्नीतिरितिशिमन्त्रार्थः	२१३
अङ्कौन्यङ्कौ इतिरथमध्याभिमर्शनमन्त्रार्थः	४१०।४१८
अजीजनोहीतिसीमन्तोन्नयनमन्त्रार्थः	१५
अत्रदारुस्थापनप्रकारः	४२
अत्रपारस्करगृह्यसूत्राणि	१०७
अत्रस्रुवलक्षणम् चरुलक्षणञ्च	८६
अत्रारणिमन्थनविधिः	४२
अत्रेन्धनलक्षणम्	४०
अथस्वस्तिवाचनमन्त्राः	१३
अथमधुपर्कविधिः	१२६
अदित्यैरास्नासीति इन्द्राणीमन्त्रार्थः	२५६
अनड्वान्वयःस्त्यनडुन्मन्त्रार्थः	२८२
अन्नपतेऽन्नस्येति अन्नप्राशनमन्त्रार्थः	५५
अन्नपतेऽन्नस्येति चरुस्थालीविधानमन्त्रार्थः	८३
अन्नपतेऽन्नस्येतिअन्नपूर्णामन्त्रार्थः	२६४
अन्नात्परिस्रुतइतिशुक्रमन्त्रार्थः	२२४
अनिशितोऽसीतिस्रुवसंमार्जनमन्त्रार्थः	६२
अप्स्वग्नइतिअग्नेर्मन्त्रार्थः	२४७
अभिषेकमन्त्रार्थः	३८७
अस्यादधामीतिमन्त्रार्थः	३७५
अम्बेअम्बिकेइत्याद्यवप्रक्षेपमन्त्रार्थः	१६३
अम्बेअम्बिके इतिदुर्गामन्त्रार्थः	२११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
का. का. ८.

	पृष्ठ
अम्बेअम्बिके इतिचण्डीमन्त्रार्थः	२६७
अम्बेअम्बिके इतिविन्ध्यवासिनीमन्त्रार्थः	३४०
अयंवामितिदुर्बलरथेजपकरणमन्त्रार्थः	४१०।४११
अश्माश्मइतिमृत्तिकास्थापनमन्त्रार्थः	३
अश्वत्थेवइतिपञ्चपल्लवप्रक्षेपमन्त्रार्थः	६०
असुन्वन्तमितिनिऋतिमन्त्रार्थः	२५४
अङ्होमुचमितिमन्त्रार्थः	१६
आकूतिमग्निमितिमन्त्रार्थः	३७
आकृष्णेनेतिसूर्यमन्त्रार्थः	२०१
आकृष्णेनेति	२१४
आकृष्णेनेतिब्राह्मणपूजनमन्त्रार्थः	३ ६
आजिघ्रकलशमितिकलशस्थापनमन्त्रार्थः	१५१
आत्वाहार्षमितिद्रव्यनिरीक्षणमन्त्रार्थः	६८
आदित्यंगर्भमितिवारमन्त्रार्थः	३१७
आपवस्वेति आज्यहविषामावेक्षणमन्त्रार्थः	६७
आपस्थयुष्माभिरित्यर्घप्रतिग्रहणमन्त्रार्थः	१२६
आप्यायस्वेतिब्रह्मणेचरुसमर्पणमन्त्रार्थः	१०६
आब्रह्मन्नितिब्रह्मस्थापनमन्त्रार्थः	६७
आब्रह्मन्नितिब्रह्मार्चनमन्त्रार्थः	१०२
आब्रह्मन्निति	२३६
आब्रह्मन्निति	३६६
आमागन्यशसेतिजलाचमनमन्त्रार्थः	१३०
आयुरसीति आज्यदर्शनमन्त्रार्थः	४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
आयुष्यमितिमन्त्रार्थः	४०१
आलिखन्निति मन्त्रार्थः	४०६
आशुःशिशानइत्यादिनांद्वादशमन्त्राणामर्थाः	२०
इदंविष्णुरितिविष्णुपुजनमन्त्रार्थः	१०३
इदंविष्णुरिति	२४८
इदंविष्णुरिति	२६८
इदंमेब्रह्मेतिमन्त्रार्थः	३७२
इन्द्रआसामितीन्द्रमन्त्रार्थः	२४८
इन्द्रस्यत्वेतिहयारोहणमन्त्रार्थः	४०७।४११
इन्द्रस्यत्वेतिहस्त्यारोहणमन्त्रार्थः	४०७।४११
इन्धनास्त्वेतिचित्रगुप्तमन्त्रार्थः	२४४
इमन्देवा इतिसोममन्त्रार्थः	३१५
इमंमेवरुण इतिप्रोक्षणीपात्रस्थापनमन्त्रार्थः	८०
इरावतीतिधेनुपूजनमन्त्रार्थः	३६४
इष्टोयज्ञइतीष्टदेवमन्त्रार्थः	३२४
इहरतिरितिरथेरमणमन्त्रार्थः	४१०।४१६
ईशावास्यमितीशानदीगभाग.पूजनमन्त्रार्थः	३७
उग्रश्च भीमश्चेतिभीमसेनपूजनमन्त्रार्थः	३४३
उत्तिष्ठब्रह्मणस्पते इतिब्रह्मविसर्जनमन्त्रार्थः	३८५
उद्रुतमसीत्युदकपुरितप्रणीतापात्रनिधानमन्त्रार्थः	७३
उद्रुत्तमसितिमन्त्रार्थः	१९७
उद्बुध्यस्वेतिबुधमन्त्रार्थः	२२०
उपयामगृहीतोऽसीति उपयमनकुशकरणमन्त्रार्थः	८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्र

उर्वशीति अधरारणिनिधान मन्त्रार्थ ४५
उर्ध्वाग्रस्येति आकाशमन्त्रार्थः २१३
ऋतावानमित्यादित्रयमन्त्रार्थः ६१
ऋतावानमित्यादिऋक्त्रयमितिवैश्वानरमन्त्रार्थः ३४५
एजतुदशमास्य इति जातकर्ममन्त्रार्थः ५२
एधोऽसीसिशेषचरुहोममन्त्रार्थः ३७५
एषवस्तोम इतिदर्भग्रहणमन्त्रार्थः ४
एषवामिति रथकुटिलगमने जपकरणमन्त्रार्थः ४५०।४१६
एषोहदेव इति सर्वदेवमन्त्रार्थः ३४१
घ्योदनविषयेऽपि रथमेव ४०६।४१६
ओषधय इतियवप्रक्षेपणमन्त्रार्थः १५५
कयान इतिनैऋत्यदिग्भागपूजनमन्त्रार्थः ३५
कयान इतिराहुमन्त्रार्थः २३०
कलशस्थापनविधिः १४८
कस्त्वासत्य इतीन्धनशोधनमन्त्रार्थः ४०
काण्डाकाण्डादितिदूर्वाप्रक्षेपमन्त्रार्थः १५६
काण्डाकाण्डादिति ३८३।२४३
कार्षिरसीतिकालमन्त्रार्थः ११६
कालीकरालीत्यत्रपदव्याख्यानम् ११६
कुलायनीतिकुलदेवतामन्त्रार्थः ३२६
केतुकृण्वन्निति केतुमन्त्रार्थः २३३
कृष्णदेवतावर्णनम् ३३१
कोऽदादितिकामस्तुतिमन्त्रार्थः ३६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
कोऽसीतिमन्त्रार्थः	३६७
क्षत्रस्ययोनिरितिक्षत्रपाल्मन्त्रार्थः	३०४
गणेशपूजा	१७०
गणानांत्वेतिगणेशपूजनमन्त्रार्थः	१५१।१७०
गणानांत्वेति	२००
गणानांत्वेति	२११
गणानांत्वेति	२६८
गन्धद्वारामिति चन्दनप्रक्षेपमन्त्रार्थः	१५५
गर्भोऽअसीति गर्भाधानमन्त्रार्थः	४६
गायत्रेणत्वात्रैष्टुभेनत्वाजागतेनत्वेतिमन्थनकरणमन्त्रार्थः	४५
गावउपेतिगोदानमन्त्रार्थः	६०
गुरुदेवतावर्णनम्	३३४
गौरीर्मिमायेतिगौर्यादिषोडशमातृमन्त्रार्थः	२६
घृतवतीति आज्यस्थालीविधानमन्त्रार्थः	६२
घृताच्यसीत्याज्यस्थाल्यांचरुस्थल्यां चाज्यचरुनिधानमन्त्रार्थः	८८
चण्डिकादेवीवर्णनम्	३३५
चतुःस्वस्त्यादयः	९७४
चत्वारीति मन्त्रार्थः	१२३
चन्द्रमामनस इतिदीपमन्त्रार्थः	१८३
जिव्हामे इतिमन्त्रार्थः	३६१
तच्चक्षुरितिमन्त्रार्थः	३६७
तत्रतत्रदेवतावर्णनेसंग्रामाहात्म्यवर्णनम्	३२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ

तत्वायामीति ब्रह्मणो मुखमवलोकयप्रणीतासनेद्रणीता-पात्रनिधानमन्त्रार्थः	७४
तत्वामामीतिपात्रासादनमन्त्रार्थः	७६
तत्वायामीति पुनःस्रुवप्रतपनमन्त्रार्थः	६४
तत्वयामीति कलशेवरुणावाहनमन्त्रार्थः	१६५
तत्वायामीति	१५५
तदेवाग्निरित्यग्निपूजनमन्त्रार्थः	१०५
तमीशानमितीशानमन्त्रार्थः	२५६
तमुत्वेति स्रुवनिधानमन्त्रार्थः	६४
तांतेवात्रमितिवशीकरणमन्त्रार्थः	४०६।४१७
तेजोऽसीति अग्नावाज्यप्रतापनमन्त्रार्थः	६५
त्वंनो अग्ने इतिमन्त्रार्थः	१६३
त्वंयविष्ट्य इतिमन्त्रार्थः	४०१
त्रातारमिन्द्रमितीन्द्रमन्त्रार्थः	२५२
त्रातारमिन्द्रमिति	३०५
त्वामिद्धीत्युल्लेखनमन्त्रार्थः	७
त्वामिद्धीतिदारुकस्थापनमन्त्रार्थः	४२
त्र्यम्बकमितिपवित्रछेदतार्थंतरुणकुशत्रयादानमन्त्रार्थः	७७
त्र्यायुषमितितिलककरणमन्त्रार्थः	४०३
दीपपूजा	१६८
दीर्घायुस्त इतिमन्त्रार्थः	४००
देवस्यत्वेतिप्रोक्षणीपात्रेद्विपवित्रनिधानमन्त्रार्थः	८१
देवस्यत्वेतिप्रोक्षणीपात्रस्थपवित्राभ्यांप्रणीतोदकेनासा-	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
वितवस्तुसेचनमन्त्रार्थः	१००
देवस्यत्वेतिमधुपर्कग्रहणमन्त्रार्थः	१३१
देवस्यत्वेतिमन्त्रार्थः	३८८
देवागातुविद इतिवर्हिर्होमभन्त्रार्थः	३६२
देवीर्द्वार इतिदेवीमन्त्रार्थः	२०८
देवीर्द्वाइ इति	२६७
देवीद्वाइ इति	३४०
द्यौरासीदितिद्यौरालीमन्त्रार्थः	२६८
द्यौःशान्तिरितिमन्त्रार्थः	२८०।३६६
द्यौस्त्वेंतिप्रतिग्रहणेप्रतिग्रहदोषनिवारणमन्त्रार्थः	४०८।४१५
धान्यमसीतिधान्यस्थापनमन्त्रार्थः	१४६
धूरसीति धूरमन्त्रार्थः	१८२
धृष्टिरसीतिप्रदक्षिणेनाज्यचर्वोःस मन्ताद्धेःमयित्वाऽग्नौ ज्वलदुल्मुकप्रक्षेपमन्त्रार्थः	१०१
नक्षत्रेभ्यःस्वाहेतिनक्षत्रमन्त्रार्थः	३२५
नतन्द्रक्षांसीतिमन्त्रार्थः	४०१
नदीभ्यःपोञ्जिष्ठामितिनदीमन्त्रार्थः	३२३
नमःशंभवायेतिगङ्गदेवमन्त्रार्थः	३०३
नमःशंभवायेति	३४०
नमःश्यावास्यायेतिमधुपर्कालोडनमन्त्रार्थः	१३२
नमोमाणिचरायेति अश्वप्रेरणमन्त्रार्थः	४१०।४१६
नमोरुद्रायगिरिषदे इतिगिर्याभिमन्त्रणमन्त्रार्थः	४०७।४१२
नमोरुद्रायचतुष्पथाभिमन्त्रणमन्त्रार्थ	४०७।४१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
नमोरुद्राय पितृषदे इति श्मशानाभिमन्त्रणमन्त्रार्थः	४०८
नमोरुद्राय वनसदे इति वनाभिमन्त्रणमन्त्रार्थः	४०७
नमोरुद्राय शकृत्पिण्डसदे इति गोष्ठाभिमन्त्रणमन्त्रार्थः	४०८
नमोरुद्रायाप्सुसदे इति नद्यभिमन्त्रणमन्त्रार्थः	४०७
नमोऽस्तुसर्पेभ्य इति सर्पमन्त्रार्थः	२५०
नाभिर्मे इति मन्त्रार्थः	३१३
नाभ्या आसीदिति नैवेद्यार्पणमन्त्रार्थः	१८४
पतिदैवतावर्णनम्	३३२
पतिव्रताभार्यावर्णनम्	३३३
पयः पृथिव्यामिति पयः पञ्चमन्त्रार्थः	२७६
परमेश्वरदेवतावर्णनम्	३३६
परब्रह्मदेवतावर्णनम्	३३८
परिशिष्टविधिः	४०७
परीत्यभूतानीतिप्रणीतासनप्रोक्षणयासननिधानमन्त्रार्थः	७१
पवित्रेस्थ इति पवित्रकरणमन्त्रार्थः	७८
पशुभिः पशूनिति अग्नेः प्रदक्षिणक्रमेणाज्यचरुनिधानमन्त्रार्थः	९६
परस्करगृह्यसूत्रे	१०७
पितृभ्यः स्वधायिभ्य इति पितृमन्त्रार्थः	३४४
पुण्याहवाचनम्	१४०
पुनन्तुमेति अग्नौ स्रुघतापनमन्त्रार्थः	९३
पुनस्त्वेतिमन्त्रार्थः	३९९
पुरुरवाअसीत्युत्तरारणि निधानमन्त्रार्थः	४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
पूर्णादर्वीति पूर्णपात्रपूजनमन्त्रार्थः	३५६
पूर्णादर्वी	३७२
पूषात्वेत्श्चाच्यावयत्वित्यनिक्रमणमन्त्रार्थः	५४
प्रजापतेनेति मन्त्रार्थः	३६
प्रतिक्षेत्रे इति मन्त्रार्थः	३६४
प्रतीकं मेविचक्षणमित्यादिनिगदमन्त्रार्थाः	४११
प्रत्युष्टरक्षः इति स्रुवंवामहस्ते कृत्वादक्षिणहस्तेन संमार्जनकुशः प्रणीतोदकेन प्रोक्षणकरणमन्त्रार्थः	६१
प्रत्युष्टरक्ष इति पवित्राभ्यामाज्यहविषांत्रिरुत्पवनमन्त्रार्थः	६७
प्रथमाद्वितीयैरिति रेखात्रयकरणमन्त्रार्थः	८
प्रथमा द्वितीयैः	३६६
प्राच्यैदिशेस्वाहेति पुनर्दिक्पालमन्त्रार्थः	३१२
प्राणायस्वाहेति पञ्चेन्द्रियमन्त्रार्थः	२८६
प्रातरग्निमितिषट्प्रातर्मन्त्रार्थः	२७६
पृथिव्याः सधस्थादिति यज्ञपूर्वदिग्भागपूजनमन्त्रार्थः	३०
पृष्टिर्मे इति मन्त्रार्थः	३९२
पृष्ठोदिवीति दीपपूजनमन्त्रार्थः	१६८
बाहूमे इति मन्त्रार्थः	३९२
ब्रह्मजज्ञानमिति ब्राह्मणपूजनमन्त्रार्थः	१३७
ब्रह्मजज्ञानमिति ब्रह्ममन्त्रार्थः	२५१
ब्रह्मजज्ञानम्	२५७
ब्रह्मजज्ञानम्	२६
ब्रह्मात्वेति प्राशनमन्त्रार्थः	४०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
बृहदसीति उत्तरचक्राभिमर्शनमन्त्रार्थः	४१०
बृहस्पतेऽअतीति कलशे वस्त्रवेष्टनमन्त्रार्थः	१६२
बृहस्पते अतीति बृहस्पतिमन्त्रार्थः	२२२
भगएवेति विवाहमन्त्रार्थः	६०
भगएवेति पञ्चभगमन्त्रार्थः	२८५
भद्रंकर्णेभिरति कर्णवेधनमन्त्रार्थः	५७
भद्रं कर्णेभिरिति करणमन्त्रार्थः	३१८
भुवनेश्वरीवर्णनम्	३३६
भूस्या आखूनिति भूमिदेवमन्त्रार्थः	३०२
भूरसीति भूमिशोधनमन्त्रार्थः	१
भूर्भुवः स्वः वैश्वानरायेति मन्त्रार्थः	५९
मधुनक्तमिति मन्त्रार्थः	१३४
मधुमान्न इति मन्त्रार्थः	१३४
मधुवाता इति मन्त्रार्थः	१६३
मनसः काममिति मन्त्रार्थः	१४४
मनसः कामम्	४०२
मनोमे तर्पयतेति तर्पणमन्त्रार्थः	३६७
मयि गृह्णामीति अग्निग्रहण मन्त्रार्थः	४८
मरुतोयस्येति आयाह्वादिसप्तमरुन्मन्त्रार्थः	२६७
मातारुद्राणामिति मन्त्रार्थः	१३६
मात्वाशनिरितिलक्षणयवृत्ताभिमन्त्रणमन्त्रार्थः	४०८
मानस्तोके इति गोमयोपलेपनमन्त्रार्थः	६
मानस्तोके इति रुद्रमन्त्रार्थः	२६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
मित्रस्येति मधुपर्कनिरीक्षणमन्त्रार्थः	१३१
मित्रोन इति मित्रलोकमन्त्रार्थः	३०६
मेधांमे इति मन्त्रार्थः	३७१
यएतावन्तश्चेति वीरभद्राद्येकादशरुद्रमन्त्रार्थः	२६७
यत्र ब्रह्मेति मन्त्रार्थः	३७५
यत्रेन्द्रश्चेति मन्त्रार्थः	३६५
यथेमामिति मन्त्रार्थः	१४३
यथेमां	३६८
यद्ग्रामे इतिग्रामदेवमन्त्रार्थः	३१६
यदापीपेषेति नामकरणमन्त्रार्थः	५३
यद्देवा इति दर्भपरिसमूहनमन्त्रार्थः	५
यन्मधुन इति मधुपर्कप्राशनमन्त्रार्थः	१३३
यमदेवतावर्णनम्	३३०
यमायत्वेति यममन्त्रार्थः	२४१
यमायत्वा	२५३
याओषधीरिति सर्वौषधीप्रक्षेपणमन्त्रार्थः	१५३
यात इति क्रोधापनयनमन्त्रार्थः	४०६
यांमेधामितिमन्त्रार्थः	३७१
याःफलिनीरिति पूगीफलादिप्रक्षेपणमन्त्रार्थः	१५४
येतीर्थानीति तीर्थराजमन्त्रार्थः	३१०
येतेशतमिति कुशैःपरिस्तरणमन्त्रार्थः	७५
येतेशतमितिमन्त्रार्थः	१६६
योगे योगे इति योगमन्त्रार्थः	३१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
राजदेवतावर्णनम्	३२६
राजन्तमध्वराणामिति मान्धातृमन्त्रार्थः	३०६
राजन्तमध्वराणामिति पञ्चपाण्डवमन्त्रार्थः	३४२
वनस्पतेर्वीड्वङ्ग इति वनस्पतिमन्त्रार्थः	२७१
वरुणस्यो त्तम्भनमिति कलशे जलप्रक्षेपणमन्त्रार्थः	१५२
वरुणस्यो त्तम्भनमिति वरुणमन्त्रार्थः	२८७
वर्ष्मोऽस्मीति उपवेशनमन्त्रार्थः	१२७
वसोःपवित्रमसीति वास्तुदेवमन्त्रार्थः	३०१
वाङ्मे इत्यादि प्राणसंमर्शनमन्त्रार्थः	१३५
वातायस्वाहेति मेघमन्त्रार्थः	३२०
वामदेवमिति ईषादण्डाग्राभिमर्शनमन्त्रार्थः	४१०
वायुदेवता वर्णनम्	३३२
वायुरनिलमिति वायव्य दिग्भागपूजनमन्त्रार्थः	३६
वायो ये ते इति पश्चिमदिग्भागपूजनमन्त्रार्थः	३३
वायोयेते इति वायुमन्त्रार्थः	२१३
वायो येते	२५५
वायोयेते इति वातमन्त्रार्थः	३१६
विराजोदोऽसीतिपादप्रक्षालनमन्त्रार्थः	१२८
विवस्वन्नादित्य इति पुंसवनमन्त्रार्थः	४६
विश्वानीति मन्त्रार्थः	३६८
विष्णोरराटमिति विष्णुमन्त्रार्थः	२१०
विष्णोरराटम्	२३६
विष्णोरराटमिति षड् विष्णुमन्त्रार्थः	२७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
व्रतंकृणुतेति समावर्तनमन्त्रार्थः	५९
व्रतेनदीक्षामिति व्रतराजमन्त्रार्थः	३१
वृषणौ इति कुशतरुणनिधानमन्त्रार्थः	४४
व्याहृतीनां षोडशार्थाः	१९२
शण्डामर्का इति मन्त्रार्थः	४०६
शंनोदेवीरिति जलाभ्युन्त्रार्थः	१२
शंनोदेवीरिति प्रणीतोदकेनाःषेचनमन्त्रार्थाः	९३
शंनोदेवीरितिशनैश्चरमन्त्रार्थः	२२७
शादंदद्भिरिति संमार्जनकुशकरणमन्त्रार्थः	८२
शिरोमे इति मन्त्रार्थः	३९०
शिवान इति स्तनयित्वभिमन्त्रणमन्त्रार्थः	४०८
शिवोनामासीति वाद्यमानशिवाभिमन्त्रणमन्त्रार्थः	४०८
शुक्रज्योतिश्चेति सर्वहोमपूरणार्थमन्त्रार्थः	३४१
श्रीश्चते इति उमामन्त्रार्थः	३३७
श्रीश्चते इति महालक्ष्मीमन्त्रार्थः	२९६
सजोषाइन्द्र इति इन्द्रमन्त्रार्थः	२४०
सत्वन्नोऽग्ने इति मन्त्रार्थः	१९४
सदसस्पतिमिति त्रिरुद्धरणमन्त्रार्थः	१०
सदसस्पतिमिति मन्त्रार्थः	३९
सदसस्पतिमिति मेधायाचनमन्त्रार्थः	१७१
सप्तऋषय इति मन्त्रार्थः	१७७
सप्तते इति मन्त्रार्थः	३७१
सभाङ्गीरसीतिसभागमनमन्त्रार्थः	४०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
सभाचमा इति सभाप्रवेशमन्त्रार्थः	४०९
समिधाग्निमिति पृथक्समित्त्रयस्थापनमन्त्रार्थः	८७
समिधाग्निमिति अपरसमिधादानमन्त्रर्थः	१०५
समिधाग्निमिति समिधादानम्	१८८
समुद्रायत्वेति षड्वातमन्त्रार्थः	२८१
समुद्रं गच्छेति समुद्रमन्त्रार्थः	३२२
समुद्रंव इति अर्घाभिमन्त्रणमन्त्रार्थः	१२६
सरस्वती योन्यामिति सरस्वतीमन्त्रार्थः	२६२
सरस्वतीदेवीवर्णनम्	३३४
साधुभवान्निति आसनानयनमन्त्रार्थः	१२७
साविराडिति रथसमीपगमनमन्त्रार्थः	४१०
सिगसीतिसिचावधूताभिमन्त्रणमन्त्रार्थः	४०८
सुत्राभाणमिति उत्तरणमन्त्रार्थः	४०७
सुनावमिति नावारोहणमन्त्रार्थः	४०७
सुमित्रियान इति संमार्जनमन्त्रार्थः	३६१
सुसमिद्धायेति अग्निपर्युक्षणमन्त्रार्थः	१८७
सूद्रोऽसीति रासभारोहणमन्त्रार्थः	४०७
सूर्यदेवतावर्णनत्	३३०
सूर्यरश्मिरिति यज्ञमध्यभूमिपूजनमन्त्रार्थः	३८
सोमोधेनुमिति उत्तरदिग्भागपूजनमन्त्रार्थः	३३
स्थिरोभवेति अग्निप्रज्वालनमन्त्रार्थः	६४
स्थिरोभवेति दीपप्रज्वालनमन्त्रार्थः	१६८
स्योनापृथिवीति सप्तमृत्तिकाप्रक्षेपमन्त्रार्थः	१६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	पृष्ठ
स्योना पृथिवीति पृथिवीमन्त्रार्थः	२४८
स्वराडितिमन्त्रार्थः	१७७
स्वस्तये वायुमितिमन्त्रार्थः	१५
स्वस्तिन इति मन्त्रार्थः	१४१ २७४ ३६८
स्वस्तिपन्थामितिमन्त्रार्थः	१७
स्वस्तिनोमिमीतामितिमन्त्रार्थः	१३
स्वस्तिमित्रावरुणेति मन्त्रार्थः	१६
स्वस्त्ययनमितिमन्त्रार्थः	१८
हस्तियशसमिति गजस्पर्शनमन्त्रार्थः	४०७
हिरण्यगर्भ इति ब्रह्मपवित्रकरणमन्त्रार्थः	६६
हिरण्यगर्भ इति हिरण्यपुरुषनिधानमन्त्रार्थः	१०४
हिरण्यगर्भ इति पञ्चरत्नप्रक्षेपणमन्त्रार्थः	१५४
हिरण्यपर्ण इति वाश्यमानशकुन्यभिमन्त्रणमन्त्रार्थः	४०८

इत्यनुक्रमणिका समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धाशुद्धपत्रम्

अशु०	शु०	पृष्ठ	पंक्तिः	अशु०	शु०	पृष्ठ	पंक्तिः
श्च	क्र	३	१०	निँ	निं	१०	१२
च्छ	ञ्छ	४	३	द्धिँ	द्धिं	१०	१२
:		४	४	ष्टा	ष्ठा	११	३
नां	न्ना	४	८	क्रिँ	क्रिं	१२	१०
घौम		४	९	स्वस्तये०		१४	
च्य	द्रुघा	४	१८	प्	ब्	१४	४
वें	र्थे	६	६	य	या	१७	५
भ	भं	७	८	ट्	द्	१७	८
वा	चा	७	९	हिँ	हिं	१८	८
घौ	द्यौ	७	१७	लिँ	लिं	२०	११
देवतासि	देवमातासि	२	१८	घु	द्यु	२२	१८
डा	द्दा	२	१८	हिँ	हिं	२३	१३
सृ	मृ	३	१०	तिँ	तिं	२४	१४
:		५	९	हिँ	हिं	२५	१३
हिँ	हिं	६	६	स्या	ष्या	३०	४
ष्टा	ष्ठा	७	१०	यो	य	३०	८
तिँ	तिं	७	११	रक्कु	स्कु	३१	६
	चीं	१०	७	गिंन	गिंन	३९	१६
	सं	१०	९	तिँ	तिं	३९	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	—पृष्ठ	पंक्तिः	अशु०	शु०	—पृष्ठ	पंक्तिः
दु	दुं	४१	१	यो	पो	५१	५
षि	ति	४१	१४	र्कि	क्किं	५२	१६
ञ	च्च	४२	६	ज	जु	५२	१६
क्सा	क्या	४२	७	न्य	न्प	५४	४
स्प	स्या	४२	१०	म्पा	म्या	५५	९
ङ्ग	ङ्गु	४३	५	ये	यें	५५	१८
श्व	त्व	४३	७	र्वि	वि	५६	४
ङ्	ङ्गु	४३	१०	श्रु	श्नु	५७	१४
र्णि	ार्णिं	४४	५	वी	वीं	५९	३
यौं	यां	४४	१०	ज्वो	ज्यो	६१	४
प्प	प्य	४४	१९	जौ	जो	६१	१७
र्णि	ार्णि	४५	१	ड	दु	६१	१०
न्नमिनि	ल्यनिमि	४७	१०	श्चा	ञ्चा	६१	१२
त्द्यप	त्पद्य	४९	१०	र्ति	तिं	६१	१५
तां	तायां	५०	१७	र्हि	हिं	६१	१७
षा	पा	५१	४		तु	६३	७
यो	पो	५१	५	र्ष्टि	ष्टिं	६३	१६
य	प	५१	५	र्क्कि	किं	६३	१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	पृष्ठ	पंक्ति	अशु०	शु०	पृष्ठ	पंक्तिः
	ककुत्पतिः	६४	१	सु	सु	११५	१४
व	.	६४	१	ह्रे	हे	११५	१४
ष्टो	ष्ठो	६४	७	ला	लो	११४	१५
घा	द्या	६६	२	घ	ध	११७	५
र्ति	तिं	६६	६	व	र्व	१२५	१४
म	र्मों	६६	११	द	द्दै	१२६	२
वे	चे	६६	१४	श्च	ञ्च	१२८	१०
षि	यि	६७	१५	र्नि	र्नि	१२९	१५
ओ	भो	६८	१०	थ्यो	ध्यों	१२९	१७
पायि	यामी	७४	११	ह्वा	ह्य	१३०	१
म	मा	७४	१६	च्य	र्च्यं	१३०	१
त	तं	७५	४	र्तिं	र्तिं	१३०	१०
र्कि	र्कि	७५	१३	ष्टिं	ष्टिं	१३०	११
ड	दु	८०	१७	ङ्ग	ङ्गु	१३२	२
ती	ति	८९	१८	ते	त्ते	१३२	३
क्य	स्क	१०७	५	वै	थै	१३२	९
ती	ता	१०९	१७	व	च	१३५	१४
च	वृ	११३	११	र्मि	र्ञि	१३८	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	पृष्ट	पंक्तिः	अशु०	शु०	पृष्ट	पंक्ति
स्त्र	स्त्रा	१३८	१०	र्थं	क	१५२	१८
सी	सि	१३६	१२	म्य	न्य	१५३	६
तिं	ति	१४३	८	र्त्यं	र्प्य	१५३	१८
ंित	न्ति	१४५	६	र्द्दीं	र्द्दीं	१५४	१०
त्यि	स्य	१४५	१४	या	पा	१५५	३
न	.	१४६	२	स्मा	स्या	१५५	१५
प	य	१४६	५	ड्डा	छ्रा	१५६	७
य	ये	१४७	३	स्व	स्त	१५६	१२
.	ः	१४६	६	र्षं	र्षे	१६६	१७
न्नां	न्नों	१५०	२	ह्यो	न्ह्यो	१५७	५
त्या	ता	१५०	१४	र्तं	र्मं	१५७	७
रु	ह्हु	१५०	१४	ष	प	१५७	१७
ष	प	१५०	१५	ह्रा	ह्य	१५७	१७
त्व	स्व	१५१	३	च	श्च	१५८	१
घ	वि	१५१	६	क्रै	क्रे	१५८	१३
च्य	च्य	१५२	१०	घ	द्य	१५६	१२
म	म	१५२	११	त्वा	ता	१६१	२
कः	र्थः	१५२	१७	क्र	क्रृ	१६१	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	पृष्ट	पंक्तिः	अशु०	शु०	पृष्ट	पंक्ति
र्थे	र्थः	१६१	१६	ना	नां	१७२	७
के	लोके	१६१	१७	व	च	१७२	१६
र्दि	णादि	१६१	१७	स्त	स्तं	१७३	५
ति	टि	१६१	१८	ल	लं	१७३	७
थे	ते	१६२	५	धै	धैः	१७४	४
स्य	स्प	१६२	७	र्व	र्प	१७५	८
वौ	वो	१६२	१०	म्पां	म्यां	१७५	११
शी	शीं	१६४	१७	०	पातु	१७६	२
लै	लं	१६५	५	त्र	न	१७७	४
श्रा	स्रा	१६५	१५	र्थू	र्यू	१७७	७
ड	हृ	१६५	१६	च्य	व्य	१७८	१६
भ	ज	१६८	३	वि	ष	१८०	७
र्थ	थ	१६८	५	णा	ण	१८०	८
धा	वा	१६८	११	षु	यु	१८०	११
स्व	तोदीप	१६८	१३	गृः	गृ	१८०	१५
आ	अ	१६६	४	प	पः	१८२	५
हिं	हिं	१६६	६	घु	द्यु	१८२	१०
शा	सा	१७१	१२	धु	द्यु	१८२	८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	पृष्ट	पंक्तिः	अशु०	शु०	पृष्ट	पंक्तिः
ता	त	१८२	१०	।		२२४	१५
प्र	प्त	१८७	१०	तां	ता	२२४	१८
थ	०	१८७	११	जे	ज्रे	२२५	११
च	श्च	१८८	१२	द्धा	द्वा	२२५	१६
दी	ढी	१६४	१६	म्	व	२२५	१८
य	०	२०३	१३	प	पां	२२६	८
घृ	गृ	२०४	१४	श्चौ	श्चो	२२७	१०
ᳵण	ᳵणा	२०४	१४	स	म	२२८	६
शा	सा	२०३	१३	त	ति	२२८	१६
र्कि	किं	२१६	२	ह्र	ऊ	२३०	७
र्वि	त्रि	२१६	१७	द्ध	ध	२३१	१२
०	वि	२१६	२०	श्च	श्व	२३३	१५
त्पा	त्या	२२०	१६	पृ	यृ	२३४	१७
य	प	२२३	१०	त	त्त	२३७	२
-		२२३	१०	वें	वोऽ	२३६	२
वा		२२३	१०	स्त्र	स	२३६	६
।	नं	२२३	१०	त	त्र	२४०	६
।	द्रा	२२४	१४	:	रू	२४०	१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशु०	शु०	पृष्ठ	पंक्ति	अशु०	शु०	पृष्ठ	पंक्ति
म	मा	२४१	४	भ्य	भ्यः	२७५	१६
स्प	स्पृ	२४१	२	स्यते	ह्यतेः	२७९	११
मा	या	२४२	१		पङ्क्तिः	२८२	१३
प	-	२४२	४	ग्ये	ग्रे	२८५	१२
श	र्शं	२४२	१३	भ्यो	भ्यः	२८५	७१
घ	थ	२४३	९	धौं	धौ	२९६	११
ह्ले	ह्रे	२४५	११	निति	न्प्र	२९८	४४
र्थ	र्थः	२५०	१४	पू	प्	२९९	१९
मोड	मोऽ	२५०	५	द	दे	३०२	३
ष	प	२६२	१६	न्द्रा	न्द्रो	३०७	११
र्ति	ति	२६४	३	स्तो	स्तौ	३०७	१५
	म	२६९	१८		य	३१०	३
ल	स	२७१	२	थ	र्थ	३१०	१४
द्र	द्रु	२७२	१७	पु	पृ	३१४	९
					वे	३१५	७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

अग्निस्थापनमन्त्रार्थ दीपिका टीका

श्रीगणेशायनमः ॥ कश्चिदग्निस्थापनविधिप्रस्तावः॥ तत्रादौ ब्रह्मपरंपरया प्राप्तं वेदं परमकारुणिको भगवान् लोकहितैषी द्वापरान्ते सत्यवत्यां पराशरात् वेदव्यासांवतारो भूत्वा कलौ मन्दमतीन्मनुष्यान्विचिन्त्य तत्कृपया चतुर्धा व्यस्य ऋग्यजुःसामाथर्वाख्याँश्चतुरो वेदान् पैलवैशंपायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश!! ते च स्वशिष्येभ्यः एवं परंपरया सहस्रशाखो वेदो जातः, दैवात् ब्रह्महत्यादोषहेतुना क्रुद्धो यजुर्वेदाध्यापको वैशंपायनोऽभिमानकर्त्तारं याज्ञवल्क्यं प्रत्युवाच "मदधीतं त्यजेति"स योगसामर्थ्यात् तांविद्यां विधायोद्ववाम, वान्तानि यजूंषि गृह्णीतेति गुरूक्ताः अन्ये वैशंपायनशिष्यास्तित्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथो भूत्वा यजूंष्यभक्षयन्, तानि यजूंषि बुद्धिमालिन्यात्कृष्णानि जातानि ततो दुःखितो याज्ञवल्क्यो गायत्र्या सूर्यमाराध्य अन्यानि शुक्लानि यजूंषि अश्वरूपसूर्येण वाजेभ्यो वाजेन वा संन्यस्तानि प्राप्तवान्; तानि च जावाल बौधेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यो विभज्य पाठितवान्, तत्र मध्यन्दिनेन महर्षिणा लब्धो यजुर्वेदशाखाविशेषो माध्यन्दिन उच्यते, यजुर्वेदस्यान्ये जावालादिचतुर्दश शाखा भिन्नाः सन्ति, अत एव ऋग्वेदस्य एकविंशतिशाखाः, सामवेदस्य सहस्रशाखाः, अथर्ववेदस्य नव शाखाः सन्ति; सर्वत्र वेदेषु संहिता ब्राह्मणमारण्यकमुपनिषदश्चेत्यवान्तरभेदा बहवो दृश्यन्ते, मन्त्रभाग एको ब्राह्मणभागःअन्यः, सर्वोऽपीत्यभिप्रायेण मन्त्रब्राह्मणयोर्वेदनामधेयमित्यस्योपपत्तिः; अत्र सर्वेष्वपि वेदेषु कर्मज्ञानकाण्डभेदेन भागद्वयम्। कर्मप्रतिपादको भागः कर्मकाण्ड शब्देनोच्यते, ज्ञेयार्थप्रतिपादको भागः ज्ञानकाण्डशब्देन ज्ञानकाण्डशब्देनोपनिषद उच्यन्ते, कर्मकाण्डशब्देन तद्भिन्ना वेदभागा उच्यन्ते, कर्मशब्देनाष्टचत्वारिंशत्संस्कारा उच्यन्ते॥ते च गर्भाधानम्, पुंसवनम्, सीमन्तः, विष्णुबलिः, जातकर्म, नामकरणम्, उपनिष्क्रामणम्, अन्नप्राशनम् , कर्णवेधः, चौलम्, अक्षरस्वीकरणम्, उपनयनम्, व्रतम्, समावर्तनम्, वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाहः, उपाकर्म, उत्सर्जनम्, हुतम्, प्रहुतम्, आहुतम्, शूलगवः, बलिहरणम्, प्रत्यवरोहणम्, अष्टकाहोमः, अग्न्याधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, आग्रहयणेष्टिः, निरूढपशुबन्धः, सौत्रामणी, अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामः, वानप्रस्थ्यम्, संन्यासः, दया, अनसूया, शौचम्, अनायासः, मङ्गल्यम्, अस्पृहा, अन्त्येष्टिः इति ॥ राजसूयः, गवामयनम्, गोसवः, अश्वमेधः, आङ्गिरसक्रतुः, साकमेधः, पञ्चशारदीयः, विश्वजित्, पौण्डरीकम्, भर्तृद्वादशाहम्, संवत्सरसत्रम्, रात्रिसत्रम्, शतरात्रम्, स्तोमः, द्वादशसंवत्सरक्रतुः, सहस्रसंवत्सरक्रतुः, एवमन्येऽपि बोध्याः ॥ अस्य वेदराशेः षडङ्गानि:-शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पश्चेति ॥ तत्र शिक्षा, नाम उदात्तानुदात्तस्वरितप्रचयाख्यस्वरह्रस्वदीर्घप्लुतानुनासिकादिभेदभिन्नवर्णसमुदायात्मकपदपरिपाटीक्रमेण वेदशिक्षाप्रवर्तकनारदपाणिनियाज्ञवल्क्यादिमहर्षिकृतो ग्रन्थः छन्दोनाम—लौकिकवैदिकशब्दान् छन्दयति नियमयतीति पिङ्गलादिमहर्षिप्रणीतो ग्रन्थः; ज्योतिषं नाम लोकवदेव सूर्यचन्द्रादिज्योतिराश्रित्य तच्छेदशास्त्रविहितकर्मानुष्ठानकालनिर्णयाध्ययनाध्यापना—दिविधिनिषेधकालनिर्णयाय गणितज्ञानायापदादिषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होराप्रश्नस्कन्धद्वारा फलादेशादिप्रतिपादनाय कृतो ग्रन्थः; व्याकरणं नाम विशेषेण आसमन्ताद्वैदिकाँल्लौकिकांश्चशब्दान् करोति तथाभूतो पाणिन्यादिमहर्षिप्रणीतो ग्रन्थराशिः; तच्च नवविधम्:-ऐन्द्रम्, चान्द्रं, काशकृत्स्नम्, कौमारम्, शाकटायनम् सारस्वतम्, आपिशलम्, शाकलम्; पाणिनायकमिति; अन्यान्यपि स्फोटायनम्, पौष्करसादिव्याकरणम्, दौर्गव्याकरणम्, व्याघ्रभूतिव्याकरणमित्यादि; निरुक्तंनाम वैदिकाश्शब्दा निश्शेषेणोच्यन्तेऽर्थादिनिर्णयेनेति तथाभूतो यास्कप्रणीतो ग्रन्थः; कल्पो नाम बौम बौधायनापस्तम्बाश्वलायनादिमहर्षिप्रणीतः प्रयोगक्रमकल्पको ग्रन्थः;तेच बहवः।तत्रापि पूर्वसूत्राणि नवः-अग्निवेश्यसूत्रम्, बौधायनसूत्रम्, आपस्तम्बसूत्रम्, सत्याषाढसूत्रम्, द्राह्यायणसूत्रम्, अगस्त्यसूत्रम्, शाकल्याश्वलायनसूत्रम, अपरसूत्राणि-नव वैखानस सू०, भारद्वाजसू०, शौनकीयसू०, अग्निवेश्यसू०, जैमिनीयसू०, अमाथुन्यसू०, माध्यन्दिसू०, कौण्डिन्यसू०, कौषीतकिसू०, इत्यष्टादश सूत्राणि ॥ एतेषां श्रौतस्मार्तधर्मादिभेदेन बहवोऽवान्तरभेदाः वृद्धपरंपरोपदेशप्रसिध्या कात्यायन एव वररुचिनाम्ना पारस्करनाम्ना च ख्यातः; महर्षियाज्ञवल्क्यप्रधानशिष्येण तेनैव कात्यायनेन शुक्लयजुर्वेदकर्मणामनुष्ठानपद्धतिबोधकं षड्विंशत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यायात्मकं कातीयं श्रौतसूत्रं पारस्करीयगृह्याख्यस्मार्तसूत्रञ्च प्रणीतम् ॥ स्मार्ताग्निकर्मपद्धतिप्रदर्शके षोडशसंस्कारादिगृह्यकर्मणां प्रतिपादके मूलभूते पारस्करगृह्यसूत्रे प्रयुक्ताः वाजसनेयीनां द्विजानां गर्भाधानादियावत्संस्कारा जगति प्रवर्त्तन्ते ॥ अग्निस्थापनप्रयोगविधिस्तु आदौ प्रथमकण्डिकायां प्रोक्तः;गर्भाधानादि संस्कारकर्मसु शिरोभूतोऽयमग्निस्थापनप्रयोगः; इमं विना कर्मठाः यज्ञादिकर्म कर्तुं नशक्नुवन्ति; पारस्करादिगृह्यसूत्रेऽपि मन्त्रमेलनं विना अग्निस्थापनसामान्यविधिरुक्तः; तस्मिनप्रयोगविधौ शिष्टजनैर्यथासंभवं तत्तत्प्रयोगानुसारतः यद्यन्मन्त्रमेलनं कृतम् तेषां तेषां मन्त्राणां टीका नोपलब्धा; कात्यायनादिश्रौतसूत्रेषु तत्तत्प्रयोगानुसारेणैव उवटाचार्यादिभिर्व्याख्यातत्वात् ; अर्थज्ञानं विना कर्मसिद्धिर्नभवति कर्मसिद्धिं विना धर्मकामार्थमोक्षादिफलं नप्राप्नुवन्ति;अतएव ऋग्वेदे ऋ"चोऽअक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुःयस्तन्नवेद किमृचा करिष्यति य इत्तद्विदुष्ट इमे समासते"अर्थः– यस्मिन् अक्षरे परमे व्योमन् यस्मिन् आकाशवत्सर्वव्यापके आद्ये ॐकाररूपे ऋषयः वैदिकमन्त्राणि विश्वेदेवाः ब्रह्मविष्णुशिवादयः सर्वे देवाः विद्वांसः मनुष्याः सर्वाणीन्द्रियाणि सर्वे लोका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्च अधिनिषेदुः स्थिताः यःपुरुषः मन्त्रैः तं ओंकारस्वरूपं नवेद नजानाति तस्य पुरुषस्य ऋचः मन्त्राणि किंकरिष्यन्ति किञ्चिदुपकारं नकरिष्यन्ति ये इत्तत् येपुरुषास्तदोंकाररूपं विदुः मन्त्रार्थमभिजानन्ति ते इमे ते एव पुरुषाः अस्मिंल्लोके धर्मकामार्थमोक्षादिफलं समासते प्राप्नुवन्ति॥ यास्कोऽपि "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ॥ योऽर्थज्ञ इत्सकलंभद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा"॥ यःपुरुषः वेदमधीत्य वेदमन्त्रं पठित्वा अर्थं तस्यार्थं नविजानाति नवेत्ति समनुष्यः स्थाणुः काष्ठस्तम्भवत् भारहारः भारवाहकः किलाभूत्, सत्यं भवति यःपुरुषः अर्थज्ञः मन्त्रार्थाभिज्ञः स ज्ञानविधूतपाप्मा पापरहितः सन् मरणात् प्रागेव सकलं संपूर्णं भद्रं सुखं अश्नुते प्राप्नोति, पुनश्च शरीरं त्यक्त्वा नाकमेति स्वर्गं गच्छति ॥ पुनःसुश्रुताचार्योऽपि "यथाखरश्चन्दनभारवाही भारस्य वेत्ता नतु चन्दनस्य एवंहि शास्त्राणि बहून्यधीत्य चार्थेषु मूढाः खरवद्वहन्ति"॥शान्तिपर्वणि "यो हिवेदेच शास्त्रेच ग्रन्थधारणतत्परः नच ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा"॥ ग्रन्थान्तरे ज्ञात्वा कर्माणि कुर्वीत इत्यर्थः॥ यदधीतमविज्ञातं निगदेनैव शब्द्यते अनग्नाविव शुष्कैन्धो नतज्ज्वलति कर्हिचित् ॥ अनर्थज्ञोऽल्पकण्ठश्च पठेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठकाधमाः इति च भाष्यादाद्युक्तरीत्यार्थज्ञानमन्तरा वेदानुपूर्वीज्ञाननिरर्थकत्वोक्तेः अर्थज्ञानमावश्यकम्-अतएव "वेदार्थज्ञो जपं जप्त्वा तथैवाध्ययनं द्विजः कुर्वन्स्वर्गमवाप्नोति नरकन्तु विपर्यये, इतिव्यासोक्तेः॥ तस्माद्देवाग्निस्थापनविधिप्रयोगमन्त्रार्थदीपिकाटीकानवलोक्य विद्वज्जनानां यजमानानां चार्थज्ञानेन कृतं कर्म सिद्धिभूतं भवति कर्मसिद्धौ इह जन्मनि सर्वसुखभोगप्राप्तिः, परत्र च मोक्षप्राप्तिर्भवतीति मनसि निश्चित्य इयमग्निस्थापनविधिप्रयोगस्थितमन्त्रार्थदीपिकाटीका अचानेग्रामनिवासिना पं. वेदनाथशर्मणा बहुतरप्रयासेन विरचिता, अस्यामग्निस्थापनविधिहोममन्त्राणां व्याख्यानं तथा अग्निमन्थनमहापुण्याहवाचनमधुपर्कविधिमन्त्राणां व्याख्यानम्, परिशिष्टविधौ हस्त्यारोहणरथारोहणाश्वाद्यारोहणसभाप्रवेशनादिविधिमन्त्राणां व्याख्यानं, पुनस्तथा नावारोहणगिरिवनवृक्षगोष्ठचतुष्पथश्मशानभूम्यादिदर्शनसिंहभिभूत—स्तनयित्नुशिवाशकुनादिशब्दश्रवणजनितारिष्टविनाशक—विधिमन्त्राणांव्याख्यानं गेडुधौराल्यादिनामप्रसिद्धपदानामपि व्याख्यानंच धूपदीपनैवेद्याभिषेकादिमन्त्राणां व्याख्यानंच वर्तते कुशायिनीतिमन्त्रस्य व्याख्याःषोडशार्थाः कृता, अत्र स्थितानां सर्वेषां मन्त्राणां भाष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्त्तते, किन्तु भिन्नभिन्नयज्ञप्रयोगत्वेन भिन्नार्था भिन्नार्था दृश्यन्ते, ननार्थत्वान्नानाशक्तित्वाच्च; अतएवाग्निस्थापनविधिहोममन्त्रटीका नोपलब्धा; अत्र शिष्टै र्यत्र यत्र ये ये मन्त्रप्रयोगाः क्रियन्ते । तत्तत्प्रयोगानुसारेणैव मया मन्त्रव्याख्यानं क्रियते, तत्रापि क्वचित् महीधरभाष्यं संगृहीतम् क्वचित् सायणभाष्यं कुत्रचित् जयरामभाष्यं संगृहीतम्, क्वचिच्च स्वबुद्ध्या व्याख्यानं कृतम् ॥ स्वीयं दोषमूलमचिन्त्यैवाविवेकिनः पराङ्मुखा स्वदोषमन्यत्रारोप्य भ्रमन्ति, पुनश्च सांसारिकदुःखभागिनो दुःखतरङ्गमालिनिसंसारेऽसकृदहर्निशंनि मज्जनोन्मज्जनपारवश्येनानुभवन्ति एतत्सर्वं कण्ठचामीकरन्यायेन निकटवर्त्तिन्यप्यग्निस्थापनाचिन्तामणौ कान्तारभ्रमणमिव वृथा परिभ्रमन्तः क्लिश्यन्तीति मनसिकृत्य बहूनामेतदर्थानुसन्धानानुष्ठानप्रवणधिषणानामवगत्यै यथाशक्ति यथामनीषं बहुल

---

[1]पृषोदरादीनियथोपदिष्टमितिसूत्रभाष्ये शिष्टलक्षणमुक्तम्-प्रागादर्शात् प्रत्यक् कालकवनात् दक्षिणेन हिमवन्तम् उत्तरेणपारियात्रम् आर्यावर्त्तः एतस्मिन्नार्यावर्त्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारंगता स्तत्र भवन्तः शिष्टाः शिष्टाः शब्देषु प्रमाणमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरश्रेयस्करत्वात् बहुकालं विचारान्वेषणेन सरस्वतीकृपया मनसि स्फुरितेनार्थेन चोन्नीतम् अर्थानुसन्धानपूर्वकहोमादिविधिकर्मणा मनोवैशद्येन सर्वेऽपिसानन्दाः कृतकार्याश्च भूयासुः। अत्र केषांचित् प्रत्यन्तरालामात्कचनमतिमान्द्यात्कुत्रचिद्दृग्दोषाच्च निसर्गमानुषशेमुषी सुलभंस्खलितं विदुषामक्षिविषयमापतेच्चेत्तर्हि गच्छतःस्खलनं नदोषायेति तत्स्खलितजातंहंसक्षीरन्यायेन शोधयन्तु सहिष्णवःसारग्राहिणो दयालवो विद्वांसः॥

पृषोदरादीनियथोपदिष्टमितिसूत्रभाष्ये शिष्टलक्षणमुक्तम्–प्रागादर्शात् प्रत्यक् कालकवनात् दक्षिणेन हिमवन्तम् उत्तरेण पारियात्रम् आर्यावर्तः एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेणकस्याश्चिद् विद्यायाः पारंगतास्तत्रभवन्तः शिष्टाः शिष्टाःशब्देषु प्रमाणमिति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशायनमः ।। अथाग्निस्थापनविधिः

* भूरसीतिभूमिशोधनम् ।।

ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्य भुवनस्यधर्त्री।। पृथिवींयच्छ पृथिवीं दृꣳह पृथिवींमाहिꣳसीः।।१।।

श्रीगणेशायनमः ।। श्रीसरस्वत्यै नमः ।। श्रीगुरुभ्यो नमः।।
श्रीवाग्वादिन्यै नमः ।। श्रीकुलदेवताभ्यो नमः ।।

वाग्वादिनीं गुरुं नत्वा वेदनाथाख्यसूरिणा ।
अग्निस्थापनमन्त्रार्थदीपिकेयं प्रतन्यते ।। १ ।।
क्वाहं सुमन्दबुद्धिस्तु क्वेदं मन्त्राब्धिमन्थनम् ।
तथापि भारतीदेव्या कृता मन्त्रार्थदीपिका ।।२।।
टीकान्तराणीन्दुरविप्रभाणि बाह्यार्थरत्नानि च काशयन्तु ।
अन्तःसुगूढार्थचयप्रकाशे दीपस्तमो वैदिकमन्दिरेऽस्मिन्॥३
आश्चर्यार्थप्रदां टीकां सुगूढार्थप्रकाशिनीम् ।
बह्वर्थज्ञानवान्भूयादिमामाश्रित्य यो बुधः ।। ४ ।।

---

१ कर्त्ता स्नातः प्रक्षालितपाणिपाद आचान्तः कृतप्राणायामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होमादि क्रियते आज्ञैर्ग्रहाणां कर्मठैरपि ।
तन्मन्त्रार्थमजानद्भिः श्रुव आज्यरसं यथा ॥ ५ ॥
उपकाराय तेषां तु स्वेक्षणाय तथैवच ।
व्याख्यां कुर्वे वेदभाष्यमवलोक्य सुनिर्मलाम् ॥६॥

सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः सद्बुद्धिंश्च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ॥ राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥ ७ ॥

टी० भूरसीति भूरसीति मन्त्रजपेन वेदिभूम्याः शोधनं कुर्यादिति शेषः ॥ प्रस्तारपंक्तिः-- आद्यौ चेत्प्रस्तारपंक्तिरित्युक्तेः यत्राद्यौ द्वादशकावन्त्यावष्टकौ सा प्रस्तारपंक्तिः अत्र तु आद्य एकादशको द्वितीयस्त्रयोदशकस्तृतीयतूर्यौ पञ्चकौ पञ्चमः षडक्षरः एवं पंञ्चपादाः ॥ हेवेदिभूमे त्वं भूः सुखानां भावयित्र्यसि भूसत्तायाम् कर्त्तरि क्विप् अन्तर्भावितण्यर्थो ज्ञेयः भूमिः देवादीनां स्थानभूता असि भुवः किदिति सिः “ भूमिः स्थितौ स्थानमात्रे इति हैमः ” अथवा भूम्यभिमानिनी देवतासि अदिति देवतासिङ्दाञ्दाने नञो डाञः डिति

१* तृणाद्यवकरोत्सारम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्माचमे इति मृत्तिकास्थापनम्

ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामञ्च मे लोहञ्च सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥२॥

इति शाकटायनः॥ यद्वा अखण्डितासि दो अवखण्डने क्तिच् क्तौचेति क्तिच्, द्यतिस्यतीत्वम्, दितिभिन्ना अदितिः विश्वधाया विश्वं दधाति पुष्णातीति विश्वधायाः डुधाञ् धारणापोषणयोः वहिहाधाञ्भ्यश्छन्दसीति असुन् ॥ आतोयुगिति युक्,विश्वं धायो निहितमस्यामिति वा विश्वस्य भुवनस्य सर्वस्य भूतग्रामस्य धर्त्री धारयित्री तादृशी त्वं पृथिवीं यच्छ नियतां कुरु पृथिवींदृंह इह दृढीकुरु पृथिवीं माहिंसीः पृथिव्याः हिंसां मा कुरु ॥ १ ॥

टी० अश्माचम इतिमन्त्रेण वेद्यां मृत्तिकानां स्थापनं कुर्यात् ॥ हे मृत्तिके अश्मा पाषाणः मृत्तिकाः प्रशस्ता मृत् मृदस्तिकन् । गिरयः क्षुद्रपर्वताः गोवर्धनार्बुदरैवतकादयः पर्वताः महान्तो मन्दरहिमाचलादयः सि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एषवस्तोम इति दर्भं गृह्णाति

ॐ एषव स्तोमोमरुतइयं गीर्मान्दार्यस्य मा-न्यस्य कारोः॥ एषायासीष्टतन्वे वयांविद्यामेषंवृजनं जीरदानुम्॥३

कताः शर्कराः वनस्पतयः पुष्पं विना फलवन्तः पनसोदुंवरादयः,हिरण्यं सुवर्णं रजतं वा " द्रविणा कुप्ययोश्चेत्यभिधानात् " अयो लोहम् श्यामं ताम्रम् लोहं कांश्यं रजतं कनकं वा " लोहं कालायसे सर्वतैजसे जोङ्गकेऽपिच " इत्यभिधानात् सीसं प्रसिद्धम् त्रपु रङ्गम् यज्ञेन एते कार्यविशेषेषु वेद्यां तव स्थापनकर्मणा मे कल्पन्ताम् क्षमा भवन्तु ॥ २ ॥

टी० एषवस्तोम इति मारुतीत्रिष्टुप् । हेमरुतः कारोः कर्त्तुं र्यजमानस्य एषः स्तोमो दर्भाणां समूहः " स्तोमस्तोत्रे ऽध्वरे वृन्दे इत्यमरः" इयं च गीः सत्यप्रियरूपा अग्निस्थापनसंवन्धिमन्त्रवर्णरूपा वाणी च वो युष्मभ्यम् युषमदर्थं वर्त्तते इतिशेषः। युष्मान्विना कुशादीनां पिङ्गलवर्णत्वेनहान्यापत्तेः, उच्चारणासंभवाच्च । किं भूतस्य कारोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्देवा इति दर्भैः परिसमूहनम्

ॐ यद्देवादेवहेडनंदेवासश्चकृमावयम् ॥
अग्निर्मातस्मादेनसोविश्वान्मुंचत्व ँ हसः ४

मान्दार्यस्य मां ममेति स्वस्वामिसंबन्धं दारयतीति मान्दार्यः तस्य वीतरागस्येत्यर्थः। यद्वा मां दारयत्येवं यः शत्रूणां प्रत्ययमादधाति स मान्दार्यः। यद्वा मन्दारः कल्पवृक्षः। तत्तुल्यो मान्दार्यः तस्य कामपूरस्येत्यर्थः। मान्यस्य मानार्हस्य किञ्च हेमरुतः यूयमिषाः अन्नेन निमित्तेन अयासीष्ट आगच्छतः किमर्थम् वयां वयसाम् आमि टिलोप आर्षः बाल्ययौवनस्थाविराणां वयसां तन्वे शरीराय सर्वदा शरीरस्थित्यर्थमित्यर्थः, अस्मच्छरीरंदृढीकर्तुमितिभावः, किंच इषमन्नं बलंच वयं विद्याम लभेमहि। किंभूतमिषं वृजनं च जीरदानं जीवयतीतिजीरदानुः तम् जीवेरौणादिको रदानुप्रत्ययः लोपोव्योर्वलि इति वलोपः, जीवितदातृबलमन्नंच वयं प्राप्नुयामेति प्रार्थना ॥ ३ ॥

टी० यद्देवा इतिमन्त्रेण गृहीतैःत्रिभिर्दर्भैः परिसमूहनं पांसूनामपमारणम् अग्निदेवत्योऽनुष्टुप् ॥ दीव्यन्तीतिदेवाः दीप्यमाना हेदेवासः देवाः "आज्जसेरसुगिति असुक्, वयं यद्देवहेडनं देवानां हेडनमपराधं चकृम कृतवन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानस्तोक इति उपलेपनं गोमयेन

ॐ मानस्तोकेतनयेमानआयुषिमानोगोषुमा-
नोऽअश्वेषुरीरिषःमानोवीरान्रुद्रभामिनोवधी
र्हविष्मन्तः सदमित्वाहवामहे ॥ ५ ॥

करोतेर्लिट् संहितायां छान्दसो दीर्घः अग्निस्तस्मादेनसः पापात् पांसूनां परिसमूहनेन मा मां मुञ्चतु पृथक्करोतु । विश्वात् विश्वस्मात् अंहसो विघ्नाच्च मुञ्चतु ङसेः स्माद्भाव आर्षः॥ ४ ॥

टी० हे रुद्र! वेदिकायां गोमयेनोपलेपात् नोऽस्माकं तोके पुत्रे तनये पौत्रे मारीरिषः नः आयुषि जीवने मार्हिंसीः नो गोषु तुरगेषु मारीरिषः विभक्तिव्यत्ययो वा तोकं तनयमायुर्गा अश्वान्मार्हिंसीः; भामक्रोधे भामिनः क्रोध युतानपि नोऽस्माकं वीरान् भृत्यान् मावधीः, क उपकार इति चेत् हविष्मन्तः हविर्युक्ताः सदमित् सदैव त्वां वयं हवामहे यागायाह्वयामः, त्वदेकशरणाः वयमिति भावः॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वामिद्धीत्युल्लिख्य श्रुवेण
ॐ त्वामिद्धिहवामहेसातौवाजस्यकारवः ॥
त्वांवृत्रेष्विन्द्रसत्पतिं नरस्त्वांकाष्ठास्ववर्वतः॥६

टी० त्रिः श्रुवेण खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन वा उल्लिख्य प्रागग्रा उदक्संस्था स्थण्डिलपरिमाणास्तिस्रो रेखाः कृत्वा, शम्युद्दष्टा वृहती । हे इन्द्र! कारवः कर्त्तारः यज्ञानाम् नर ऋत्विजो वयम् त्वामेव वेदिकायां श्रुवादिनोल्लेखनविधौ हवामहे आव्हयाम। इत् एवार्थे हि निश्चयेन, किंनिमित्तम् वाजस्यान्नस्य सातौ लाभनिमित्तम् वृत्रेषु शत्रुषु शत्रुघातनिमित्तम् का ासु दिक्षु दिग्विजयनिमित्तम् कीदृशं त्वाम् सत्पतिं सतां पालयितारम् श्रुतिस्मृत्युक्ताचाररताः निषिद्धत्यागिनः सन्तः कथ्यन्ते तथा अर्वतः अश्वप्राप्तिनिमित्त ञ्च । विभक्तिव्यत्ययः, त्वां शब्दावृत्तिरादरार्था ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमा द्वितीयैरित्यादिभिः प्रागग्रं रेखात्रयं
तन्मण्डले श्रुवेण कुर्यात्

ॐ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः स-
त्येन सत्यंयज्ञेनयज्ञोयजुर्भिर्यजू ꣳ षिसामभिः-
सामान्यृग्भिरृचःपुरोनुवाक्याभिःपुरोनुवाक्या
याज्याभिर्याज्या वषट्कारैर्वषटकारा आहुति
भिराहुतयोमेकामान्समर्धयन्तु भूः स्वाहा॥७॥

टी० प्रथमाद्वितीयैरिति विश्वदेवदेवत्यमाशीर्लिङ्ग यजुः प्रकृतिश्छन्दः प्रथमादेवाः द्वितीयैः सहिताः रेखात्रय करणेन मामवन्तु, द्वितीयास्तृतीयैः सहावन्तु, तृतीयाः सत्येन सह सत्यं यज्ञेन सह यज्ञो यजुर्भिः सह यजूंषि सामभिः सह सामान्यृग्भिः ऋचः पुरोनुवाक्याभिः सह पुरोनुवाक्या याज्याभिः सह याज्या वषटकारैःसह वषट्कारा आहुतिभिः सह एवं त्रिप्रकारै रेकादशसंख्यै र्देवै रुत्तरोत्तरं पालिताः आहुतयो मे मम कामानभिलाषान् समर्धयन्तु पूरयन्तु भूः भुवनं भूः हुतमिदं स्वाहा सुहुत मस्तु ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ दक्षिणामारोहत्रिष्टुप्त्वावतु॥ बृहत्सामपंच
दशस्तोमोग्रीष्मऋतुःक्षत्रं द्रविणम् ॥ ८ ॥
ॐ प्रतीचीमारोहजगतीत्वावतु॥ वैरूप ६ साम
सप्तदशस्तोमोवर्षाऋतुर्विड् द्रविणम् ॥ ६ ॥
ॐ उदीचीमारोहानुष्टुप्त्वावतु॥ वैराज६सामै
कवि ६ शस्तोमः शरदृतु फलं द्रविणम्॥१०॥

टी० दक्षिणामारोहेति–हेयजमान! त्वं दक्षिणरेखाकरणेन दक्षिणां दिशमारोहाक्रम,त्रिष्टुप्छन्दः त्वामवतु, त्वामिद्धिहवामहे इत्यस्यामृच्युत्पन्नं बृहत्साम पञ्चदशस्तोमः ग्रीष्मऋतुः द्रविणरूपं क्षेत्रं क्षत्रियजातिः एते त्वामवन्तु, क्षेत्रं तत्र द्रविणमवत्विति वा ॥८॥

टी० प्रतीचीमारोहेति—हेयजमान! त्वं मध्यरेखाकरणेन प्रतीचीदिशमारोह, जगतीछन्दः त्वामवतु यद्या वइन्द्र ते शतमित्यस्यामृच्युत्पन्नं,वैरूपं, साम सप्तदशस्तोमः वर्षा ऋतुः विट् वैश्यजातिलक्षणं द्रविणम् एते त्वामवन्तु; यद्वा वैश्यजाति स्ते द्रविणमवतु ॥ ६ ॥

टी० उदीचीमारोति हेयजमान!त्वं उत्तररेखाकरणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदसस्पतिमित्यनामिकाङ्गुष्ठाभ्यान्निरुद्धरणम्
ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ॥
सनिंमेधामयासिष ६ स्वाहा ॥११॥
व्रतंकृणुतेति वेद्यां स्रुवेणोद्धृतपां
सूननामिकाङ्गुष्ठाभ्यामुद्धृत्य
ॐ व्रतंकृणुताग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियो

उदीचीदिशमारोह अनुष्टुप्छन्दः त्वामवतु, पिबासोममिन्द्रमन्दतु त्वा एतस्यामृच्युत्पन्नं वैराजं साम एकविंशस्तोमः शरदृतुः फलं यज्ञफलजलदातृ द्रविण धनम् एते त्वामवन्तु १०

टी० अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यः पांसूनामुद्धरणम्, लिङ्गोक्तदेवत्या गायत्री। अनामिकाङ्गुष्ठाभ्यां पांसूनामुद्धरणेन अग्निं सनिं द्रव्यदानं मेधां बुद्धिं च अयासिषं याचे द्विकर्मकः, कीदृशमग्निम् सदसः यज्ञगृहस्य पतिं पालकम् अद्भुतमचिन्त्यशक्तिम् इन्द्रस्य प्रियं मित्रं काम्यं कमनीयं धनमेधार्थिभिः ॥ ११ ॥

टी० व्रतंकृणुतेति- हेऋत्विजः यूयं व्रतं क्रियते जनैरिति व्रतं कर्म, वृञ्वरणे बाहुलकात् पृषिरञ्जिभ्यांकिदित्यतच् कित्वान्नगुणः । कृणुत कुरुत अग्निप्रीत्यर्थं अनामिकाङ्गु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैवींधियंमनामहेसुमृडीकामभिष्टये वर्चोधांयज्ञवाहस ६ सुतीर्थानोऽअसद्वशे ॥ येदेवामनो-

घाश्र्यां पांसूनामुद्धरणरूपं कर्म कुरुतेति भावः ॥ अग्नि र्ब्रह्म ब्रह्मशब्देन वेदत्रयमभिधीयते तस्य वेदत्रयस्याग्नित्व मुपचर्यते, तस्मादयमग्नि र्ब्रह्मैव वेदरूप एव, अयमग्नि र्यज्ञः तस्य अग्नेर्यज्ञसाधनत्वाद्यज्ञत्वमुपचर्यते, अग्नि र्यज्ञ एवेति वनस्पति र्यज्ञियः यज्ञयोग्यो यो वनस्पतिः खादिरादिः सोऽपि यज्ञ इत्यनुवर्त्तते वनस्पतेर्यज्ञसाधनत्वाद्यज्ञत्वम्, तथाच श्रुतिः "नहि मनुष्या यजेरन्यद्वनस्पतयो नस्युरिति" दैवीं धियमिति शकरी अतिशक्करी वा इयं पांसूनामुद्धरण रूपकर्मकरणात धियं मनामहे यज्ञानुष्ठानविषयां बुद्धिं याचामहे मनामह इति याच्ञाकर्मसु पठितः किमर्थम् अभिष्टये अभि समन्तात् यजनमभिष्टिः अभिपूर्वस्य यजतेः क्तिनि आदिलोपः। अभिमुखत्वेन प्राप्तस्य सिद्ध्यर्थम्, किंभूतां धियम् दैवीं देवसंबन्धिनीम् देवतोद्देशेन प्रवृत्तामित्यर्थः॥ तथा सुमृडीकां सुष्टु मृडयति सुमृडीका तां शोभनसुखहेतुम् तथा वर्चोधाम् वर्चोदधातीतिवर्चोधास्तां तेजसो धारयित्रीम् तथा यज्ञवाहसम् यज्ञं वहति यज्ञवाहा स्तां यज्ञनिर्वाहकर्त्रीम् तथाविधा धीः सुतीर्था सुखेन तरितुं प्राप्तुं शक्या सुतीर्था, यद्वा सुष्टु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातामनोयुजोदक्षक्रतवस्तेनोऽवन्तु ते नः पान्तु तेभ्यःस्वाहा ।। १२ ॥

शंनोदेवीरित्यभ्युदय

ॐ शंनोदेवीरभिष्टय आपो भवन्तुपीतये शंयो रभिस्रवन्तुनः ॥ १३ ॥

तीर्थमवतरणमार्गो यस्यां सा एवं विधा सतीं नो वशे असत् अस्माकमधीनत्वे भवतु। ये देवा ईदृशा दीव्यन्ति द्योतन्ते इति देवा श्चक्षुरादीन्द्रियरूपाः प्राणाः वागेवाग्निः "प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वेदेवा" इतिश्रुत्युक्ताः किंभूताः मनोजाताः दर्शनश्रवणादीच्छारूपान्मनस उत्पन्नाः इच्छोत्पत्तौ तेषां प्रवर्त्तमानत्वात् तथा मनोयुजः रूपादिदर्शनकालेऽपि मनसा युक्ता एव वर्तन्ते। अन्यमनस्कस्य रूपादिप्रतिभासाभावात्।यद्वा स्वप्नावस्थायां मनसा युज्यन्ते ते मनोयुजः तथा दक्षक्रतवः दक्षाः कुशलाः क्रतवः संकल्पाः येषान्ते संकल्पितार्थकारिण इत्यर्थः ।। ते देवाः नोऽस्मानवन्तु यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु, तेभ्यः प्राणरूपेभ्यो देवेभ्यः स्वाहा सुहुतमस्तु ॥ १२ ॥

टी० शंनोदेवीरितिमन्त्रोच्चारणेन वेदिकायां मणि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्वस्तिवाचनम्

ॐ स्वस्तिनो मिमीतामश्विनाभगः स्वस्तिदे व्यदितिरनर्वणः॥ स्वस्तिपूषा असुरो दधातुनः स्वस्तिद्यावापृथिवीसुचेतुना ॥ १ ॥

काद्भिरभ्युद्धत्य अभिषिच्य अब्देवत्या गायत्री।देवीः देव्यो दीप्यमाना आपः नोऽस्माकमभिष्टये अभिषेकायाभीष्टाय वा पीतये पानाय च शं सुखरूपा भवन्तु ॥ देवीरित्यत्रवा छन्दसीतिपूर्वसवर्णदीर्घः, वेदिकायां जलैरभिषेकात् अस्माकं स्नाने पाने चापः सुखयितृयो भवन्तु, आपः शं योः रोगानां शमनं भयानां यवनं पृथक्करणं च अभिस्रवन्तु नोऽस्माकं भयरोगनाशं कुर्वन्त्वित्यर्थः । यद्वा नोऽस्माकं अभि उपरि स्रवन्तु शुद्धयर्थं सिञ्चन्तु ॥१३॥ इत्येत्र पञ्चसंस्कारा भवन्ति ॥ उक्तंच पारस्कारगृह्यसूत्रे "परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येति" एते पंचभूसंस्कारा इति भर्तृयज्ञभाष्ये अग्न्यर्था इति कर्कोपाध्यायः ॥ तेन यत्रयत्राग्नेः स्थापनं तत्र तत्रै तेकर्त्तव्याः ॥

टी० स्वस्तिनोमिमीतामिति–स्वस्त्यात्रेयः विश्वेदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुव-
नस्य यस्पतिः॥ बृहस्पति ६ सर्वगण ६ स्वस्तये
स्वस्तय आदित्यासो भवन्तुनः ॥ २ ॥

१ उष्णिक् ३ त्रिष्टुप्जगती वा २ अनुष्टुप् ॥ अश्विना अश्विभ्यां सहितो भगो भगदेवः नोऽस्मभ्यम् स्वस्ति अविनाशं क्षेमं मिमीतां निर्मिमीताम्, अश्विनेत्यत्र सुपांसुलुगितिविभक्तेराकारः, देवी दीप्यमाना अदितिर्देवमाता भूमि र्वानः स्वस्ति मिमीताम्। कीदृशी: अदितिः अनर्वणः अनर्वा प्रथमार्थे षष्टिः; नविद्यते अर्वा कुत्सितरूपं बाहनं वा यस्या सा अनर्वा "अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गक" इति कोषान्तरम्।अर्वणस्त्रसावनञ इतिसूत्रे अनञइति वचनेन तृङत्यन्तादेशाभाव।पूषा नः स्वस्ति दधातु। कीदृशः पूषा असुरः अस्यति क्षिपति शत्रूनिति असुरः असुक्षेपणे असेरुरन् इत्युरन् प्रत्ययः । द्यावापृथिवी द्यावापृथिव्यौ नः स्वस्ति धत्तम्। द्यौश्च पृथिवी च द्यावापृथिव्यौ दिवो द्यावः इतिसूत्रेण दिवसश्च पृथिव्यामितिचकारद् दिव् इत्यस्यस्थाने द्यावादेशः।सुपां सुलुगिति पूर्वसवर्णद्दीर्घः। कथंभूते द्यावापृथिव्यौ सुचेतुना शोभनं चेतत इतिसुचेतुने शोभन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ स्वस्तयेवायुमुपब्रवामहै
सोमंस्वस्तिभुवनस्ययस्पतिः॥
बृहस्पति ꣳ सर्वगण ꣳ स्वस्तये
स्वस्तयआदित्यासोभवन्तुनः २

चेतनवत्यौ इत्यर्थः चितीसंज्ञाने वाहुलकादन्यत्राप्युनन्प्रत्ययः ॥१॥

टी० स्वस्तये विनाशराहित्यार्थे स्वस्तिशब्दोऽ नव्ययमपि प्रतिगृह्णामितेधेनुं कुटुंवार्थे विशेषतः स्वस्ति भवतु मे नित्य सुखं चानुत्तमं तथा"इतिभविष्योत्तरपुराणात्॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तुमे इतिश्रीमद्भागवताच्च ॥ वायुं वायुदेवं उपब्रवामहै उपब्रूमः भुवनस्य यः पतिः तं सोमं स्वस्ति स्वस्तये उपब्रवामहै, स्वस्तये बृहस्पतिं उपब्रवामहै कथभूतं बृहस्पतिम् सर्वगणं सर्वे ग णादेवगणा यस्मिन्निति सर्वगणस्तम् देवगुरुत्वात् आदित्यास आदित्याः 'आज्जसे रसुगिति' असुक्॥धात्रादिद्वादशादित्याः नः स्वस्तये भवन्तु ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ विश्वेदेवानोऽअद्यास्वस्तये
वैश्वानरोवसुरग्निःस्वस्तये ॥
देवाअभवन्नृभवःस्वस्तये
स्वस्तिनोरुद्रःपात्व ᳲ हसः॥३॥
ॐ स्वस्तिमित्रावरुणा
स्वस्तिपथ्येरेवति ॥

टी० विश्वेदेवाः सर्वेदेवाः विश्वेदेवसंज्ञका वा अद्या, अद्य संहितायां दीर्घः। नः स्वस्तये भवन्तु वैश्वानरो विश्वेभ्यः सर्वेभ्यो नरेभ्यो मनुष्येभ्यो हितो वैश्वानरः यद्वा विश्वेनरा यस्य स विश्वानरः नरे च संज्ञायामिति विश्वशब्दस्य दीर्घः विश्वानरस्यापत्यं वैश्वानरः ऋष्यण्। वसुः सर्वेषां वासकः अग्निः नः स्वस्तये भवन्तु। ऋभवो देवाः नःस्वस्तये अभवन् भवन्तु। रुद्रः नोऽस्मान् अंहसः पापात् स्वस्ति यथा-स्यात्तथा पातु रक्षतु ॥ ३ ॥

टी० मित्रावरुणा–मित्रश्च वरुणश्च मित्रावरुणौ 'देवता द्वंद्वे इत्यानङ्' नः स्वस्ति कुरुताम् हेपथ्ये रेवति पथः शास्त्रीयात्पथोऽनपेता पथ्या तत्संबुद्धौ हेपथ्ये, "धर्मपथ्यर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्तिनइन्द्रश्चाग्निश्च
स्वस्तिनोऽअदितेकृधि ॥ ४ ॥
ॐ स्वस्तिपन्थामनुचरेम
सूर्याचन्द्रमसाविव ॥

न्यायदनपेते इति यत्। रेवति धनवति हेदेवि त्वं नः स्वस्ति कुरु। रयिर्धनंविद्यते यस्य रेवती। रयिशब्दान्मतुप् "रयेर्मतौ बहुलमिति रयिशब्दस्य मतौ परतः संप्रसारणम्। संप्रसारणाच्चेतिपररूपम्। आद्गुणः छन्दसीर इति वत्वम् इन्द्रश्चाग्निश्च युवाम् नः स्वस्ति कुरुतम्। हेअदिते हेदेवमातः त्वमपि नः स्वस्ति कृधि कुरु। करोतेः शपि लुप्ते श्रुशृणुपृकृवृभ्यश्छन्दसीति हेर्धिः ॥ ४ ॥

टी० स्वस्तिक्षेमेण पन्थां पन्थानं मार्गम्, विभक्तेः पूर्वसवर्णे पन्थामिति रूपम्। अनु अनुश्रित्य चरेम गच्छामः, सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ इव यथा सूर्याचन्द्रमसौ क्षेमेण नभमोमार्गं गच्छतः तथा वयमपि क्षेमेण सन्मार्गं गच्छाम इत्यर्थः। पुनर्वारंवारं ददता दानंकुर्वता घ्नता हन्तिशत्रूनितिघ्नन् तेन घ्नता जानता शास्त्रोपदेशेन ब्रह्मज्ञानं कुर्वता जनेन सह संगमेमहि संगं प्राप्नुयामः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ विश्वेदेवानोऽअद्यास्वस्तये
वैश्वानरोवसुरग्निःस्वस्तये ॥
देवाअवन्त्वृभवःस्वस्तये
स्वस्तिनोरुद्रःपात्व ᳲ हसः॥३॥
ॐ स्वस्ति मित्रावरुणा
स्वस्तिपथ्येरेवति ॥

टी० विश्वेदेवाः सर्वेदेवाः विश्वदेवसंज्ञका वा अद्या, अद्य संहितायां दीर्घः। नः स्वस्तये भवन्तु वैश्वानरो विश्वेभ्यः सर्वेभ्यो नरेभ्यो मनुष्योभ्यो हितो वैश्वानरः यद्वा विश्वेनरा यस्य स विश्वानरः नरे च संज्ञायामिति विश्वशब्दस्य दीर्घः विश्वानरस्यापत्यं वैश्वानरः ऋष्यण्। वसुः सर्वेषां वासकः अग्निः नः स्वस्तये भवन्तु। ऋभवो देवाः नःस्वस्तये अभवन् भवन्तु। रुद्रः नोऽस्मान् अंहसः पापात् स्वस्ति यथास्यात्तथा पातु रक्षतु ॥ ३ ॥

टी० मित्रावरुणा–मित्रश्च वरुणश्च मित्रावरुणौ 'देवता द्वंद्वे इत्यानङ्' नः स्वस्ति कुरुताम् हेपथ्ये रेवति पथः शास्त्रीयात्पथोऽनपेता पथ्या तत्संबुद्धौ हेपथ्ये, "धर्मपथ्यर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्तिनइन्द्रश्चाग्निश्च
स्वस्तिनोऽअदितेकृधि ॥ ४ ॥
ॐ स्वस्तिपन्थामनुचरेम
सूर्याचन्द्रमसाविव ॥

न्यायदनपेते इति यत्। रेवति धनवति हेदेवि त्वं नः स्वस्ति कुरु। रयिर्धनंविद्यते यस्य रेवती। रयिशब्दान्मतुप् "रये र्मतौ बहुलमिति रयिशब्दस्य मतौ परतः संप्रसारणम्। संप्रसारणाच्चेतिपररूपम्। आद्गुणः छन्दसीर इति वत्वम् इन्द्रश्चाग्निश्च युवाम् नः स्वस्ति कुरुतम्। हेअदिते हेदेवमातः त्वमपि नः स्वस्ति कृधि कुरु। करोतेः शपि लुप्ते श्रुशृणुपृकृवृभ्यश्छन्दसीति हेर्धिः ॥ ४ ॥

टी० स्वस्तिक्षेमेण पन्थां पन्थानं मार्गम्, विभक्तेः पूर्वसवर्णे पन्थामिति रूपम्। अनु अनुश्रित्य चरेम गच्छामः, सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ इव यथा सूर्याचन्द्रमसौ क्षेमेण नभमोमार्गं गच्छतः तथा वयमपि क्षेमेण सन्मार्गं गच्छाम इत्यर्थः। पुनर्वारंवारं ददता दानंकुर्वता घ्नता हन्तिशत्रूनितिघ्नन् तेन घ्नता जानता शास्त्रोपदेशेन ब्रह्मज्ञानं कुर्वता जनेन सह संगमेमहि संगं प्राप्नुयामः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनर्ददताघ्नताजा
नतासंगमेमहि ॥५॥

ॐ स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिं
महाद्भुतंवायसंदेवतानाम् ॥
असुरघ्नमिन्द्रसखंसमत्सु
वृहद्यशोनावमिवारुहेम ॥ ६ ॥

टी॰स्वस्ति क्षेममीयते प्राप्यतेऽनेनेति स्वस्त्ययनस्तम् अरिष्टा अनुपहिंसिता नेमिः पक्षो यस्य स अरिष्टनेमिस्तम् देवतानां महाद्भुतं महाश्चर्यरूपम् वायसं दिव्यं सुपर्णम् दिव्यं सुपर्णं वायसं वृहन्तमिति श्रुतेः असुरान् हन्तीति असुरघ्नस्तम् इन्द्रस्य सखा इन्द्रसखस्तम् 'राजाहसखिभ्य-श्च' वृहद्यशो बृहद्यशसम् 'सुपांसुलुगितिलुक्' एतादृशं तार्क्ष्यं तार्क्ष्यस्य कश्यपस्यापत्यम् ऋष्यण् 'गर्गादित्वाद्यञ्' वा समानं माद्यन्ति योधा येषु समदः संग्रामा स्तेषु समत्सु नावमिव आरुहेम संग्रामेषु नावमिव यमाश्रित्य पारं प्राप्नुयामेत्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अं ६ होमुचमाङ्गिरसं गयं च
स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् ॥
प्रयतपाणिः शरणं प्रपद्ये
स्वस्ति संबाधेष्वभयं नोऽअस्तु ७

टी० प्रयतपाणिः संयतपाणिरहम् आङ्गिरसं अङ्गति जानातीति अङ्गिरा मुनिः 'अगिगतौ असुन्नन्तो निपातितः अङ्गिरसोऽपत्यमाङ्गिरसो बृहस्पति स्तम्' ऋष्यन्धकेत्यण्। गयं गयइतिगृहनामेति निघण्टुः३।४।१ पुत्रपशुभूहिरण्यादियुतं महद् गृहम् स्वस्त्यात्रेयं स्वस्त्यात्रेयसंज्ञकमृषिम् स्वर्भानुना हतो दिवाकरो दिवो महीं पतमानोऽपि तमोऽभिभूतं लोकं येन प्रभाकरनाम्नात्रिवंशजेन ऋषिणा प्रभया प्रकाश्य तुभ्यं स्वस्तित्युक्त्वा नपपात, अतः स प्रभाकरः स्वस्त्यात्रेयसंज्ञकोऽभवत्। तस्यपुत्रा अपि स्वस्त्यात्रेयसंज्ञका जाता इति हरिवंशे कथा। तार्क्ष्यं कश्यपपुत्रं गरुडम् अंहोमुचं अमन्ति गच्छन्त्यधस्ताज्जना यै स्तानीति, अंहांसि पापानि दुःखानि वा अमगत्यादौ अमे हुंक्चेति, असुन्हुगागमः। अथवा अंहन्ति गच्छन्त्यधस्ताज्जना यैस्तानीति अंहांसि अहिगतौ असुन्। अंहोभ्यो मुञ्चति पृथक् करोतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशुः शिशानः इति समाप्तं पठेत्

ॐ आशुꣳशिशानोवृषभोनभीमो
घनाघनःक्षोभणश्चर्षणीनाम् ॥
संक्रन्दनोऽनिमषएकवीरः
शतꣳ सेनाअजयत्साकमिन्द्रः १

अंहोमुक् तम् अंहोमुचमिति मनसा शरणं प्रपद्ये शरणं व्रजामि, संबाधेषु समीचीना भीतिजनका विघ्नरूपा बाधा येषु तानि यज्ञादिकर्माणि तेषु संबाधेषु अभयं नविद्यते भयं यस्मा तत् अभयं भयनिवृत्तिपूर्वकम् स्वस्ति सर्वथा-क्षेममङ्गलोदयरूपं स्वस्ति नोऽस्मभ्यमस्तु॥ एते मन्त्राश्च-ञ्जलिं वध्वा पठनीयाः, अस्मिन्नेव समये रेखी इति प्रसिद्धा रङ्गवल्लीरचनम् ॥७॥

टी० अप्रतिरथदृष्टा इन्द्रदेवत्याद्वादश त्रिष्टुभः ॥ इन्द्रः शतं सेनाः शतसंख्यकाः शत्रुसेनाःसाकं सहैव एक-प्रयत्नेनैव अजयत् जयति कीदृशःइन्द्रः आशुः अश्नुतेव्या-प्नोतीति आशुःशीघ्रगामी उण्प्रत्ययः शिशानःशोतनूक रणे वहुलंछन्दसीति, जुहोत्यादित्वाच्छानचि द्वित्वम् श्यति वज्रं तीक्ष्णीकरोतीति शिशानः वृषभोनभीमः वृषभ इव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ संक्रन्दनेनानिमिषेण जिष्णु-
ना युत्कारेणदुश्च्यवनेनधृष्णुना ॥
तदिन्द्रेण जयत तत्सहध्वं
युधोनर इषुहस्तेन वृष्णा ॥ २ ॥

भयंकरः घनाघनः शत्रूणामतिशयेन घातकः हनहनेति वक्ता वा वृष्टिकर्तृमेघरूपोवा वर्षुकाब्दो घनाघनः इत्यभिधानात् चर्षणीनां मनुष्याणां चोभणः चोभयतीति चोभणः चोभहेतुःचालकः संक्रन्दनःसम्यक् क्रन्दनं परभयहेतुः ध्वनिर्यस्यस यद्वा समाह्वाता शत्रूणाम् अनिमिषः नास्ति निमिषोयस्य सः देवत्वात् यद्वा कदाचिदपि निमेषं नकरोति अत्यन्तसावधान इत्यर्थः, एकवीरः एकश्चासौवीरश्च अन्यनिरपेक्षं शत्रूनेक एव जेतुं समर्थः ॥१॥

टी० युध्यन्ते ते युधः क्विप्, पादादावामन्त्रितस्येतिआद्युदात्तः,हेयुधो नरो योद्धारोमनुष्याः इन्द्रेण कृत्वा यूयं तत् परबलं जयत वशीकुरुत वशीकृत्य चतत् सहध्वं अभिभवत विनाशयतेत्यर्थः कीदृशेनेन्द्रेण संक्रन्दनेन शब्दकारिणा अनिमिषेण एकचितेन जिष्णुना जयनशीलेन युत्कारेण युधं करोतीति युत्कारस्तेन कर्मण्यण्, युद्धकारिणा दुश्च्यवनेन दुःखेन च्यावयितुं शक्यः दुश्च्यवनस्तेन अजय्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ सइषुहस्तैः सनिषङ्गिभिर्वशी
सꣳस्रष्टासयुधइन्द्रो गणेन ॥
सꣳसृष्टजित्सोमपाबाहुशर्ध्युग्र
धन्वाप्रतिहिताभिरस्ता ॥३॥

धृष्णुना प्रगल्भेन भीतिरहितेन इषुहस्तेन इषवो हस्ते यस्य तेन वारुणाद्यायुधोपेतेन वृष्णा वर्षतीति वृषा तेन कामानां वर्षुकेण ॥२॥

टी० स इन्द्रोऽस्मानवत्विति शेषः संस्रष्टा रावुल्तृचौः इतितृच् प्रत्ययः, युद्धाय संसर्गकर्ता वशी वशयतिरिपूनिति वशी यद्वा कान्तः जनप्रियः स्वतन्त्रो वा निगृहीतारिषड्वर्गो वा गणेन रिपुसमूहेनापि सहयुधः युध्यतेऽसौ युधः युद्धकर्ता इगुपधज्ञा 'इति कप्रत्ययः' संसृष्टजित् संसृष्टान् युद्धाय संगतान् जयति संसृष्टजित् सोमपाः सोमं पिबतीति यजमानानां यागेषु सोमपानकर्ता बाहुशर्धी बाह्वोः शर्धो बलं यस्यास्तीति बाहुशर्धी बाहुबलोपेतः संयोगिनिरपेक्ष इत्यर्थः शर्धइति बलनाम उग्रधन्वा उग्रमुत्कृष्टं धनुर्यस्यसः, धनुषश्चेत्यनङादेशः, प्रतिहिताभिरस्तास्वेन धनुषा प्रेरिताभिरिषुभिरस्ता क्षेप्ता असुक्षेपणे तृन्, आद्युदात्तत्वात् अस्यतीत्येवं शीलः रिपुनाशयितेत्यर्थः सशब्दावृत्तिः पादपूरणार्था ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ बृहस्पते परिदीया रथेन
रक्षोहा मित्राँ अपबाधमानाः ॥
प्रभञ्जन् सेनाः प्रमृणो युधा
जयन्नस्माकमेध्यविता रथानाम् ॥४॥

टी० बृहस्पतिरिन्द्रः वाग्वैबृहती तस्या एष पतिः व्याकरणकर्तृत्वात् इन्द्रस्य वाक्पतित्वम् इन्द्रस्य पुरोहितत्वेन वा बृहस्पतिरेव स्तूयते हेबृहस्पते त्वं रथेन परिदीया सर्वतोगच्छ दीयतिर्गत्यर्थः गत्वा चास्माकं रथानामस्मदीयस्यन्दनानामविता रक्षक एधि भव कीदृशस्त्वम् रक्षोहा रक्षांसि हन्तीति रक्षोहा क्विप् रक्षसां हन्ता अमित्रान् शत्रूनपबाधमानः पीडयन् सेनाः परकीयाः प्रभञ्जन् प्रकर्षेण भग्नाः कुर्वन् युधा युद्धेन प्रमृणः जयन मृणातिर्हिंसाकर्मा तस्य क्विपि द्वितीया बहुवचनम् प्रमृणोर्हिंसकान् जयन् पराभवन् ॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ बलविज्ञाय स्थविरः प्रवीरः
सहस्वान्वाजी सहमान उग्रः ॥
अभिवीरोऽअभिसत्वा सहोजा
जैत्रमिन्द्र रथमातिष्ठगोवित् ॥५॥

टी०हेइन्द्र त्वं जैत्रं जयनशीलं रथमातिष्ट आरोह कीदश-स्त्वम् बलविज्ञाय बलं परकीयं विशेषेण जानाति बलविज्ञायः कर्मण्यण् आतोयुक्चिण्कृतोः यद्वा बलेनकृत्वा विज्ञायते करणे घञ् स्थविरः पुरातनः सर्वानुशासकः प्रवीरः प्रकृष्टो-वीरः शूरः सहस्वान् सहोवलं यस्यास्तीति सहस्वान् वाजोऽ स्यास्तीतिवाजी अन्नवान् सहमानः शत्रूनभिभवन् उग्रः यु-द्धेषु क्रूरः अभिवीरः अभितोवीराः शूरा यस्यः अभिसत्वा अभितः सत्वानः परिचारकाः प्राणिनोयस्य सोऽभिसत्वः सहसोवलाज्ञातः सहोजाः नह्यन्यस्माज्ञात ईदृग्वलः स्यात् गां स्तुतिं गिरं वेत्ति गोवित् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ गोत्रभिदं गोविदं वज्रवाहुं
जयन्तमज्म प्रमृणन्तमोजसा ॥
इम ँ सजाता अनुवीरयध्व
मिन्द्र ँ सखा यो अनुस ँ रभध्वम् ६

टी०हेसंजाताः समानं जातं जन्म येषान्ते समानजन्मानः सखायोदेवाः इममिन्द्रमनुवीरयध्वम् शूरवीरविक्रान्तौ अदन्तश्चुरादिः लोट् वीरकर्म कुर्वाणमनुगम्य वीरकर्मणा प्रोत्साहयत अनुसंरभध्वम् संरंभं वेगं कुर्वाणमनुसंरंभं कुरुत कीदृशमिन्द्रम् गोत्रभिदं गोत्रमसुरकुलं भिनत्ति गोत्रभित्तम् यद्वा गाः अपः त्रायते गोत्रोमेघः तस्य भेत्तारम् गोविदं गां वाचं वेत्तीतिगोवित् तं पण्डितम् वज्रबाहुं वज्रं बाहौ यस्य तम् अज्म संग्रामं जयन्तम् अज्मेति युद्धनाम अजतेर्गत्यर्थस्य ओजसा बलेन प्रमृणन्तम् शत्रून् हिंसन्तम् मृणातिर्हिंसाकर्मा ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐअभिगोत्राणि सहसा गाहमा
नोदयोवीरः शतमन्युरिन्द्रः ॥
दुश्च्यवनः पृतनाषाड़युध्योऽ
स्माकꣳसेना अवतु प्रयुत्सु ॥७॥
ॐइन्द्र आसां नेता बृहस्पति
र्दक्षिणा यज्ञः पुरएतु सोमः ॥

टी० इन्द्रः युत्सु युद्धेषु अस्माकं सेनाः प्रावतु प्रकर्षेण रक्षतु छन्दसि परेऽपि इत्युपसर्गस्य क्रियापदात् परप्रयोगः कीदृश इन्द्रः गोत्राणि असुरकुलानि मेघवृन्दानि वा अभिगाहमानः सर्वतोविलोडयन् अदयः दयारहितः वीरः विक्रान्तः शतमन्युः शतसंख्योमन्युः क्रोधोयस्य शतयज्ञोवा दुश्च्यवनः अप्रच्याव्यः पृतनां संग्रामं सहते अभिभवतीति पृतनाषाट् अयुध्यः योद्धुमशक्यः नास्ति युध्यः प्रतियोधास्येतिवा ॥७॥

टी० इन्द्रः बृहस्पतिश्च आसां देवसेनानां नेता प्रणेता भवत्विति शेषः यज्ञः यज्ञपुरुषोविष्णुर्दक्षिणा दक्षिणत एतु गच्छतु दक्षिणादाच् प्रत्ययः सोमः पुरोऽग्रे एतु मरुतोग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दैवसेनानामभिभंजतीनां
जयन्तीनां मरुतोयन्त्वग्रम् ॥८॥
ॐइन्द्रस्य वृष्णोवरुणस्य राज्ञो
आदित्यानां मरुता ᳖ंशर्ध उग्रम् ॥
महामनसां भुवनच्यवानां
घोषोदेवानां जयतामुदस्थात् ॥६॥

णदेवा अग्रं सेनाग्रभागं यन्तु गच्छन्तु कीदृशीनां देवसेनानाम् अभिभञ्जतीनाम् भञ्जोआमर्दने शत्रून्मर्दयन्तीनाम् तथा जयन्तीनां विजयमानानाम् ॥८॥

टी० वृष्णः कामवर्षितुरिन्द्रस्य राज्ञोवरुणस्य आदित्यानां द्वादशानां मरुतां चैषां देवानां उग्रं उत्कृष्टं शर्धोबलं गजतुरगरथपन्त्यात्मकं सैन्यं घोषोजितं जितमितिशब्दश्च उदस्थात उत्थितः जितं जितमितिवददिन्द्रादिसैन्यमुत्थितमित्यर्थः कीदृशानां देवानाम् महामनसां महन्मनोयेषान्ते महामनसस्तेषाम् युद्धे स्थिरचित्तानाम् तथाभुवनच्यवानां भुवनं लोकं च्यावयन्तिते भुवनच्यवास्तेषांभुवनच्यवनसमर्थानाम् जयतां विजयमानानाम् ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ उद्धर्षय मघवन्नायुधान्यु-
त्सत्वनां मामकानां मनाᳪसि ॥
उद्वृत्रहन्वाजिनां वाजिना
न्युद्रथानां जयतां यन्तु घोषाः॥१०॥
ॐ अस्माकमिन्द्रः समृजेषु ध्वजे-
ष्वस्माकं या इषवस्ता जयन्तु ॥

टी० हे मघवन् धनवनिन्द्र आयुधानि उद्धर्षय उद्भूत-हर्षाणि कुरु मामकानां सत्वनां प्राणिनां मनांसि च उद्धर्षय हर्षयुक्तान् कुरु हे वृत्रहन् हे वैरिघातिन् वाजिनामश्वानां वाजिनानि शीघ्रगमनानि उद्धर्षय उत्कृष्टानि कुरु किञ्च जयतां विजयमानानां रथानां घोषाः शब्दाः उद्यन्तु उद्गच्छन्तु रथाः सशब्दाः प्रसरन्तु ॥१०॥

टी० ध्वजेषु समृजेषु ऋजगतौ संगतेषु शत्रुध्वजैः संयुक्तेषु सत्सु इन्द्रः अस्माकं रक्षिता भवत्विति शेषः तदा नोऽस्माकं या इषवोऽस्मदीयैः प्रयुक्तास्ता जयन्तु परसैन्यानि घ्नन्तु अस्माकं ये वीराः शूरास्ते उत्तरे परकीयभटेभ्य उत्कृष्टा भवन्तु उ अपिच हे देवाः हवेषु अस्मान् यूयमवत रक्षत अन्येषामपिदृश्यते इति दीर्घः ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्माकं वीरा उत्तरे भव·
न्त्वस्माँ२ उदेवा अवता हवेषु ॥११॥
ॐ अमीषां चित्तं प्रतिलोभयन्ती
गृहाणाङ्गान्यप्वे परेहि ॥
अभिप्रेहि निर्दह हृत्सु शोकै
रन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

टी० अप्वादेवता साव्याधिर्भयं वा तस्मादेतया विद्धोऽपचीयते तस्मादप्वा अपपूर्वाद्वातेरन्तर्भूतण्यर्थात् अन्येभ्योऽपिदृश्यते इति डप्रत्ययः अपशब्दान्त्याकारलोपश्छान्दसः ततष्टाप् अपवाति अपगमयति सुखं प्राणांश्चेत्यप्वा ऐन्द्रोऽभिरुपा द्वादश भवन्ति इतिश्रुतेः इयमपीन्द्रसेनासंबन्धिनी हेऽप्वे अमीषां शत्रूणां चित्तं चित्तानि प्रतिलोभयन्ती मोहयन्ती अङ्गानि शत्रुगात्राणि गृह्णाना ततः परेहि अङ्गान्यादाय परागच्छ पुनरन्यान् रिपून् गृहीतुमभिशत्रुसंघं प्रेहि प्रगच्छ तेषां हृत्सु हृदयानि शोकैर्धनपुत्रनाशादिनिमित्तैर्निर्दह विभक्तिव्यत्ययः किञ्च अमित्राः शत्रवोऽन्धेन तमसा गाढान्धकारेण सचन्तां संगच्छन्ताम् षचसंबन्धे लोट् द्वादशैन्द्रः समाप्तः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाष्टदिक्षु पूर्वादि क्रमेण पूजनम् ।। पृथिव्याः सधस्थादिति पूर्वे ।।

ॐ पृथिव्याः सधस्थादग्निपुरिष्यमङ्गिरस्व दच्छेमोऽग्निंपुरीष्यमङ्गिरस्वद्भरिस्यामः।।१।।

टी० हेऋत्विक् पृथिव्याः यज्ञभूम्याः सधस्थात् पूर्व दिग्भागात् इन्द्रः सह तिष्ठति यस्मिन्निति सधस्थः तस्मात् सुपिस्थ इति क प्रत्ययः आतोलोप इति आलोपः सधमास्थयोश्छन्दसीति सहस्य सधादेशः पुरीष्यं पशव्यमग्निमङ्गिरस्वदङ्गिरसइवाभर आहर पशवो वैपुरीषमिति श्रुतेः पुरीषेभ्यः पशुभ्यो हितः पुरीष्य स्तं पशव्यम् यद्वा पुरीषशब्देन पांसुरूपा शुष्का मृदुच्यते तदर्हतीति पुरिष्योऽग्निः अङ्गिरोभि स्तुल्यमङ्गिरोवदिति प्राप्ते अयस्मयादीनिछन्दसीतिभसंज्ञायामङ्गिरस्वदिति रुत्वाभावः आभर हृग्रहोर्भश्छन्दसि ति हस्यभः पुरिष्यं पशव्यमग्निमङ्गिरस इव वयमच्छेमः अच्छ अभिमुखमिमः गच्छामः अच्छाभेराप्तुमितिशाकपुणिरितियास्कः पशव्यमग्निमङ्गिरस इव वयं पूर्वदिग्भागेपूजनेन भरिष्याम; संपादयिष्यामः ।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निश्चेतिदक्षिणे

ॐ अग्निश्चपृथिवी च सन्नतेतेमेसन्नमतामदो वायुश्चान्तरिक्षञ्चसन्नतेतेमेसंनमतामद आदित्यश्च द्यौश्चसंनतेतेमेसंनमतामद आपश्च वरुणश्चसंनतेतेमेसंनमतामदः सप्तस ६ सदोऽष्टमी भूतसाधनी सकामाँ२ अध्वरकुरुसंज्ञानमस्तुमेऽमुना ॥२॥

टी० अग्निश्चपृथिवीचेति सप्तलिङ्गोक्तानि यजूंषि सप्तसंसदः आसुर्यनुष्टुप् सकामान् प्राजापत्या नुष्टुप् अग्निश्च पृथिवी च संनते संनमनं संनतं आनुकूल्येन प्रवृत्तिः अग्निपृथिव्यौ संभोगाय संगते अतो ब्रवीमि ते अग्निपृथिव्यौ मे मम अदः अमुकं संनमतां संनमयतां वशवर्त्तिनं कुरुतामित्यर्थः अद इतिपुरुषादे र्नाम द्वितीयान्तं प्रयोज्यम् छन्दस्युभयथा इति शपोऽ प्यार्धधातुकत्वात् णेरनिटि इति णिचो लोपः संनमतामित्यत्र एवमुत्तरेष्वपि मन्त्रेषु योज्यम् वायुरन्तरिक्षञ्च संनते ते ममामुकंसंनम-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यताम् आदित्यश्चद्यौश्च संनते ते ममामुकं संनमयताम् आपश्चवरुणश्च संनते ते ममामुकं संनमयताम् परमात्मानं प्रत्युच्यते हेस्वामिन् यस्य तव सप्तसंसदः संसदनानि अधिष्ठानानि अग्निवाय्वन्तरित्तादित्यद्युलोकाम्बुवरुणाख्यानि तत्राष्टमी भूतसाधनी पृथ्वी भूतानि साधयति उत्पादयतीति भूतसाधनी भूमिं विना भूतोत्पत्तेरभावात् अतः सर्वाधिष्ठानभूत स्त्वं अध्वनः मार्गान् सकामान् कुरु येषु मार्गेषु मया गम्यते यज्ञभूमे दक्षिणदिग्भागे पूजनेन तत्रास्माकं कामप्राप्तिरस्त्वित्यर्थः किञ्च मे ममामुना देवदत्तादिना संज्ञानं संगतं ज्ञानमस्तु इष्टेन मम प्रीतिरस्तु विज्ञानात्मावोच्यते यस्य तव सप्तसंसदः पञ्चबुद्धीन्द्रियाणि मनोबुद्धिश्चेति सप्तायतनानि अष्टमी भूतसाधनी भूतानि साधयति वशीकरोतीति भूतसाधनी वाक् स त्वं नोऽस्माकमध्वनः समाकान् कुरु अमुना सह मे संज्ञानं संगतमस्तु ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वायोयेतइति पश्चिमे
वायोयेतेसहस्रिणोरथासस्तेभिरागहि
नियुत्वान्सोमपीतये ॥ ३ ॥
सोमोधेनुमित्युत्तरे
सोमोधेनुꣳसोमोऽअर्वन्तमाशु
ꣳसोमोवीरंकर्मण्यं ददाति ॥

टी० वायो ये ते इति हेवायो ये ते तव सहस्रिणः सहस्रसंख्याका रथासः रथाः सन्ति तेभि स्तैःबहुलं छन्दसीति एसोऽ भावे बहुवचने झल्येदितिएकार आगहि पश्चिमदिश्भागे पूजनेन आगच्छ सोमपानाय कीदृशस्त्वम् नियुत्वान् अश्वायुक्तः नियुतो वायोरितिनिघण्टूक्तेः ॥३॥

टी० सोमोधेनुमिति योयजमानोऽस्मै सोमाय ददाश्त् यज्ञभूमेरुत्तरदिग्भागे पूजां ददाति तस्मै सोमोधेनुं ददाति आशुं शीघ्रमर्वन्तमश्वं च सोमोददाति सोमश्च तस्मै वीरं पुत्रं ददाति कीदृशं वीरम् कर्मण्यं कर्मणि साधुम् सादन्यं सदने गृहे साधुम् विदथ्यं विदथोयज्ञस्तत्र साधुम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सादन्यं विदथ्यं सभेयं
पितृश्रवणं योददाशदस्मै ॥४॥
अग्निन्दूतमित्याग्नये
ॐअग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे
देवाँ२ आसादयादिह ॥५॥

सभेयं सभामर्हति सभेयस्तम् पितृश्रवणं पितरं शृणोति पितृश्रवणस्तम् पित्राज्ञाकारिणम् विनितमित्यर्थः कर्मण्यमित्यादौ तत्र साधुरिति यत् सभेयं ढश्छन्दसीति सभायाः साध्वर्थे ढप्रत्ययः तस्येयादेशः ददाशत् दाशृदाने बहुलंछन्दसीतिशपः श्लुः द्वित्वम् इतश्चलोपः परस्मै पदेषु इति तिप इलोपः लेटोऽडाटौ इत्यडागमः ॥ ४ ॥

टी० अग्निं दूतमिति यमग्निमहं पुरोदधे पुरतः स्थापयामि तं प्रति उपब्रुवे कथयामि किं तदाह हेऽग्ने इह यज्ञे त्वं देवान् आसादयात् आसादय स्थापय देवानित्यस्य नकारस्य संहितायां दीर्घादटि इति रुत्वम् अत्रानुनासिक इत्यनुवृत्तौ आटोऽटिनित्यमित्याकारः सानुनासिकः सोभगो इति रोर्यकारः स च लोपःशाकल्यस्येति लुप्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कयानश्चित्र इति नैर्ऋत्याम्

ॐ कयानश्चित्रआभुवदूतीसदा

वृधःसखा कयाशचिष्ठया वृता ॥६॥

नदसिद्धत्वान्न पुनः सन्धिकार्यम् कीदृशमग्निम् दूतं देवानाम् हव्यवाहं हव्यं वहतीति हव्यवाट् तम् हविषां वोढारम् वहश्चेति ण्विप्रत्ययः ॥५॥

टी० कयानश्चित्र इति निर्ऋतिः स्यादलक्ष्मी स्त्री दीशां पालान्तरे पुमानिति कोपान्तरात् दिक्पतित्वे निर्ऋतिशब्दः पुंलिङ्गोवर्तते निर्ऋतिर्देवः कया ऊती ऊत्या अवनेन तर्पणेन प्रीणनेन वा नोऽस्माकं सखा सहाय आभुवत् आभिमुख्येन भवति अवरक्षणादाविति धातोः ऊतियूति जूतिसातिहेतिकीर्तयश्चेति क्तिन्प्रत्ययान्तोनिपात्यते ज्वरत्वरेत्यूठ् तृतीयस्यैकवचनस्य सुपांसुलुगिति पूर्वसवर्णदीर्घः तथा वृता वर्त्तते इति वृत् तया वृता वर्त्तमानया शचिष्ठया अतिशयेन शची शचिष्ठा तया अतिशयवत्या यागक्रियचास्माकं सखा भवति शचीति कर्मनाम तत इष्ठन्प्रत्ययः कीदृशोनिर्ऋतिर्देवः चित्रः पूज्यो वा सदावृधः सदा वर्धते इति सदावृधः इगुपधेति कप्रत्ययः सदावर्धमानः आभुवत् इतश्चलोपपरस्मैपदेषु इति इलोपः शपश्छान्दसे ङित्वे धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वायुरनिलमिति वायव्ये
ॐ वायुरनिलममृतमथेदं
भस्मान्त ँ शरीरम् ॥
ॐ क्रतोस्मर क्लिवे
स्मर कृत ँ स्मर ॥७॥

तोरुवडादेशः ॥६॥

टी० वायुरनिलमितिवायुः मम प्राणवायुः अमृतममरणकं अनिलं वायव्यदिक्पालकं वाह्यवायुम् यज्ञभूम्या वायव्यदिग्भागे पूजनेन प्रतिपाद्यताम् इति वाक्यशेषः अथ इदं स्थूलशरीरमग्नौ हुतं सत भस्मान्तं भस्मरूपं भूयात् भस्म अन्तः स्वरूपं यस्य तत् कृतप्रयोजनत्वात् ओमिति ब्रह्मणोनाम हेक्रतो यज्ञरूप हेओम् स्मर यस्त्वं ब्रह्मचर्ये गार्हस्त्ये च मया परिचरितस्तत्स्मर क्लिवे स्मर कल्प्यते भोगायेति क्लिप् लोकः तस्मै स्मर जशादेश आर्षः छन्दस्युभयथा इतिपदान्तत्वात् मयास्मै अयं लोकोदातव्यस्तस्मै क्लृप्ताय लोकाय स्मर यन्मया वाल्यप्रभृति अनुष्ठितं कर्म तच्च स्मर स्मरेत्यस्यावृत्ति रादरार्था ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईशावास्यमित्यैशान्याम्

ॐ ईशावास्यमिद ँ सर्वं
यत्किञ्च जगत्यां जगत्
तेन त्यक्तेन भुञ्जीथा
मागृधः कस्यस्विद्धनम् ॥८॥

टी० ईशा ईशानदिक्पालकेनेशानदेवेन जगत्यां ब्रह्माण्डे यत्किञ्च इदं सर्वं जगत् वास्यम् वस आच्छादने ऋहलोर्ण्यत् इतिण्यत्प्रत्ययः आच्छादनीयं परमार्थसत्यरूपेणात्मना सर्वमिदमनृतमाच्छादनीयम् यज्ञभूम्या ईशान दिग्भागे पूजितेन तेन ईशानदेवेन त्यक्तेन दत्तेन धनादिना भुञ्जीथाः भोगान् अनुभवेः मागृधः गृधु अभिकाङ्क्षायाम् आकांक्षां माकृथाः ममेदमिति धियं त्यजेत्यर्थः किमिति स्विदिति निपाते वितर्के धनं कस्य स्वित् नकस्यापीत्यर्थः सर्वाणि द्रव्याण्यन्योन्यमुपगच्छन्ति दृश्यन्ते अतोममेदमितिबुद्धिरविद्या तां त्यजतोयोगेधिकार इत्यर्थः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तस्याग्निर्मध्ये

ॐ सूर्यरश्मिर्हरीकेशः पुरस्ता-
त्सविता ज्योतिरुदयाँ२॥ अजस्रम् ॥
तस्य पूषा प्रसवे याति विद्वा-
न्संपश्यन्विश्वा भुवनानि गोपाः ६

टी० सूर्यरश्मिरिति अग्निर्देवता त्रिष्टुप् ज्योतिर्ज्योतीरूपोऽग्निः अजस्रं निरन्तरं प्रत्यहम् पुरस्तात् पूर्वस्यां दिशि आहवनीयरूपेण होमार्थमुदयान् उद्गच्छति उत्पूर्वस्य यातेर्लङि प्रथमाबहुवचने नोरुआदेशाभावे रूपम् वचनव्यत्ययः छन्दसिलुङ् लङ्लिट इतिलङ् कीदृशोऽग्निः सूर्यस्येवरश्मयः किरणा यस्य सः यद्वा सूर्यश्चासौ रश्मिश्च सूर्यरूपस्तद्रश्मि रूपश्चेत्यर्थः हरिकेशः हरतिदारिद्र्यमिति हरि हिरण्यम् हिरण्यवर्णाः केशाः केशस्थानीया ज्वाला यस्य सः सविता प्राणिनां तत्तद्व्यापारेषु प्रेरकः तस्येदृशस्याग्नेः प्रसवे आज्ञायां पूषा पोषकः सूर्यः याति उदयास्तमनद्वारेणाटति कीदृशः पूषा विद्वान् स्वाधिकारमहोरात्रवर्त्तनात्मकं जानन् विश्वा विश्वानि भुवनानि भूतजातानि संपश्यन् सर्वान् लोकान् सम्यगवलोकयन् गोपाः गोपायतीति गोपाः रक्षकोधर्मस्य ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजापते न त्वदेतान्यो विश्वा
रूपाणि परिताबभूव ॥
यत्कामास्ते जुहुमस्तन्नोऽअस्तु
वय ँ स्याम पतयो रयीणाम्॥१०
ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य
काम्यम् सनिं मेधामयासिष ँस्वाहा११

टी० प्रजापतेनेति प्रजपतिर्देवत्या त्रिष्टुप् हेप्रजापते त्वत् त्वत्तः अन्यो देवताविशेषः ता तानि एतानि विश्वा विश्वानि सर्वाणि रूपाणि नानाजातीयानि वर्त्तमानभूतभविष्यत्काल विषयाणि न परिबभूव परिभवितुं समर्थो नाभूत्, परिभवः सृष्टेरप्युपलक्षणम्, त्वदन्योदेव एतानि भूतानि स्रष्टुं संहर्तुं चाप्यशक्त इत्यर्थः, अतो वयं यत्कामास्ते जुहुमः यः कामो येषान्ते यत्कामाः येन कामेन त्वां जुहुमः तत्कामरूपं फलं नोऽस्माकमस्तु, सर्वथा सपुत्रा वयं रयीणां धनानां पतयःस्याम भवेम ॥ १० ॥

टी० सदसस्पतिमिति अग्निं सनिं द्रव्यदानं मेधां बुद्धिं च अयासिषं याचे द्विकर्मकः, कीदृशमग्निम् सदसः यज्ञगृहस्य पतिं पालकम् अद्भुतमचिन्त्यशक्तिम् इन्द्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्त्वासत्य इति इन्धनं शोधयेत्
ॐ कस्त्वा सत्योमदानां मꣳहिष्टो
मत्सदन्धसः दृढाचिदारुजे वसु ॥१२॥

प्रियं मित्रं काम्यं कामनीयं धनमेधासुतार्थिभिः ॥ ११ ॥

टी० कस्त्वा सत्य इति-हेअग्ने अन्धस इन्धनलक्षणस्य सत्यः अवितथः कः अंशः त्वा त्वां मत्सत् माद्यति मत्तं करोति हर्षं करोति प्रज्वालयतीति यावत् मदी हर्षे लेटोऽडाटौ इत्यडागमः,सिब्बहुलं लेटि इति सिप् प्रत्ययः, तिप इलोपः, कीदृशः मदानां मंहिष्टः मदयन्ति तानि मदानि पचाद्यच्, मदजनकानि हर्षजनकानि इन्धनानि तेषां मध्ये मंहिष्टः श्रेष्टः अत्यन्तहर्षजनकः,महि कान्तौ चुरादिः मंहयति द्योतते मंही अत्यन्तं मंही मंहिष्टः,यद्वा महि वृद्धौ भ्वादिः, मंहते वर्धते मही अत्यन्तं मंही मंहिष्ठः, येनांशेन मत्तः सन् दृढाचित् दृढ़ान्यपि वसु वसूनि धनानि कनकादीनि त्वमारुरुजे, रुजोभङ्गे पुरुषपदव्यत्ययः, आरुजसि चूर्णयसि दातुं भनक्षि, यथा यजमानः शोधितानि दारूणि भङ्क्त्वा भङ्क्त्वा त्वां दातुमिच्छति त्वमपि वसूनि भङ्क्त्वा भङ्क्त्वा ददासीत्यर्थः, इन्धनलक्षणमुक्तं स्मृत्यर्थसारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पलाशखदिराश्वत्थशम्युदुंवरजा समित् ॥
अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः॥१॥
सत्वचः समिधः कार्याः ऋजुश्लक्ष्णाः समास्तथा ॥
शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तुवा२
आर्द्राःपक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः ॥
अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः ३
ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥
यद्वा समित्पवित्रं वेदिश्च त्रयः प्रादेशसंमिताः॥४
इध्मस्तु द्विगुणः कार्यः त्रिगुणः परिधिः स्मृतः ॥
यज्ञिया वृक्षाः वायुपुराणे-पलाशफल्गुन्यग्रोधाः प्लक्षाश्वत्थ-
विकंकताः॥५॥उदुंवरस्तथाबिल्वश्चन्दनोयज्ञिया श्च ये ॥
सरलोदेवदारुश्च शालश्च खदिरस्तथा ॥ ६ ॥
समिदर्थे प्रशस्ताः स्युरेते वृक्षा विशेषतः ॥
मित्रपरिशिष्टे चिन्दुकधवलाम्रनिंवराजवृक्षशाल्मल्यरत्नकपि-
त्थकोविदारविभीतकश्लेष्मान्तकसर्वकएटकवृक्षविवर्जितम्
इति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वामिद्धीति दारुकं स्थापयेत
ॐ त्वामिद्धि हवामहे सातौ वाजस्य कारवः
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठात्सर्वतः १३
अग्नावग्निश्चेति अग्निंशोधयेत्

टी०दारुस्थापनप्रकारो यथा ॥ पञ्च त्रीणि तथा त्रीणि पुनः पञ्च तथैवतु ॥ पञ्चसंख्याकानि त्रिवारम् पंचचसंख्साकानि एकवारम् एवञ्च ऊनत्रिंशत्संख्याकानि दारूणि भवन्ति ॥ त्वामिद्धीति -हेदारुविशेषकारवः कर्त्तारो यज्ञानाम् नरः ऋत्विजो वयम् त्वामेव वेद्यां स्थापनार्थम् हवामहे आह्वयामः इत् एवार्थे हि निश्चयेन किंनिमित्तम् वाजस्य अन्नस्य सातौ लाभनिमित्तम् वृत्रेषु शत्रुषु शत्रुघातनिमित्तम् काष्ठासु दिक्षु दिग्विजयनिमित्तम् कीदृशम् त्वाम् सत्पतिं सतां पालयितारम् श्रुतिस्मृत्युक्ताचाररता निषिद्धत्यागिनः सन्तः कथ्यन्ते, तथा अर्वतः अश्वप्राप्तिनिमित्तञ्च विभक्तिव्यत्ययः त्वां शब्दावृत्तिरादरार्था ॥१३॥

मन्थन विधिना समुत्पन्नमग्निं अग्नावग्निरितिमन्त्रेण शोधयेत्, अरणिमन्थनविधिर्यथा:—आदौ अरणिलक्षणमुच्यते अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ॥ तस्य या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राङ्मुखी शाखा उदीची चोर्द्ध्वगापि वा ॥ अरणिस्तन्मयी ज्ञेया तन्मध्ये चोत्तरारणिः ॥ सारवद्दारवञ्चात्र मोविली च प्रशस्यते ॥संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते॥ अलाभेत्वशमीगर्भादाहरेदविलंवितः ॥ आहरेत्तु शमीगर्भा द्धरेदेवाविलंवितः ॥ चतुर्विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला॥ चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥ मूलादष्टाङ्गुलं त्यक्त्वा अग्राश्च द्वादशाङ्गुलम् ॥ अन्तरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः॥मूर्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी॥अङ्गुष्टमात्राण्येतानि द्व्यङ्गुष्टं वक्ष उच्यते॥ अङ्गुष्टमात्रं हृदयं त्र्यङ्गुष्टमुदरं तथा एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥ ऊरू जंघे च पादौ च चतुस्त्र्यैकैर्यथाक्रमम् ॥ अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः ॥ यत्तद्गुह्यमितिप्रोक्तं देवयोनिः स उच्यते ॥ तस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥ प्रमन्थे मन्थने ह्येष नियमो नोत्तरेषु च॥अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद्द्वादशाङ्गुलम् ॥ ओविली द्वादशैवस्यादेतन्मन्थनयन्त्रकम् ॥ गोबालैः शणसंमिश्रैस्त्रिवृद्दममलात्मकम्॥ व्यामप्रमाणं नेत्रं स्यात्तेन मथ्यो हुताशनः ॥ चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः ॥ इत्युक्तलक्षणमरण्यादिकं संपाद्य उक्तकाले माघादिपञ्चमासानामन्यतमे मासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्तिकारोहिणीमृगशिरः फाल्गुनीद्वयहस्तानामृक्षाणामन्यतमर्क्षान्वितायां शुभतिथौ चन्द्रशुद्धौ गृह्याग्निमादधीत, मुख्यकालातिक्रमे तु एतावान्विशेषः ॥ वासःपरिधानानि कृत्वा शालायां यजमान उपविशति तस्य दक्षिणाङ्गे पत्नी अथ ब्रह्मा अरणी आदाय अधरारणिं पत्न्यै उत्तरारणिं यजमानाय दद्यात् तौ च इमे अरणी आवाभ्यां परिगृहीते· तत्रेयमधरा इयमुत्तरा इदं चात्रं इयमोविली इमानि स्रुवादीनि पात्राणि परिगृहीतानि इति परिगृह्णीत, ततोऽग्न्याधानदेशे शंकुं द्वादशाङ्गुलं खादिरं चतुरङ्गुलमस्तकं निखाय तत्र रज्जुपाशं क्षिप्त्वा आमुच्य सार्धत्रयोदशाङ्गुलरज्जुं शंक्वन्तराले संवेष्ट्य प्रदक्षिणपरिभ्रामणेन परिलिख्य तत्र परिसमूहनादि पञ्चभूसंस्कारान्कृत्वा आच्छाद्य मन्थनमारभेत॥तद्यथा-प्राग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तत्र अग्नेर्जनित्रमिति मन्त्रेण मन्थनशकलं निधाय ॐअग्नेर्जनित्रमसि हेशकल त्वमग्नेर्जनित्रं जननाधारभूतमसि जायतेऽस्मिन्निति जनित्रम् वृषणावितिमन्त्रेण कुशतरुणे तस्मिन्मथनशकले करोति,ॐवृषणौस्थः हेदर्भौ युवां वृषणौ सेक्तारौ स्थः भवथः वर्षत इति वृषणौ कनिन्प्रत्ययः, यथा पुत्रजननाय स्त्रीपुरुषौ वीर्यस्य सेक्तारौ तद्वद्युवामप्परण्योरग्निजननसामर्थ्यसंपादकावित्यर्थः, उर्वशीति मन्थनशकल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थापितयोरुदग्राग्रमधरारणिं निदध्यात्, ॐउर्वश्यसि हेऽध:-
शारणे त्वं उर्वशी असि यथोर्वशी पुरूरवसो नृपस्य भोगाया-
धस्ताच्छेते तद्वत्त्वमधोऽवस्थिताऽसीत्यर्थः, आयुरसीति उ-
त्तरारण्याज्यस्थालीं स्पृशेत्, ॐआयुरसि हेस्थालीगताज्य
त्वमायुरसि अरणिद्वयेन जनिष्यमाणस्याग्नेरायु:प्रदं भवसि,
पुरूरवा इति अधारणेरभिमुखी मुत्तरारणिं निदध्यात्,
ॐपुरूरवा असि हेउत्तरारणे त्वं पुरूरवा असि यथा पुरू-
रवा नृप उर्वश्या अभिमुख उपरि वर्त्तते तथा त्वमपीत्यर्थः,
उर्वश्यादिमन्त्रत्रयं श्रुत्या व्याख्यातम्, उर्वशी वा अप्सराः
पुरूरवा पतिरथ यत्तस्मान्मिथुनादजायत तदायुरिति अध-
रारण्यां उक्तलक्षणमन्थनप्रदेशे प्रमन्थमूलं निधाय चात्रा-
ग्रे चौविली मुदग्रां च नेत्रेण चात्रं त्रिर्वेष्टयित्वा गाढं धृत्वा
पश्चिमाभिमुखोपविष्टश्च पत्न्या सह गायत्रेण त्वा त्रैष्टु-
भेन त्वा जागतेन त्वेति मन्त्रत्रयेण मन्थनं कुर्यात्
यावदग्नेरुत्पत्तिः पत्न्या मन्थनासामर्थ्ये अन्ये ब्राह्मणा
शुचयो मन्थयन्ति, ॐगायत्रेण त्वा छन्दसा मन्थामि त्रैष्टु-
भेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि,
हेऽग्ने गायत्रेण छन्दसा गायत्रीछन्दोऽभिमानिना देवे-
नाहं त्वा त्वां मन्थामि अरण्योर्मन्थनेनोत्पादयामि॥एवमु-
त्तरावपिमन्त्रौ योज्यौ, एवं यजमानासामर्थ्ये अन्योयन्त्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारयति, ततोजातमग्निं मृण्मये पात्रे शुष्कगोमयपिण्ड-चूर्णोपरि निहिततूले सपुरीषं परिक्षिप्य सन्धुक्ष्य प्रज्वाल्य अग्नावग्निरिमन्त्रेणशोधयेदिति ॥ यदि मन्थेच्छिरस्यग्निं शिरोरोगैः प्रमीयते ॥ यजमानस्तथा कण्ठे ह्यंशे चैव विशेषतः ॥ मन्थेद्योयजमानस्तु पक्षहीनोभवेद् ध्रुवम् ॥ यो मन्थेदुदरे कर्ता क्षुधया म्रियते तु सः ॥ देवयोन्यां तु यो मन्थेद्देवसिद्धिः प्रजायते ॥ मन्थेदुरुद्वये यस्तु राक्षसं कर्म तस्य तत् ॥ जंघाभ्यां यातुधानेभ्यः पादयोः स्यात्पिशाचकं ॥ प्रथमे मन्थने ज्ञेयं द्वितीयादौ नशोधयेत ॥ पादौ तस्याः स्मृतं मूलमग्रस्तु शिर उच्यते ॥ अध्वर्युः प्राङ्मुखोमन्थेत्प्रत्यग्दिक्चरणा हि सा ॥ नान्यवृक्षेण मथ्नीयान्नकुर्याद्योनिसंकरम् ॥ क्लेदिता स्फाटिता चैव सुषिरा ग्रन्थिमस्तका ॥ चतुर्विधारणिस्त्याज्या श्रेयस्कामैर्द्विजातिभिः ॥ क्लेदिता हरते पुत्रान् स्फाटिता शोकमावहेत्॥ ग्रन्थिमूर्धा हरेत्पत्नीं सुषिरा पतिमारिणी ॥ इति यज्ञपार्श्वकारिकायामुक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रोऽ अभिशस्तिपावा॥स नः स्योनः सुयजा यजेह देवेभ्योहव्य ꣳ सदमप्रयुच्छन्स्वाहा ॥ १४ ॥

टी० अग्नावग्निरिति विराट् दशाक्षरैश्चतुर्भिःपादैर्विराट्॥अत्र द्वितीयतुर्यावेकादशार्णौ ततो न्यधिका अग्निर्मथ्यमानोऽग्नावाहवनीये प्रविष्टः सन् चरति हविर्भक्षयति, चर गतिभक्षणयोः,किं भूतोऽग्निः ऋषीणां पुत्रः ऋत्विजो वेदविदः ऋषयः तैरुत्पादितत्वात्तेषां पुत्रवत्पुत्रः तथा अभिशस्तिपावा अभिशस्तिर्वैकल्पमिनित्तोऽभिशापस्तस्मात्पाति रक्षतीति अभिशस्तिपावा, आतोमनिन् इति वनिप्प्रत्ययः,हेअग्ने स तथा विधस्त्वं नोऽस्मदर्थं स्योन सुखरूपः सन् सदं सदा अप्रयुच्छन्, अप्रमाद्यन् युच्छ प्रमादे स्वाहा इदमाज्यं तुभ्यं हुतमस्तु; यद्वा सोऽग्निर्नो हविर्देवेभ्यो यजतु ददात्विति पुरुषव्यत्ययेन वा योजनं ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयि गृहणामीत्यग्निं गृह्णाति-मयिगृह्णामी-
तिमन्त्रेणकांस्यपात्रे निहितं कांस्यपात्रेणपिहि-
तमाग्निंगृह्णाति ॥ ॐ मयि गृह्णाम्यग्नेऽ
अग्निं ६॥रायस्पोषाय सुप्रजास्त्वायसुवीर्या-
यमामुदेवताःसचन्ताम् ॥ १५ ॥

टी० मयि गृह्णामीति अग्निदेवत्या ककुप् यस्या मध्यमपादो द्वादशक आद्य तृतीयावष्टकौ सा ककुप्, अत्र मध्यश्चतुर्दशकस्तेनह्यधिका ॥ अहं यजमानोऽग्रे प्रथमं मयि मन्निमित्त मद्यागनिमिते गृह्णाभि वेद्यां धारयाभि, किमर्थम् रायो धनस्य पोषाय पुष्ट्यर्थम् सुप्रजास्त्वाय शोभना प्रजा यस्य स सुप्रजाः सुप्रजसोभावः सुप्रजस्त्वं तस्मै, दीर्घश्छन्दासः,शोभनपुत्रादिनिष्पत्यै सुवीर्याय शोभनसामर्थ्याय वीर्यं शक्तिः, किञ्च उकारोऽप्यर्थे देवता अपि मां सचन्तां सेवतां संगच्छन्ताम् उ एवार्थे वा देवता मामेव सचन्ताम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्भोऽअस्योषधीनामिति गर्भाधानम्

ॐ गर्भोऽअस्योषधीनां गर्भोवनस्पतीनाम् गर्भोविश्वस्य भूतस्याग्ने गर्भोऽअपामसि १६

विवस्वन्नादित्य इतिपुंसवनम्

ॐविवस्वन्नादित्यैषते सोमपीथस्तस्मिन्मत्स्व अदस्मै नरोवचसे दधातन यदाशीर्दादम्पती वामश्नुतः॥पुमान्पुत्रो जायते विदन्ते वस्वधा विस्वाहा रप एधते गृहे ॥ १७ ॥

टी० हेअग्ने त्वमोपधीनां गर्भोऽसि भेपजरूपैरोषधीविशेषैरुत्पद्यमानत्वात् हेअग्ने त्वं वनस्पतीनां तरूणां गर्भोऽसि अरणिभ्यो जायमानत्वात् विश्वस्य भूतस्य सर्वस्य प्राणिजातस्य गर्भोऽसि जठराग्निरूपेण विद्यमानत्वात् अपां गर्भोऽसि वाडववैद्युतादिरूपत्वात ॥ १६ ॥

टी० तमांसि विवासयति नाशयतीति विवस्वान् यद्वा विशिष्टं वसु धनमस्येति विवस्वान् मतौ टिलोपश्छन्दसः यद्वा विविधं वस्ते आच्छादयति वस आच्छादने क्विप् विवोज्वाला विवोऽस्यास्तीति मतुप् तसौ मत्वर्थे इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भस्त्रादुत्वाभावः, यद्वा विशेषेण वस्ते आच्छादयति सर्वं ज्ञेयं व्याप्नोतीति, विवो ज्ञानं तद्वान् अग्निः तत्संबोधने हे विवस्वन् हेआदित्य आदत्ते हविरिति आदित्य इति एष पात्रस्थस्ते तव सोमपीथः पातुं योग्यः पीथः पीथश्चासौ सोमश्च सोमपीथः पातव्यः सोमः आहिताग्न्यादित्वात्पीथशब्दस्य परत्वम्, तस्मिन्पातव्ये सोमे त्वं मत्स्व, मदतृप्तौ तृप्तिं कुरु, बहुलंछन्दसीत्यदादित्वाच्छपोलुक्,हेनरो नेतारः ऋत्विजः आशीर्दाः, सुप्लोपश्छान्दसः, आशिषो दातारो-यूयमस्मै वचसे आशीर्वचनाय श्रद्धातन श्रदिति सत्यनामसु पठितम्,तप्तनप्तनथनाश्चेति मध्यमबहुवचनस्य तनादेशः, श्रद्धां कुरुत आस्तिक्यबुद्धिं कुरुतेत्यर्थः,मदुक्तमाशीर्वचनं भवद्भिः श्रद्धया धारितुं तथैव स्यादितिभावः, किं तदाशीर्वचनमत आह यत्र दम्पती जायापती अरणिशाण्डिल्यौ वांम वननंसं संभजनीयं यज्ञफलमश्नुतः प्राप्नुतः; किञ्च इह यज्ञे एव पुमान्पुंस्त्वधर्मसंपन्नः पुत्रः पुत्रस्थानीयोऽग्निर्जायते, किञ्च स च पुत्रो वसु धनं विन्दते लभते, अध अधेत्यर्थे निपातस्येचेति संहितां दीर्घः, अथानन्तरम् विश्वाहा विश्वानि च तानि अहानि च विश्वाहा कालाध्वनोरत्यन्तसंयोगे इति द्वितीया, राजाहसखिभ्यष्टच् इति प्राप्तस्य वैकल्पिकत्वाच्छान्दसोवाभावः,अनन्तरं धने लब्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजीजनोहीति सीमन्तोन्नयनम्

ॐ अजीजनोहि पवमान सूर्यं विधारेशक्म नादय: ॥ गोजीरयार ६ हमाण: पुरन्ध्या १८

सति विश्वाहा सर्वदा अरप: पापरहित: सन गृहे यज्ञगृहे एधते वर्धते नास्ति रपो यस्यासावरप: रपोरिप्रमिति पापनामनः भवत इति यास्क:,आशीर्दा आशिषोदातारौ इति दम्पती विशेषणं वा,विभक्तेराकार:,दम्पती यज्ञफलं प्राप्नुताम्,स च धनं लब्ध्वा निष्पापो यज्ञगृहे वर्धतामिति आशीर्वचने श्रद्धां कुरुतेति सर्वार्थ: ॥ १७ ॥

टी० पवते इति पवमान: यज्ञशोधक: शाण्डिल्यो मुनि:, पूङ्पवने पूङ्यजो: शानन्निति शानन्,आनेमुगिति मुगागम:, तत्संबुद्धौ हेपवमान हेशाण्डिल्य मुने त्वं सूर्यं सूर्यसदृशमग्निमजीजन: उत्पादितवानसि,जनेर्णिजन्ताल्लुङ् कीदृशस्त्वम् गोजीरया पुरन्ध्या रंहमाण: गच्छतीति गौ: यज्ञनिष्पत्तये तत्तद्यजमानगृहे गन्ता अग्नि:,गमेर्डोप्रत्यय: तं जीवयति उत्पादयतीति गोजीरा तया, वस्य रेफश्छान्दस:, पुरं सीमन्तोन्नयनविधिना सुन्दररूपं धारयतीति पुरन्धिरग्निमाता तया सह रंहमाण: संगतिमभिगच्छन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एजतु दशमास्य इति जातकर्म एजतु दश-
मास्य इति मन्त्रोच्चारणेन उपस्थितकांस्यपि
धानपात्रमुद्घाट्य अग्रेर्जातकर्म कुर्यात्
ॐ एजतु दशमास्योगर्भो जरायुणा
सह यथाऽयं वायुरेजति यथा
समुद्र एजति एवायं दशमास्योऽ
अस्रज्जरायुणा सह ॥ १९ ॥

शक्मना शकनं शक्म शक्ल शक्तौ मनिन्प्रत्ययः, शक्मना सामर्थ्येन पयः पयसो निष्पन्नं घृतम् अग्नौ हवनार्थं विधारे विशेषेण धारयामि, धारयतेस्तङि लटि उत्तमैकवचने धारये इति प्राप्ते छन्दस्युभयथा इति शितोऽप्यार्धधातुकत्वे सति णेरनिटि इति णिलोपे धारे इति रूपम् ॥ १८ ॥

टी० अवसानप्रयुक्ता गर्भदेवत्या महापङ्क्तिः अष्टाक्षराः षट्पादाः यस्याः सा महापङ्क्तिः, गर्भः जरायुणा सह एजतु, एज कंपने जरायुर्गर्भवेष्टनं तेन सह कंपतां चलतु, किंभूतो गर्भः दशमास्यः दश मासा जाता यस्य सः दशमासकालावच्छिन्न इव चलत्वित्यर्थः, कथं चलतु तत्राह यथा येन प्रकारेणायं वायुरेजति चलति यथा च समुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा पिपेषेति नामकरणम्

ॐ यदा पिपेष मातरं पुत्रः प्रमुदितोधयन्
एतत्तदग्ने ऽअनृणोभवाम्यहतौ
पितरौ मया संपृचस्थ संमाभद्रेण
पृङ्क्त विपृचस्थ विमापाप्मना पृङ्क्त॥२०॥

एजति एतौ हि सदा कंपनशीलौ, एवेति निपात एवमर्थे, एवमयं दशमास्यःसम्पूर्णावयवो गर्भोजरायुणा सह अस्रत् स्रंसतां निर्गच्छतु, यद्यप्ययं गर्भो दशममास्यो नास्ति तथापि सम्पूर्णस्येव निर्गमनमाशास्यते, तमेतदप्यदशमास्यं सन्तं ब्रह्मणैव यजुषा दशमास्यं करोति इतिश्रुतेःस्रंसु अधः पतने व्यत्ययेन परस्मैपदे शपो लुकि च कृते हल्ङ्याब्भ्य इति तिपि लुप्ते वाऽवसाने इति सस्य दत्वे अनिदितामिति नलोपे अडागमे च अस्रदितिरूपम् ॥१६॥

टी० यदा जातः पुत्रः प्रमुदितः प्रहृष्टो धयन् स्तनपानं कुर्वन् सन् मातरं जननीमापिपेष पिष्टवान् पद्भ्यां पीडितवान् पिपेर्लिट् तदा तस्य नाम कुर्यात्, हेअग्ने तदेतन्नाम तवास्तु, अहमनृणो भवामि ऋणत्रयरहितोऽस्मि, अत एव ब्रवीमि मया पितरौ मातापितरौ अहतौ नपीडितौ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूषा पञ्चाक्षरेणेति निष्क्रमणम्

ॐ पूषा पञ्चाक्षरेण पंचदिश उदजयत्ता उज्जेष ँ सविता षडक्षरेण षड्रितूनुदजयत्तानुज्जेषं मरुतः सप्ताक्षरेण सप्तग्राम्यान्यशूनुदजयँस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन्तामुज्जेषम् ॥ २१ ॥

पुत्रः प्रत्युपकर्त्तुमशक्तः स एव पित्रोर्हन्तेति भावः, मुखं दृष्ट्वा तु पुत्रस्य मुच्यते च ऋणत्रयात् इति वचनात् ॥ पुत्रमुखे पयोग्रहाणां स्पर्शं करोति पयोग्रहदेवत्यं यजुस्त्रिष्टुप्, हेपयोग्रहा यूयं संपृचः स्थ संपृञ्चन्ति संयोजयन्ती संपृचः पुत्रमुखे स्वत एव पयोदातु संयोजका भवत, अतो मा मां भद्रेण कल्याणेन संपृङ्क्त संसृजत कल्याणयुक्तं मां कुरुतेत्यर्थः संपूर्वात्पृचेः क्विप् पृचेरौणादिकाल्लोट्,हेसुगग्रहाः यूयन्तु विपृचः स्थ विपृचन्तीति विपृचः वियोजका भवत अतो मा मां पाप्मना कल्मषेण विपृङ्क्त निष्पापं कुरुतेत्यर्थः ॥२०॥

टी० पूषा देवः पञ्चाक्षरेण छन्दसा पञ्चसंख्याः पूर्वाद्याश्चतस्रोऽवान्तरादिशश्चेति पञ्चादिश उदजयत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नपतेऽन्नस्येति अन्नप्राशनम्

ॐ अन्नपतेऽन्नस्य नोदेह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ २२ ॥

अग्निरेकाक्षरेण वयौ अहमपि ता दिशो जयेयम्, सविता सर्वस्य प्रेरकोदेवः षडक्षरेण छन्दसा षट्संख्यानृतूनुदजयत् तानृतूनहमुज्जेषम् मरुतोदेवाः सप्ताक्षरेण छन्दसा सप्तसंख्या न् ग्राम्यान् गोऽजमहिषमेषाश्वाश्वतरगर्दभाख्यान्पशून् उदजयत् अहं तान्ग्राम्यान्पशून् जयेयम्, बृहस्पतिरष्टाक्षरात्मकेन छन्दसा गायत्रीछन्दोऽभिमानिनीं देवतामुदजयत् तां तादृशीं गायत्रीं अग्न्यर्थं जयेयम् ॥२१॥

टी० उपरिष्टाद्बृहती अष्टार्णत्रिपादा चतुर्थो द्वादशार्णः हेअन्नपते अन्नस्य पालक देव यद्वा अन्नस्य पते पालयित्रि हेअन्नपूर्णे देवि, विभाषासपूर्वस्येति पतिशब्दान्तस्य विकल्पेन नकाराभाव, नोऽस्माकं संबन्धिने पुत्रभावायाग्नयेऽन्नस्य देहि कर्मणिषष्ठी अन्नं प्रयच्छ, यद्वा अन्नस्य स्वांशं देहि कीदृशस्यान्नस्य अनमीवस्य नास्ति अमीवा व्याधिर्येन तदनमीवं तस्य शुष्मिणः शुष्ममिति बलनाम शुष्मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्न आयाहीति चूडाकरणम्

ॐ अग्न आयाहि वीतये गृणानो
हव्यदातये निहोता सत्सि वर्हिषि॥२३॥

बलं विद्यते यस्मात्तत् शुष्मि तस्य रोगनाशकं बेलहेत्वन्नं प्रयच्छेत्यर्थः, किञ्च दातारं प्रतारिषः अन्नस्य दातारं प्रकर्षेण वर्धय, प्रसमुपोदःपादपूरणे इति पादपूर्त्यै प्रोपसर्गस्य द्वित्वम्, अतिशयार्थं वोपसर्गाभ्यासः, अभ्यासे भूयांसमर्थं मन्यन्ते इति यास्कोक्तेः, तृप्लवनतरणयोः लेटोमध्यमैकवचनम्, सिव्वहुलं लेटि सिप् प्रत्ययः आर्धधातुकस्येतीट् छन्दसि धातोर्वृद्धिः लेटोऽडाटौ इति अडागमः, इतश्चलोप इति लेट इकारलोपे रुत्वविसर्गौ तारिष इति रूपम्. किञ्च नोऽस्माकं द्विपदे मनुष्ये पुत्रदौ चतुष्पदे गवादौ च ऊर्जमन्नं धेहि धारय, यद्वा द्वौपादौ यस्य स द्विपात्तस्मै द्विपदे चत्वारः पादा यस्य स चतुष्पात तस्मै पादःपत् पादस्यलोपोऽऽहस्त्यादिभ्य इति अन्तलोपे पदादेशः, द्विपदे मनुष्याय चतुष्पदे गवादये अन्नं धेहि जातावेकवचनम्, सर्वेभ्योनरपशुभ्योऽन्नं देहीत्यर्थः ॥ २२ ॥

टी० हे अग्ने त्वं वीतये हविर्भक्षणाय हव्यदातये देवेभ्यो हविषो दानाय च आयाहि आगच्छ कीदृशस्त्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भद्रं कर्णेभिरिति कर्णवेधः

ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवा ᳭ सस्तनूभि
र्व्यशेमहि देवहितं यदायुः ॥२४॥

गृणानः चूडाकर्मविधौ देवमनुष्यादिभिः स्तूयमानः होता देवानामाव्हाता सन् बर्हिषि यज्ञे निसत्सि निषीद ॥२३॥

टी० हेदेवा अग्नेः कर्णवेधविधिना कर्णेभिः कर्णैः बहुलंछन्दसीति एस् अभावः, भद्रं कल्याणमनुकूलं वयं शृणुयाम, हेयजत्राः यजन्तं त्रायन्ते रक्षन्ति यजत्राः यजमानपालकाः अक्षभिः नेत्रैः भद्रं वयं पश्येम, बहुलंछन्दसीति हलादौ अक्षिशब्दस्यानङादेशः,किञ्च देवहितं देवैः स्थापितं देवानां हितं देवोपासनयोग्यं वा यदायुर्जीवनं तद्वयम् व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम कीदृशा, वयम् स्थिरैर्दृढैरङ्गैः अवयवैः करचरणादिभिः तनूभिः शरीरैश्च पुत्रादिभिर्वा युताः तुष्टुवांसः भवतः स्तुवन्तः सन्तः॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निरेकाक्षरेणेति उपनयनम्

ॐ अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजतां तानुज्जेषं विष्णुस्त्र्यक्षरेणत्रींल्लोकानुदजयन्तानुज्जेषंꣳसोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयन्तानुज्जेषम् ॥ २५ ॥

टी० अग्निरेकाक्षरेण छन्दसा प्राणं पञ्चवृत्तिकं उदजयत् उत्कृष्टं जितवान्, अग्नेरुपनयनविधौ तथाहमपि तादृशं तं प्राणमुज्जेषमुत्कृष्टं जयेयं वशीकुर्यामित्यर्थः, अश्विनौ देवौ द्व्यक्षरेण अक्षरद्वयात्मकेन छन्दसा द्विपदः पादद्वयोपेतान्मनुष्यानुदजयतां जितवन्तौ तथाहमपि तेनैव द्व्यक्षरेण छन्दसा तान् तादृशान्मनुष्यानुज्जेषमधिकं जयेयम्, विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा त्रीन्भूरादीन् लोकानुद जयत् अहमपि ताँल्लोकानुज्जेषम्, सोमश्चतुरक्षरेणाक्षरतुष्टया-त्मकेन छन्दसा चतुष्पदः पादचतुष्टयोपेतान्पशूनुदजयत् अग्नेरुपनयने अहमपि तेन तान् पशून् उज्जेषम् ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतं कृणुतेति समावर्त्तनम्

ॐव्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञि-
यः दैवी धियं मनामहे सुमृडीकामभिष्टेय व-
र्चोधा यज्ञवाहसꣳसुतीर्थानो असद्वशे ये देवा
मनोजाता मनोयुजोदक्षक्रतवस्तेनोऽवन्तु ते
नः पान्तु तेभ्यः स्वाहा ॥ २६ ॥

अत्र व्याहृतिसहितां गायत्रीं श्रावयेत्

ॐ भूर्भुवः स्वः वैश्वानराय विद्महे सप्तजि-

टी० हेआचार्यादयः—व्रतं अग्नेः समावर्तनरूपं व्रतं कृणुत कुरुतः इतोऽन्यत्पूर्वं व्याख्यातम् ॥ २६ ॥

टी० वैश्वानरगायत्री वैश्वानराय द्वितीयार्थे चतुर्थी विश्वेभ्यः सर्वेभ्यो हितमग्निं विद्महे जानीमः, भूर्भुवःस्वः ऋग्यजुःसामवेदार्थज्ञानाय सप्तजिव्हाय सप्तजिव्हं अग्निदेवं धीमहि ध्यायेम, ध्यायतेर्लिङि छान्दसं संप्रसारणम् । अग्निः तत्तस्मिन्वेदत्रयोक्ते धर्ममार्गे नोऽस्माकं बुद्धिं कर्म वा प्रचोदयात् प्रकर्षेण प्रेरयति प्रेरयेदिति वा, चुदप्रेरणे लेटोऽडाटौ इत्याडागमः इतश्चलोपःपरस्मैपदेषु इतीकारलोपः ॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्हाय धीमहि तन्नोऽग्निः प्रचोदयात् २७

गावः उपवेति गोदानकर्म

ॐगावःउपावतावतं मही यज्ञस्यरप्सुदा उभा कर्णा हिरण्यया ॥ २८ ॥

भग एवेति विवाहः

ॐभग एव भगवाँ२ अस्तु देवास्तेन वयं भ०

टी० हेगावः यूयं अग्नेः समावर्त्तनविधौ अवतं यज्ञं प्रति उपावत उपगच्छत, दानार्थम्, बाहुलकादवतेरतच्प्रत्ययः कोहेतुरागमने तत्राह मही महत्यौ द्यावापृथिव्यौ यज्ञस्य रप्सुदारप्सुदे रफिस्वति रूपनाम तद्दत्तस्तेरप्सुदे वर्त्तेते, द्यावा भूमीयज्ञस्य शोभां कुरुत इति यूयमुपागच्छत, किञ्च उभा कर्णा भवतीनामुभौ कर्णौ हिरण्ययौ हिरण्मयौ अतएव दानार्थमागच्छतेत्यर्थ ॥ २८ ॥

टी० हेदेवाः अग्नेर्विवाहकर्मणि भग एव भगवान् धनवानस्तु किमन्यैरदातृभिर्धनिभिर्देवैरिति भावः ॥ तेन भगदत्तेन वयं भगवन्तः स्याम, एवं देवानुक्त्वाथ भगमाह हेभग सर्व इत् सर्व एव जनः तं प्रसिद्धं त्वा त्वां जोहवी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवन्तः स्याम तत्वा भग सर्व इज्जोहवीति स नोभग पुरएता भवेह ॥ २६ ॥

तत ऋतावनमित्यादि पठेत्

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् अजस्रंघर्ममीमहे उपयामगृहीतोऽसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा ॥ ३० ॥

ति अत्यन्तमाह्वयति इष्टसिद्धये हेभग स त्वमिह नोऽस्माकं अग्नेर्विवाहकर्मणि पुरएता पुरोऽग्नेएतीति पुरएता अग्रयायी भव, अग्रेसरो भूत्वा सर्वकार्याणि साधयेत्यर्थः २६

टी० ऋतावानमिति अडशाद्रिदृष्टा गायत्री वयं वैश्वानरमीमहे याचामः, यज्ञसमाप्तिपर्यन्तमितिशेषः, ईमहे याश्चाकर्मसु पठितः कीदृशं वैश्वानरम् ऋतं सत्यं यज्ञो जलं वाऽस्यास्ति ऋतवा तम् छन्दसीवनिपौवक्तव्याविति अस्त्यर्थे वनिप्रत्ययः, संहितायां मृतस्य दीर्घः, ऋतस्य सत्यस्याविनाशिनो ज्योतिषः तेजसः पतिं पालकम् तेजोऽधिष्ठानमित्यर्थः, अजस्रं नजस्यति न नश्यति अजस्रमनुपक्षीणम्, जसु हिंसायाम् नमिकंपीति रन्प्रत्ययः, घर्मं घृक्षरण दीप्त्योः जिघर्ति क्षरति जलं घर्मः तं दीप्तं वा उपयामेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐवैश्वानरस्य सुमतौ स्याम राजा हिकं भुवनानामभिश्रीः इतोजातोविश्वमिदं विचष्टे वैश्वानरोयतते सूर्येण उपयामगृहीतोऽसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा॥३१॥

पात्रेण गृहीतोऽसि वैश्वानराय त्वां गृह्णामि एष ते योनिः स्थानम् वैश्वानराय त्वां सादयामि॥ ३० ॥

टी० वैश्वानरस्येति कुत्सदृष्टा त्रिष्टुप् वैश्वानरस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम, कं निपातः पादपूरणः, हि यस्माद्धतोवैश्वानरः इतोऽरणितो जातः उत्पन्नः सन् इदं विश्वं सर्वं विचष्टे कर्मानुरूपं पश्यति सूर्येण सह यतते स्पर्धते च सूर्यसमतेजा इत्यर्थः, कीदृशोऽग्निः राजा राजते दीप्यते इति राजा भुवनानां भूतजातानामभिश्रीः आश्रयणीयः अभि समन्तात् श्रीयते सेव्यतेऽभिश्रीः कर्मणि क्विप् उप एष ते उक्त ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐवैश्वानरोन ऊतय आप्रयातु परावतः अ-
ग्निरुक्थेन वाहसा उपयामगृहीतोऽसि वैश्वा-
नराय त्वैषते योनिर्वैश्वानराय त्वा ॥३२॥
इति पठित्वा कुण्डे वन्हिं प्रवेशयेत, अग्निमूर्धे-
ति कुण्डेऽग्निं स्थापयेत

टी० वैश्वानरोन इति नोऽस्माकमूतयेऽवनाय परावत दूरदेशाद्वैश्वानरः आप्रयातु आगच्छ केन वाहसा वाहन भूतेन उक्थेन स्तोमेन वाहिष्टो वाहनानां स्तोमो दूतोहुतं नरा इति श्रुत्यन्तरे स्तोमस्य वाहनमुक्तम् उप एषते ॥३२॥
अग्निर्मूर्धेतिमंत्रोच्चारणेन कुण्डे स्थापित दारुकोपरिपूर्वो क्त प्रकारेण संस्कृत मग्नि स्थापयेत् ।

टी० अयमग्निः अपां रेतांसि जिन्वति द्युलोकाद्वृष्टि-रूपेण पतन्तीनामपां रेतांसि साराणि व्रीहियवादिरूपेण परिणतानि जिन्वति जिन्वतिः प्रीतिकर्मा प्रीणयति वर्ध-यतीत्यर्थः, यद्वा अपां रेतांसि कारणानि जिन्वति पुष्णाति आहुतिपरिणामेन वृष्टिं जनयतीत्यर्थः, ते वा आहुती उ-त्क्रामते इत्यादिश्रुतेः, किं भूतोऽग्निः दिवोमूर्धा द्युलोकस्य शिरःसमानः यथा शिरः शरीरस्योपरिवर्त्तते तथाऽ यम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्निर्मूर्धा दिवः पृथिव्या अयम् अपाꣳ रे ताꣳसि जिन्वति ॥३३॥

स्थिरोभवेति प्रज्वालयेत्

ॐ स्थिरोभववीड्वङ्ग आशुर्भव वाज्यर्वन्नपृथुर्भ-व सुषदस्त्वमग्ने पुरीषवाहणः ॥ ३४ ॥

ग्निरहनि स्वतेजसा आदित्ये प्रविष्टत्वादादित्यरूपेण द्युलो कस्योपरिवर्त्तते, तथा ककुत् ककुप्छन्दोगोपृष्ठोन्नतावयववा-ची तद्वदादित्यरूपेण सर्वोपरिस्थितत्वात्ककुत्सदृशः, यद्वा ककुदमितिमहन्नामेति निघण्टुः तस्यान्त्यलोप आर्षः मह-ज्जगत्कारणमित्यर्थः, तथा पृथिव्याः पतिः पालकः दाह पाकप्रकाशैर्भूलोकस्थानामुपकारकत्वात् ॥३३॥

टी० स्थिरोभवेति–इयर्ति यज्ञनिष्पत्तये तद्यजमान-गृहेषु गच्छतीति अर्वा अग्निस्तत्संबुद्धौ हेअर्वन् हेअग्ने स्थिरः चलनरहितः सन् त्वं वीड्वङ्गो दृढकायो भव, वीडुश-ब्दो दृढार्थः वीड्वन्यङ्गानियस्य सः, आशुर्वेगवान् सन् वाजी अन्नहेतुर्भव, पृथुः विस्तीर्णः सन् सुषदः सुष्टु देवाः सीद-न्ति तिष्ठन्ति यस्मिन्सः सुषदोभव, तथाचोक्तम्, उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः॥मध्यवक्त्रे तु ईशान एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽग्निं प्रार्थयेदनेन

ॐ आवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम्। ब्रह्मादयो यस्य मुखे वसन्ति प्रविश्य कुण्डे सुरलोकनाथ ॥ १ ॥

षड्भिर्दर्भैरग्नेर्दक्षिणतो ब्रह्मासनमास्तीर्य हिरण्यगर्भ इति प्रज्ञाशद्धिः कुशैर्ब्रह्मपवित्रकरणम्

ब्रह्मप्रभाषितम् ॥ मूर्ध्नि चैव त्वहं ब्रह्मा मुखेचैवतु शङ्करः॥ जिव्हायां संस्थितो विष्णुर्दंष्ट्रायां च ग्रहाः स्मृताः॥नासायां देवताः सर्वा चक्षुषीन्दुदिवाकरौ इत्यादि॥कीदृशस्त्वम् अग्ने? पुरीषवाहणः अगि गतौ अङ्गेर्नलोपश्चेति नि नेलोपश्च,गमनस्य प्रयोजनाय पृणाति पूरयति फलं वलिदाननिमित्त स्वदेहार्पणेनेति,पुरीषमजपशुः शृपृभ्यां किदिति पृणातेरीषन्प्रत्ययः, उदोष्ठ्यपूर्वस्येत्युठादेशो रपत्वञ्च सोवाहनं यस्य सः पुरीषवाहनः उक्तञ्च अजस्कन्धसमारूढमिति, यद्वा अग्नेः गत्यर्थधातुत्वेन ज्ञानार्थत्वात् यज्ञकर्मावगन्तुर्यजमानस्य काममूर्त्यै पुरीषं पूरयितृ अन्नं हवीरूपं वहति प्रापयति देवेभ्यः इति पुरीषवाहणः कल्यपुरीषपुरीष्येषुञ्युट् इति ञ्युट्प्रत्ययः ॥ २४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ३५ ॥

टी० ब्रह्माचार्यप्रणीतानामासनञ्चत्रिभिः कुशैः द्वाभ्यां नैकदर्भेण ऋषयो बहवो विदुः इत्यग्निगृह्यवचनात् त्रिभिः कुशैरुचितम् । पञ्चाशता भवेद्ब्रह्मा तदर्धेनतु विष्णु इतिवचनात्

टी० हिरण्यगर्भ इति ब्रह्मपवित्रं ब्रह्मस्वरूपेण परिकल्प्य स्तुतिं करोति, हिरण्यगर्भदृष्टा प्रजापतिदेवत्या त्रिष्टुप् हिरण्ये हिरण्यपुरुषे ब्रह्माण्डे गर्भ रूपेणावस्थितः प्रजापति हिरण्यगर्भभूतस्य प्राणिजातस्याग्रे सम,वर्त्तत प्राणिजातोत्पत्तेः पूरा स्वयं शरीरधारी बभूव, सचजातः उत्पन्नमात्र एकएवोत्पत्स्यमानस्य जगतः पति रीश्वर आसीत्, स एव पृथिवीमन्तरीक्षंद्यां द्युलोकमुतापिवेमां भूमिं लोकत्रयं दाधार धारयति तुदादीनां दीर्घोऽभ्यासस्येत्यभ्यासदीर्घः, पृथिवी भूः स्वयंभूरित्यन्तरीक्षनामसु पठितत्वात्पृथिवीशब्देनान्तरीक्षलोकोऽत्रोच्यते, कस्मै कशब्दस्य सर्वनामत्वमार्षम्, काय प्रजापतये देवाय वयं हविषा विधेम हविर्दद्मः विभक्तिव्यत्ययः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आब्रह्मन्निति ब्रह्माण मुदङ् मुखस्थापयेत् ॥
ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥२६॥

टी० आब्रह्मन्निति लिङ्गोक्ता देवता उत्कृतिः ॥ हे ब्रह्मन् राष्ट्रेऽस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः जायतामुत्पद्यताम् राजन्यः क्षत्रियः शूर आजायताम् कीदृशः शूरः पराक्रमी शूरविक्रान्तौ शूरयतीति शूरः इषुभिर्विध्यतीति इषव्यः यद्वा इषौ कुशलः इषव्यः अतिव्याधी अत्यन्तं विध्यतीत्यतिव्याधी शत्रुभेदनशीलः महारथः एकः सहस्रं जयति स महारथः दोग्ध्री दुग्धपूरं स्रवित्री धेनुः आजायताम् राष्ट्रे इति सर्वत्र संबन्धः अनड्वान् वृषभो वोढा वहनशीलो जायताम्, सप्तिः अश्व आशुः शीघ्रगामी जायताम्, योषा स्त्री पुरन्धिः पुरं सर्वगुणसंपन्नं द्र-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाति पुरन्धिः, रथेतिष्ठतीतिरथेष्टा क्विप् सप्तम्या अलुक्र-थेस्थितो युयुत्सुर्नरो जिष्णुःजयनशीलो जायताम्, युवा आ अस्येति पदच्छेदः अस्य यजमानस्य युवा समर्थः सभेयः सभायां योग्यो धीरः पुत्रो जायताम् सभायां साधुः सभेयः ढश्छन्दसीति सभाशब्दात्तत्र साधु रित्यर्थेढ प्रत्ययः, तस्ये-यादेशः किंच नोऽस्माकं राष्ट्रे पर्जन्यो निकामे निकामे नि-तरायां कामनायां सत्यां वर्षतु अभ्यासोवीप्सार्थः, नोऽस्माक मोषधयो यवाद्या फलवत्यः फलयुक्ताः पच्य-न्ताम् स्वयमेव पक्वा भवन्तु, नोऽस्माकं योगक्षेमः कल्पताम् योगेनयुक्तः क्षेमो योगक्षेमः सक्लिप्तो भवतु, अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य कुर्म इति होतुरासनम् ॥ यजमानासनं, पत्न्याश्चासनञ्च पृथक् पृथक् ॥ होत्रासनं तथा ब्रह्मासनं विस्तारयोगत अरत्निमात्राण्येतानि कथितानिमनीषिभिरिति ॥ ओँ यस्य कुर्मो गृहे हविस्तमग्नेवर्धयात्वम् तस्मैदेवा अधिब्रुवन्नयञ्च ब्रह्मणस्पतिः ॥३७॥

टी० यस्य कुर्म इति-वयं होत्रादयः यस्य यजमानस्य गृहे आसनोपरि उपविश्य हविः कुर्मः पुरोडाशप्रधानं कर्म कुर्मः, हेअग्ने तं यजमानं त्वं वर्धय संहितायां दीर्घः,देवा तस्मै तं यजमानमधिब्रुवन् अधिकं ब्रुवन्तु सर्वेभ्योऽधिको यमिति,अयं यजमानश्च ब्रह्मणो वैदिककर्मकर्ता पतिः पालको भवतु यद्वा देवा अयं ब्रह्मणस्पतिरग्निश्च इममधिब्रुवन् तस्मै द्वितीयार्थे चतुर्थी ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नेप्रेहीतियजमानासनम्

ॐ अग्ने प्रेहि प्रथमो देवयताञ्चक्षुर्देवानामुत-मर्त्यानाम् इयक्षमाणाभृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥३८॥

टी० अग्नेप्रेहीति आग्नेयी त्रिष्टुप् हेअग्ने त्वं देवयतां देवानिच्छतां यजमानानाम् प्रथमः प्रेहि पुरतः प्रकर्षेण गच्छ देवानिच्छन्ति देवयन्ति देवयन्तीति देवयन्तः तेषाम् सुप आत्मनः क्यच् इति क्यजन्ताच्छतृप्रत्ययः क्यचि चेति इत्वे प्राप्ते नच्छन्दस्य पुत्रस्येति तदभावः कथं मया-ग्रतो गन्तव्यं तत्राह यतस्त्वम् देवानामुतापि च मर्त्यानां मनुष्याणां चक्षुस्थानीयः लोकेऽपि गच्छतः पुरुषस्यदृष्टिः पुरतो याति किञ्च यष्टुमिच्छन्ति इयक्षमाणाः यजतेः सन्नन्ताल्लटः शानन् अभ्यासे यलोपश्छान्दसः इयक्षमाणा यष्टुमिच्छन्तो यजमानाः आसनोपरि निवसनात् स्वस्ति यथा तथा अविनाशेन स्वः स्वर्गं यन्तु प्राप्नुवन्तु, कीदृशाः भृगुभिः भृगुगोत्रविप्रैः सजोषाः समानः जोषः प्रीतिर्येषान्ते भृगुग्रहणमनूचानब्राह्मणोपलक्षणम् उत्तमविप्रैः प्रीतिमन्तः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः परीत्यभूतानीत्यनेन अग्नेरुत्तरतः प्रागग्र कुशेः प्रणीतासनं प्रणीताग्न्योर्मध्ये ब्रह्मासनञ्च विदध्यात्॥ ॐ परीत्यभूतानि परीत्यलोकान्परीत्यसर्वाः प्रदिशोदिशश्च ॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥३६॥

टी० परीत्यभूतानीति–ज्ञानवान् जनः आत्मना जीवरूपेण ऋतस्य यज्ञस्य आत्मानं यज्ञाधिष्ठातारं परमात्मानमभिसंविवेशः प्रविशति, ब्रह्मैव भवतीत्यर्थः. किंकृत्वा भूतानि परीत्य सर्वभूतानि ब्रह्मत्वेन विज्ञाय लोकान् भूरादीन् परीत्य ब्रह्मरूपान् ज्ञात्वा सर्वाः प्रदिशः विदिशो दिशश्च परीत्य तद्रूपा ज्ञात्वा प्रथमजां प्रथमोत्पन्नां त्रयीरूपां वाचमुपस्थाय संसेव्य यज्ञादि कृत्वेत्यर्थः अपि हि तस्मात्पुरुषाद्ब्रह्म पूर्वमसृज्यत इति श्रुतेः प्रथमजा वाक् वेदरूपा ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततइन्द्रआसामिति द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीत्रापात्रंवा महस्तेनादाय ॥ प्रणीतावारणाग्राह्याद्वादशांगुलसंमिता खातेनहस्ततलवदाकृत्यापद्मपत्रद्वत् ॐइन्द्रआसां नेताबृहस्पतिर्दक्षिणायज्ञः पुरएतुसोमः ॥ देवसेनानामभिभञ्जतीनां जयन्तो नांमरुतो यन्त्वग्रम्॥४०॥

टी० इन्द्रआसामिति इन्द्रो बृहस्पतिश्च आसां देवसेनानां नेता प्रणेताभवत्वितिशेषः यज्ञः यज्ञपुरुषो विष्णुर्दक्षिणात एतु गच्छतु दक्षिणाद्धाच् प्रत्ययः सोमः पुरोग्रे एतु मरुतो गणदेवा, अग्रंसेनाग्रभागं यन्तु कीदृशीनां देवसेनानाम् अभिभञ्जतीनाम् भञ्जो आमर्दने शत्रून्मर्दयन्तीनाम् तथा जयन्तीनां विजयमानानाम् इहापि इन्द्रोबृहस्पतिश्च प्रणीतानां प्रणेता विष्णुर्दक्षिणतः सोमोऽग्रे मरुतोऽग्रभागं गच्छन्त्वित्याशयो ज्ञेयः ॥४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदुत्तममिति दक्षिणहस्तोद्धृतपात्रस्थोदकेन पूरयित्वा ब्रह्मणोमुखमवलोक्य प्रणीतापात्रं प्रणीतासने निदध्यात् ॐउदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय अथावयमादित्य व्रते तवानागसोऽ अदितयेस्याम॥४१॥

उदुतममिति वरुणदेवत्या त्रिष्टुप् शुनः शेफ दृष्टा· उदित्युपसर्गोऽव विएतावपि श्रथयेत्यनेन संबध्यन्ते हे· वरुण उत्तमं उत्तमाङ्गे शिरसि स्थापितं त्वदीयं पाशमस्मत् अस्मत्तः सकाशात् उत्श्रथय उत्कृष्यविनाशय अधममधमाङ्गे पादप्रदेशे स्थापितं त्वत्पाशमवश्रथय अवकृष्यास्मत्तोविनाशय मध्यमं मध्यमप्रदेशे स्थितं पाशं विश्रथय विच्छेदय श्रथवन्धे मित्वाणखिचिन्हस्य:लोटिमध्यमैकवचने रूपम् श्रथायेति संहितायां दीर्घश्छान्दसः यद्वा श्रथ कृथादि लोटि मध्यमैकवचने छन्दसि शायजपि इति श्नाप्रत्ययस्य शायजादेशे श्रथायेतिरूपम् अथ पाशत्रयविनाशानन्तरम् हेआदित्य अदितिपुत्र वरुण अनागसः अनापराधा निष्पापास्तव व्रते कर्मणि वर्तमानाः सन्तोवयमदितये अदीनतायै स्याम अखण्डितत्वाय योग्या भवेम अथाइत्यत्र निपातस्य चेति दीर्घः ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्वायामीति ब्रह्मणोमुखमवलोक्य प्रणीता-
पात्रं प्रणीतासने निदध्यात्
ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः। अहेडमानोवरुणेह बोध्युरुश ६ समान आयुः प्रमोषीः ॥ ४२ ॥

टी० तत्वायामीति वरुणदेवत्या त्रिष्टुप् शुनः शेपदृष्टा अत्रद्वौ तच्छब्दौ वर्त्तेते तत्रैकस्य यच्छब्दपरिणामः कार्यः हेवरुण यजमानः हविर्भिः दत्तैः यद्धनपुत्रादिकमाशास्ते इच्छति यत्कामस्तुभ्यं हविर्ददाति तत् यजमानेष्टं त्वा त्वामहं यामि याचामि तत्वया यजमानाय दीयतामित्यर्थः यामिति याच्चा कर्मसु पठितः अथापि वर्णलोपो भवति तत्वायामीति यास्कोक्तेराकारलोपः कीदृशोऽहम् ब्रह्मणा त्रयीलक्षणेन वेदेन वन्दमानः त्वां स्तुवानः किञ्च हेउरुशंस शंसनंशंसः स्तुतिः शंसुस्तुतौ उरुमहान् शंसः स्तुतिर्यस्यसः उरुशंसस्तत्संबुद्धौ हेवरुस्तुते इहास्मिन्स्थाने अहेडमानः हेडते क्रुध्यति हेडमानः नहेडमानोऽहेडमानः अक्रुध्यन् सन् त्वं बोधि बुध्यस्व त्वं मत्प्रार्थनां जानीहीत्यर्थः हुभल्भ्योहेर्धिः बाछन्दसीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो ये तेशतमिति बार्हिर्मुष्टिमादाय उत्तराग्रैः कुशैरीशानादाग्नेयान्तं पूर्वाग्रैः कुशैर्ब्रह्मणोऽग्निपर्यन्तम् उदगग्रैः कुशैर्नैरृत्याद्वायव्यान्तम् पूर्वाग्रैः कुशैरग्नितः प्रणीतापर्यन्त परिस्तरणं कुर्यात् ॥ ॐ ये शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ४३

हेरयित्वाद्गुणः यत्नोपपश्चान्दसः किञ्चनोऽस्माकमायुर्जीवनं मा प्रमोषीः मा चोरय मुषस्तेये लुङ् नमाङ्योगे इत्यडभावः पूर्णमायुश्च देहीत्यर्थः ॥ ४२ ॥

टी० ये. ते. शतमिति वामदेवऋषिस्त्रिष्टुप् लिङ्गम् देवरुणसे तव ये शतं बहुसंख्याता ये च सहस्रं असंख्याताः पाशाः पापानि बन्धनहेतुत्वात् किंभूताः यज्ञियाः यज्ञस्पृहोत्पन्नाः वितताः सर्वविस्तृताः महान्तः अपरिहार्याः तेभिःतैः पाशिताओऽस्मान् अद्य अस्मिन्देशाह्नि सवितादयो देवा मुञ्चन्तु मोचयन्तु अकरुणा यथाकरणा न्ययथाकरणप्रत्यवायाभिभूतान्पुनर्नित्यस्त्यर्थः उत अप्यर्थः किंभूताः स्वर्काः स्वर्चनाः सर्वगाः सर्वपूज्या वेत्यर्थः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथपात्रासादनम् तत्वायामीति मन्त्रं पठित्वा यावद्भिः पदार्थैः प्रयोजनं भवति तावतः पदार्थान्द्वन्द्वशः प्राक्संस्थानुदग्ग्नेरुत्तरतः पश्चाद्वाऽऽसादयेत्

उक्तञ्च कारिकायाम् पश्चादुत्तरतोवा स्यात्पात्रासादनमग्नितः उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत् ॥ एतच्च विपुलस्थानसंभवे असंभवे तु कात्यायनोनोक्तम् प्राञ्च प्राञ्चं मुदगग्नेरुदगग्रं समीपतः इतिदेवयाज्ञिकाः ॥

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः अहेडमानोवरूणेह बोध्युरुश ꣳ स मा नआयुः प्रमोषीः ॥ ४४ ॥

टी० तत्वायामीति पूर्वं व्याख्याता ॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र्यम्बकमिति पवित्रछेदनार्थानि प्रादेशपरिमितानि त्रीणि कुशतरुणानि

ॐ त्र्यम्बकं यजमाहे सुगन्धिं पुष्टिवर्धनम् । उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ४५

टी० त्र्यम्बकमिति सुगन्धिं दिव्यगन्धोपेतं मर्त्यधर्महीनं पुष्टिवर्धनं धनधान्यादिपुष्टेर्वर्धयितारं त्र्यंबकं नेत्रत्रयोपेतं रुद्रं यजामहे पूजयामः ततोरुद्रप्रसादान्मृत्योर्मुक्षीय स्वर्गरुपान्मुक्तिरुपाचामृतान्मामुक्षीय मुक्तो माभूयासम् एकवचनं बह्वर्थे मुक्ता मा भूयास्मेत्यर्थः अभ्युदयनिःश्रेयसरूपात्फलद्वयान्ममभ्रंशोमाभूदित्यर्थः मृत्योर्मोचने दृष्टान्तः उर्वारुकमिवबन्धनादिति यथोर्वारुकं कर्कन्ध्वादेःफलमत्यन्तपक्कं सत् बन्धनात् स्वस्य वृन्तात्प्रमुच्यते तद्वत् ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पवित्रेस्थ इति साग्रेऽनन्तर्गर्भे द्वे पवित्रे कृत्वा॥
ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पु-
नाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। देवी-
रापो ऽअग्रेगुवो अग्रेपुवोऽग्रइममद्य यज्ञं नयताग्रे
यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम् ॥४६॥

टी० पवित्रेस्थ इति वैष्णवे इति प्राप्ते व्यत्ययो बहुल-
मिति ङीप् हे पवित्रे शोधके कुशाग्ररूपे युवां वैष्णव्यौ यज्ञ-
संबन्धिन्यौ स्थः यज्ञो वै विष्णुर्यज्ञिये स्थ इति श्रुतेः सवितुः
प्रेरकस्य प्रसवे प्रेरणे सति हे आपः वः युष्मान् उत्पुनामि
उत्कर्षेण शोधयामि केन अच्छिद्रेण छिद्रहीनेन पवित्रेण
वायुरूपेण यो वा अयं पवत एषोऽच्छिद्रं पवित्रमिति श्रुतेः
सूर्यस्य रश्मिभिः शुद्धिहेतुभिरुत्पुनामीति संबन्धः वायोः
सूर्यरश्मीनां च पादप्रक्षालनाद्युपहतभूमिशुद्धिहेतुत्वं प्रसि-
द्धम् हे देवीः आपः द्योतनात्मिकाः आपः यूयं अद्य अस्मि-
न्दिने इमं इदानीं प्रवर्त्यमानं यज्ञं अग्रे नयत पुरतः प्रवर्त्त-
यत निर्विघ्नं समापयत किंभूता आपः अग्रेगुवः अग्रे ग-
च्छन्ति इति अग्रेगुवः पुरतो निम्नदेशं प्रतिगमनशीलाः तथा
अग्रेपुवः अग्रेपुनन्तीत्यग्रेपुवः अग्रे यस्मिन्भागे गच्छन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन्नपहतिनिवारणेन शोधनशीलाः यद्वा अग्रे पिबन्तीत्यग्रे पुनः प्रथमं सोमरसस्य पानकर्त्र्यः गमें क्विप्प्रत्यये गमः क्वौ इत्यनुनासिकलोपेपुनातेः पिबतेर्नाक्वौऊङ्च गमादीनामित्यूकारः क्विप्च यज्ञपतिं यजमानमग्ने नयतेत्यनुवर्त्तते फलभोगाय प्रेरयत कथंभूतम् सुधातुं सुष्ठुदक्षिणादिना दधाति यज्ञं पुष्णातीति सुधातुस्तं यज्ञस्य पतिं पालयितारम् एकोयज्ञपतिशब्दो योगेन व्याख्येयः एकोरूढया तथा देवयुवम् युमिश्रणे देवान् यौति यज्ञादिना मिश्रीकरोति देवयुस्तम् क्विप् अनित्यमागमशासनम् इतितुगभावःयद्वा देवान्काम्यते इति यास्कोक्तेः सुप आत्मनःक्यच् इति क्यच् क्यच्चिचेति इत्वे प्राप्ते नच्छन्दस्यपुत्रस्येतीत्वाभावः अश्वाघस्यादिति अश्वाघयोरेवात्वविधानात् अकृत्सार्वधातुकयोरितिप्राप्तोदीर्घोनभवति ततःक्याच्छन्दसीति उप्रत्ययः देवयुशब्दस्याम्परे अमिपूर्वइति प्राप्तस्य पूर्वरूपस्य वाछन्दसीतिविकल्पेन तन्वादीनां वा इयङुवङौ इत्युवङ् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमंमेवरूण इति वारणंद्वादशाङ्गुलदीर्घंकरतलसंमितखातंपद्मपत्राकृति कमलमुकुलाकृति वा प्रोक्षणीपात्रम् * ॐइमंमे वरूण श्रुधी हवमद्या चमृडय त्वामवस्युराचके ॥४७॥

टी॰ इमं म इति वरुणदेवत्या गायत्री शुनःशेपदृष्टा हेवरुणत्वं मे मम इमं हवमाह्वानं श्रुधीशृणु शृणु इति हेर्धिःसंहितायां दीर्घः च पुनः अद्य दिने मृडयास्मान्सुखय यतोऽहम् त्वामाचके कामये आचक इति कान्तिकर्मा यद्वा शब्दयामि स्तौमित्यर्थः कगेशब्दे अस्माल्लिटि अदेचइत्यात्वम् द्विर्भावचुत्वं आतोलोपइटि च इत्याकारलोप तिङ्ङतिङ इति निघातः कीदृशोऽहम् अवस्युः अवनमवः पालनम् अवतेरसुन तदिच्छति अवस्युः सुपआत्मनः क्यच् क्याच्छन्दसि इत्युप्रत्ययः आत्मनोरक्षणमिच्छन् त्वामिच्छामीत्यर्थः ॥ ४७ ॥

* प्रणीतासन्निधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणहस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योर्मध्यपर्वभ्यां जलस्योच्छालनं कृत्वा प्रणीतोदकेन संप्रोक्ष्य प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं स्थापयेत्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवस्यत्वेति द्वे पवित्रे निधाय
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ ४८ ॥

टी० देवस्यत्वेति हेप्रोक्षणीपात्र सवितुर्देवस्य प्रसवे प्रेरणे सति तेन प्रेरितोऽहम् अग्नये जुष्टं प्रियं त्वा गृह्णामि अग्नीषोमाभ्यां चजुष्टं गृह्णामि काभ्याम् अश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याञ्च अंसमणिबन्धयोर्मध्यभागोदीर्घदण्डाकारोबाहुः पञ्चाङ्गु–लियुक्ताग्रभागोहस्तः अश्विनौ हि देवानामध्वर्यू पूषा हि देवानां भागधुक् अतोग्रहणसाधनयोः स्वबाह्वोरश्विबाहुभावना कार्या हस्तयोस्तुपूषहस्तभावनेति भावः ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घृतवती इति तैजसी वा मृण्मयी द्वादशाङ्गु-
लविस्तृता प्रादेशोच्चा आज्यस्थाली ॥

आज्यास्थाली तैजसी वा मृण्मयी वा प्रकीर्तिता ॥
द्वादशाङ्गुलविस्तीर्णा प्रादेशोच्चा शुभा स्मृता ॥
आज्यस्थालीसमानैव चरुस्थाली प्रशस्यते ॥

ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधु-
दुघे सुपेशसा ॥ द्यावापृथिवी वरुणस्य धर्मणा
विष्कभिते ऽअजरे भूरिरेतसा ॥४६॥

टी० घृतवती इति जगती द्यावापृथिवीदेवत्या द्यावा-
पृथिवी द्यावापृथिव्यौ वरुणस्यादित्यस्य धर्मणा धारणेन
धारणशक्त्या विष्कभिते स्तम्भिते स्कम्नोतिः दृढीकरणार्थः
वरुणेन स्वशक्त्या दृढीकृते इत्यर्थः किम्भूते ते घृतवती घृ-
तवत्यौ भुवनानां भूतजातानामभिश्रिया अभिश्रियौ आ-
श्रयणीये कर्मणि क्विप् विसर्गाकारः उर्वी उर्व्यौ विस्तीर्णे
पृथ्वी पृथ्व्यौ पृथुले आयामविस्ताराभ्यां महत्त्वम्
विशेषणद्वयेनोक्तम् मधुदुघे मधु उदकं तस्य दोग्ध्र्यौ सु-
पेशसा सुरूपे अजरे जरारहिते भूरिरेतसा भूरिरेतोयपोस्ते
भूरिरेतसी बहुरेतस्के सर्वभूतानां हि रेतांसि ताभ्यामेवो-
त्पद्यन्ते ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नपतेऽन्नस्येति तादृशीमेव चरुस्थालीं विदध्यात् ॥ ॐ अन्नपतेऽन्नस्य नोदेह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जं नोधेहि द्विपदे चतुष्पदे ॥ ५० ॥

शादं दद्भिरिति संमार्जनकुशाग्निप्रभृतयः ॥ ॐ शादं दद्भिरवकान्दन्तमूलैर्मृदं वर्स्वैस्तेगान्द ६ ष्ट्राभ्या ७ सरस्वत्या अग्रजिह्वं जि-

---

टी० अन्नपते इति व्याख्याता ॥ ५० ॥

टी० शादं दद्भिरिति यद्यपि संमार्जनकुशकर्मणि शादं दद्भिरित्यस्या अर्थसंगतिः प्रायेन संभवति अस्याः प्रयोग अश्वमेधयज्ञे वर्त्तते स्विष्टकृद्वनस्पत्योरन्तरे चतस्पर्शियामान्तरं स्विष्टकृद्यागात्पूर्वं शूने अपतं मांसं प्राजापत्योऽश्व इति वचनात्प्रजापतये हुत्वा अग्नये स्वाहेति शादादि प्रतिदेवतं देवताभ्योऽश्वाङ्गेभ्यश्च घृतहोमः क्रियते तथाप्यत्र शिष्टप्रयोगानुसरणीयत्वात् काचिदर्थसंगतिः क्रियते यथाश्वमेधयज्ञे आज्यमवदानानि कृत्वा आज्यमेव अश्वाङ्गत्वेन परिकल्प्य अवदानमवदानं प्रति शादादिदेवता आख्याय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽङ्गाया उत्सादमवक्रन्देन तालु वाज ६ हनुभ्या-मप आस्येन वृषणमाण्डाभ्यामादित्याँ २श्म-श्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवीवर्तोभ्यां विद्युतं कनीनकाभ्या ७ँ कृष्णाय स्वाहा पार्या णि पक्ष्माण्यवार्या इक्षवो वार्याणिपक्ष्माणि पार्या इक्षवः ॥ ५१ ॥

ख्यायाज्याहुतीर्जुहोति एवं कल्पितभागास्ता भागेन प्रीणा-ति तथा च श्रुतिः शादं दद्भिरवकान्दन्तमूलैरित्याज्यमव-दानानि कृत्वा प्रत्याख्यायं देवताभ्य आहुतिर्जुहोति या एव देवता अपि भागास्ता भागधेयेन समर्धयतीति अत एव श्रुतिवचनेषु प्रायोभावना प्रधाना अस्ति यथा होमा-दिकर्मसु हविरादीनां ग्रहणे ग्रहणसाधनयोः स्रुवाञ्ह्योरश्वि-बाहुभावना कृता हस्तयोस्तु पूषहस्तभावनाचेति एवमन्य-त्रापि ज्ञेया तथेहापि स्रुवस्य शोधनार्थं संमार्जनत्वेन प्री-णाति शादादयो देवाः दन्तावङ्गानि ॥ दद्भिरश्वदन्तैः शादं देवं स्रुवस्य संमार्जनार्थं प्रीणामि दन्तमूलैः अवकां देवतां प्रीणामि वर्स्वैर्दन्तपीठैर्मृदं देवतां प्रीणामि वर्स्वं स्याद्दन्त-पीठिका शादादयोऽप्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रंष्ट्राभ्यां तेगां देवतां प्रीणामि सरस्वत्यै अग्रजिह्वं अत्र चतुर्थ्या देवतोद्देशः प्रथमयाङ्गस्य अतोविभक्तिव्यत्ययः जिह्वाया अग्रमग्रजिह्वं जिह्वाग्रेण सरस्वतीं प्रीणामि जिह्वाया उत्सादंम् अत्र षष्ट्याश्वाङ्गोद्देशः द्वितीयया देवस्य विभक्तिव्यत्ययः जिह्वयोत्सादं देवं प्रीणामि अवक्रन्देन तालु अत्रदेवे तृतीयया अङ्गे प्रथमा व्यत्ययः तालुना अवक्रन्दं देवं प्रीणामि वाजं हनुभ्याम् हनुभ्यां वक्त्रैकदेशाभ्यां वाजं देवं प्रीणामि आस्येन मुखेनापोदेवताः प्रीणामि आण्डाभ्यां वृषणाभ्यां वृषणं देवं प्रीणामि श्मश्रुभिर्मुखकेशैरादित्यान्प्रीणामि भ्रूभ्यां ललाटगरोमपङ्क्तिभ्यां पन्थानं देवं प्रीणामि वर्ताः पक्ष्मपंक्तिः ताभ्यां द्यावापृथिव्यौ देवते प्रीणामि कनीनकाभ्यां नेत्रमध्यगकृष्णगोलाभ्यां विद्युतं देवतां प्रीणामि शुक्लाय स्वाहा कृष्णायस्वाहा देवाद्देश एव नत्वङ्गम् शुक्लाय कृष्णाय देवाय सुहुतमस्तु यद्वा चतुर्थ्याश्वाङ्गमेवनिर्दिश्यते प्राजाप्रपत्योऽश्व इतिवचनाद्देवोऽध्याहर्त्तव्यः शुक्लेन कृष्णेन चाश्वाङ्गेन प्रजापतिं प्रीणामि एव लोमभ्यःस्वाहेत्यादावपित्रोध्यम् पार्याणि अत्र तद्धितेन देवतोद्देशः पक्ष्माणि नेत्रोपरिलोमानि पार्याणि पारदेवत्यानि ततः पक्ष्मभिः पारं देवं प्रीणामि इक्षवोनेत्राधोभागरोमाणि अवास्देवत्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपयामगृहीतोऽसीति उपयमनकुशास्त्रयोदशः
ॐ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन्पाहि सोमम् उरुष्य राय एषोयज स्व ॥ ५२॥

ततः इक्षुभिरचारं देवं प्रीणामि विपरितं वा अचार्याणि अचारदेवत्यानि इक्षवः पार्याः पारदेवत्याः ॥ ५१ ॥

टी०उपयामगृहीत इति उपयम्यतीत्युपयामः पात्रविशेषस्तेनगृहीतः पचाद्यच् चित्वादन्तो दात्तः यमोऽपरिवेषणे इति परिवेषणादन्यत्रक्षित्वाभावाद्वृद्धिः तत्पुरुषेतुल्यार्थ इति पूर्वपदस्वरं वाधित्वा थाथघञ् इति अजन्तस्यान्तोदात्त्वम् पुनस्तृतीयासमासे तत्पुरुषे तुल्यार्थ इत्यादिना तृतीयान्तस्य प्रकृतिस्वरत्वेन तदेवस्थितम् हेउपयमनकुश त्वं त्वादृशोऽसि हेमघवन् धनवन्निन्द्र त्वं उपयमनकुशं अन्तः पात्रमध्ये यच्छ निगृह्णीष्व यद्वा शत्रुभ्योऽन्तर्धानं व्यवधानं यथा तथा नियमय ततः सोमं पाहि पालय तथा रायोधनानि उरुष्य रक्ष उरुष्यती रक्षणकर्मा यद्वा पशवोवै राय इति श्रुतेः पशूनक्ष आ इषोऽन्नानि आयजस्व समन्ताद्देहि यद्वा अन्नप्रसत्वादिपोलक्षया प्रजाः प्रजा वा इष इति श्रुतेः ता यजस्व याजयस्व यायजूकाः कुरु श्रुत्यैवं व्याख्यातत्वात् ॥५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समिधाग्निमिति समिधस्तिस्रः पालाश्यः
प्रादेशमानाः पृथक् स्थापयेत्
ॐसमिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्॥
आस्मिन्हव्या जुहोतन ॥ ५३ ॥

टी० समिधाग्निमिति हेऋत्विजः यूयं समिधा कृत्वा अग्निं दुवस्यत परिचरत दुवस्यतिः परिचरणार्थः सम्यगिध्यते दीप्यते वन्हिर्यया काष्ठरूपया सा समित् तया घृतैः होष्यमाणैरतिथिमातिथ्यकर्मणा पूजनीयमग्निं बोधयत प्रज्वालयत अस्मिन्प्रज्वलितेऽग्नौ हव्या नानाविधानि हवींषि आजुहोतन सर्वतोजुहुत तप्तनप्तनथनाश्चेतितनबादेश ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रुवः खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातः परिणाहवर्तुलपुस्करः गव्यमाज्यम् घृताच्यसीति आज्यास्थाल्यामाज्यं चरुस्थाल्यां चरुन् निदध्यात् ॥ ॐ घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रिय ँ सद आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रिय ँ सद आसीद घृताच्यसि ध्रुवानाम्ना सेदं प्रियेण धाम्ना प्रिय ँ सद आसीद ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहिपाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥ ५४ ॥

टी० घृताच्यसीति हे आज्यस्थालि हे चरुस्थालि वा त्वं घृतमञ्चति प्राप्नोतीति घृताची घृतपूर्णा भवसि नाम्ना च जुहूः हूयते स्रुवेणानया इति जुहूः क्विपि द्युतिगमि जुहोतीनां द्वे च जुहोतेर्दीर्घश्चेति द्वित्वं दीर्घश्च सा त्वं प्रियेण धाम्ना देववल्लभेनाज्येन सद इदं प्रियं सदः स्थानं आसीद अधितिष्ठ एतद्वै देवानां प्रियतमं धाम यदाज्यमिति श्रुतेः प्रियधामशब्देनाज्यम् उप समीपे स्थित्वा बिभर्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आज्यं धारयतीत्युपभृत् व्याख्यातमन्यत् ध्रुवस्थैर्येस्थिरत्त्वा-न्नाम्ना ध्रुवा अन्यद् व्याख्यातम् हेहविः प्रियेण धाम्ना-ज्येन सह प्रियं सदः आसिद ऋतस्य अवश्यं भाविफल-त्वेन सत्यस्य यज्ञस्य योनौ स्थाने ध्रुवाणि यानि हवींषि असदन्नतिष्ठन् हे विष्णो व्यापक यज्ञपुरुष ता तानि ह-वींषि पाहि रक्ष यज्ञं च पाहि यज्ञपतिं च पाहि यज्ञं नय तीति यज्ञनीः तं यज्ञन्यमध्वर्युं मां पाहि॥खादिरोबाहुमात्र-स्तुजुहूध्रुवस्संज्ञकः स्रुवः॥ अरत्निमात्रोहंसास्यो वर्तुलोऽस्रुगुष्पवत् ॥ अर्धपर्वप्रणाल्या च युक्तोनासाकृतिर्भवेत्॥ उपभृत्स्रुक् ध्रुवा स्रुक् च पुष्करस्रुक् तथैवच ॥ जुहूस्रुक्॥ उपभृत्स्रुक् ध्रुवास्रुक् इति स्रुवाणां भेदाश्चत्वारः ॥ होमे उक्तधान्यानि कात्यायनः कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् व्रीह्यादि चाकृतं प्रोक्तमितिवेद्यं त्रिधा बुधैः ॥ स्मृत्यन्तरे ॥ हविष्यान्न तिला माषा नीवारा व्रीहयोयवाः इक्षवः शालयो मुद्गाः पयोदधि घृतं मधु ॥ हविष्येषु यवा मुख्यास्तदनुव्रीहयः स्मृताः ॥ व्रीहीणामप्यलाभे तु दध्ना वा पयसापि वा ॥ यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकल्पतः यवानामिव गोधुमाव्रीहीनामिव शालयः इती ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रुचश्चमे इति स्रुवग्रहणम्

ॐ स्रुचश्चमे चमसाश्चमे वायव्यानि च मे द्रो-
णकलशश्चमे ग्रावाणश्चमेऽधिषवणे च मे पूत
भृच्च मऽआधवनियश्चमे वार्हिश्चमेऽवभृतश्चमे
स्वगाकारश्चमे यज्ञेन कल्पन्ताम् ॥५५॥

टी० स्रुचश्चमे इति स्रुचोजुह्वादयः चमसानि ग्रहपा-
णि वायव्यानि पात्रविशेषाः षोडशप्रस्थपरिमितोद्रोण उ-
च्यते द्रोणपरिमितजलपूर्णः कलशः द्रोणकलशः अधि-
षवणे काष्ठफलके पूतभृदाधवनीयौ सोमपात्रविशेषौ श्व-
गाकारः शम्युवाकः तेन यथास्वं देवतानां हविरङ्गीकारात्
प्रसिद्धमन्यत् एते मम स्रुवग्रहणविधिना यज्ञेन कल्प-
न्ताम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्युष्ट ँ रक्ष इति स्रुवं वामहस्ते कृत्वा दक्षिणहस्तेन संमार्जनकुशैः प्रणीतोदकेन प्रोक्षणं कुर्यात् अनेन प्रकारेण अग्रेणाग्रम् मध्येन मध्यम् मूलेन मूलम्

ॐ प्रत्युष्ट ँ रक्षः प्रत्युष्टा अरातयो निष्टप्त ँ रक्षो निष्टप्ता अरातयः उर्वन्तरिक्षमन्वेमि ॥५६॥

टी० प्रत्युष्ट ँ रक्ष इति रक्षः राक्षसजातिः प्रत्युष्टं प्रत्येकं दग्धम् उषदाहे अरातयोऽपि प्रत्युष्टाः प्रत्येकं दग्धाः रादाने हविषोदक्षिणाया वा दानं रातिः रातेः प्रतिबन्धका अरातयस्तेऽपि दग्धाः अन्यथा न यज्ञसाधनमित्यर्थः संमार्जनकुशैः प्रणीदकोदकसेचनेन यज्ञे स्थिता राक्षसा अरातयोऽपि निवारिताः यज्ञे निगूढं रक्षोनिष्टप्तं निशेषेण तप्तं संतप्तम् तप संतापे अरातयश्च निष्टप्ताः अनयोर्मन्त्रयोर्विकल्पः उरु विस्तीर्णं अन्तरिक्षं अवकाशं राक्षसादिरहितं अन्वेमि अनुसृत्य गच्छामि अनुसृत्य गमनं प्राप्नोमीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिशितोऽसीति स्रुवसंमार्जनम्

ॐ अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि ॥५७॥

टी० अनिशितोऽसीति हे स्रुव त्वं अनिशितोऽसि शोतनूकरणे नितरां शितस्तीक्ष्णीकृतो निःशितस्तथा नभवतीत्यनिशितः अस्मद्विषये तीक्ष्ण उपद्रवकारी न भवसीत्यर्थः यतः सपत्नक्षित् क्षिणु हिंसायाम् सपत्नानस्मच्छत्रून्क्षिणोति हिनस्तीति सपत्नक्षित् अत एव त्वां संमार्ज्मि सम्यक् शोधयामि मृजूशुद्धौ किंभूतं त्वाम् वाजिनं वाजोऽन्नमस्यास्तीति वाजिनं यज्ञद्वारा अन्नहेतुत्वादन्नवन्तम् यद्वा वाजो यज्ञस्तद्वन्तम यज्ञोहि देवानामन्नमिति श्रुतेः वाजं यज्ञाख्यमन्नमर्हतीति वाजिनम् अर्हार्थे इन्प्रत्ययः किमर्थं संमार्ज्मि वाजेध्यायै ञिइन्धी दीप्तौ इन्धनं इध्या दीप्तिः वाजस्येध्या वाजेध्या तस्यै वाजेध्यायै अन्नस्य दीप्त्यै प्रकाशनार्थं शोधितेन स्रुवेणाज्ये गृहीते हुते च सति अग्निर्दीप्यते तद्दीप्ताहुतिफलभूतमन्नं प्रकाशितं भवतीत्यर्थः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनन्तुमेति प्राञ्चमधोमुखं स्रुवमग्नौ तापयेत्
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि
मा ॥ ५८ ॥

शन्नोदेवीरितिप्रणीतोदकेनाभिषिञ्चेत्
ॐ शं नोदेवीरभिष्टय आपोभवन्तु पीतये ॥
शंयो रभिस्रवन्तु नः ॥ ५९ ॥

टी० पुनन्तुमेति अनुष्टुप् देवजनधीविश्वभूतजातवेदोदेवत्या देवजनाः देवानुगामिनोजना मां पुनन्तु मनसा सह धियः बुद्धयः कर्माणि वा मां पुनन्तु विश्वा विश्वानि सर्वाणि भूतानि मां पुनन्तु हेजातवेदः त्वमपि मां पुनीहि देवजनधीविश्वभूतजातवेदोदेवाः स्रुवस्य प्रतपनेन मां पुनन्त्वित्यर्थः ॥ ५८ ॥

टी० शंनो देवीरिति व्याख्याता ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्वायामीति पुनः स्रुवं प्रतप्य ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः अहेडमानोवरुणेह वोध्युरुश६ स मा न आयुः प्रमोषीः ॥ ६० ॥

तमुत्वेति स्रुवमुदङ्मुखमात्मनोदक्षिणतोनिधाय ॥ ॐतमु त्वा दध्यङ्ऋषिः पुत्र ईधे अथर्वणः ॥ वृत्रहणं पुरन्दरम् ॥ ६१ ॥

टी० तत्वायामीति व्याख्याता ॥ ६० ॥

टी० तमुत्वेति हेअग्ने अथर्वणः ऋषेः पुत्रः दध्यङ्नामकः ऋषिः तमु त्वा उ एवार्थे तमेव त्वाम् स्रुवमुदङ्मुखं निधाय ईधे प्रज्वालितवान् कीदृशं त्वाम् वृत्रहणं वृत्रस्य पाप्मनोहन्तारम् ब्रह्मभ्रूणवृत्रेषु हन इतिक्विप् पुरन्दरं रुद्ररुपेणासुरसंबन्धिनां त्रयाणां विदारयितारम् वाचंयमपुरन्दरौ चेति खशि निपातः॥६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजोऽसीति आज्यमवेक्षेत प्रताप्य ॥ ॐ तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥६२॥

टी० तेजोऽसीति हेआज्य त्वं तेजोऽसि शरीरकान्तिहेतुत्वात्तेजस्त्वम् शुक्रमसि दीप्तिमदसि स्निग्धरूपत्वाद्दीप्तमत्वम् अमृतमसि विनाशरहितमसि बहुदिवसावस्थानेऽप्योदनवत्पर्युषितत्वादिदोषाभावादविनाशित्वम् ॥ हे आज्य त्वं धाम स्थानमसि धीयते स्थाप्यते चित्तवृत्तिर्देवैरत्रेतिधाम तथा नाम नामयति आत्मानं प्रति सर्वाणि भूतानीति नाम आज्यं दृष्ट्वा सर्वेऽप्यत्तुं नमन्ति तथा देवानां प्रियं मिष्टमनभिभूतम् गतसारत्वदोषेणातिरस्कृतम् चरुपुरोडाशादीनि चिरस्थित्या गतसाराणिस्युरितीदं न तथा देवयजनं देवा इज्यन्तेऽनेनेति यागसाधनम् इदृशं त्वमस्यतस्त्वामहं नेः ग्रहणार्थं गृह्णामीतिवाक्यशेषः॥६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पशुभिः पशूनिति आज्यमुत्थाप्य चरोः पूर्वेण नीत्वा अग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतोनीत्वा आजस्योत्तरतः स्थापयित्वा आज़्यमग्नेः पश्चादानीय स्वस्थाने स्थापयित्वा चरुं चानीय आजस्योत्तरतोनिदध्यात् ॥ ॐ पशुभिः पशूनाप्नोति पुरोडाशैर्हवींष्या॥छन्दोभिः सामधेनीर्याज्याभिर्वषट्कारान् ॥६३॥

टी॰ पशुभिः पशूनिति पशुभिः कृत्वा पशूनाप्नोति पुरोडाशैः पुरोडाशानाप्नोति हविर्भिरन्यैरन्यैर्हवींपि आप्नोति छन्दोभिः छन्दांसि आप्नोति सामिधेनीभिः सामिधेनीराप्नोति याज्याभिर्याज्या आप्नोति वषट्कारै र्वषट्कारानाप्नोति पश्वादीनामुभयत्रसद्भावात् उत्तरार्धलोपः ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपवस्वेति आज्यं हवींषि चावेक्षणम् आप-
वस्वेतिमन्त्रोच्चारणेन आज्यं हवींषि चावलो-
क्य तेभ्योऽपद्रव्यनिरसनम् ॥ ॐ आपवस्व
हिरण्यवदश्ववत्सोम वीरवत वाजं गोमन्तमा-
भर स्वाहा ॥६४॥

प्रत्युष्ट ६ रक्ष इति आज्यं वर्हिश्च पवित्राभ्यां
त्रिरुत्पवनम् ॥ ॐ प्रत्युष्ट ६ रक्षः प्रत्युष्टा अ-
रातयो निष्टप्त ६ रक्षो निष्टप्ता अरातयः उर्वन्त-
रिक्षमन्वेमि ॥६५॥

टी॰ आपवस्वेति हेसोम त्वं आपवस्व आगच्छ तत्र
क्रियाविशेषणानि कथम् हिरण्यवत् कनकयुक्तं अश्ववत्
अश्वयुक्तं वीरवत् वीरयुक्तं यथा तथा आयाहीत्यर्थः स्वर्णा
श्ववीरान्मह्यं देहीत्यर्थः किञ्च हेसोम गोमन्तं धेनुयुक्तं
वाजमन्नमाभर आहर अन्नं धेनूश्च देहीत्यर्थः स्वाहा
सुहुतमस्तु हृग्रहोर्भश्छन्दसीति भकारः॥ ६४ ॥

टी॰ प्रत्युष्ट ६ रक्ष इति व्याख्याता ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आ त्वाहार्षमिति द्रव्यानिरीक्षणम् ॥ ॐ आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ॥ विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ६६

टी० आ त्वाहार्षमिति हेद्रव्यविशेष अहं त्वां आहार्षं यज्ञे आहृतवानस्मि आङ्पूर्वस्य हरतेर्लङि उत्तमैकवचनम् त्वञ्च अन्तरभूः कलशादिपात्रमध्येऽवस्थितोऽसि अविचाचलिरत्यन्तं चलनरहितो ध्रुवः स्थिरः सन् तिष्ठ विचलतीति विचाचलिः यङन्तादिन् किञ्च सर्वा विशः प्रजाः त्वा त्वां वाञ्छन्तु यद्वा सर्वा विशः सर्वाण्यन्नानि त्वां वाञ्छन्तु अन्नानि तवोपतिष्ठन्तु अन्नं वै विश इति श्रुतेः इदं राष्ट्रं त्वत् त्वत्तः सकाशात् मा अधिभ्रशत् अयं जनपदस्त्वत्तोमा भ्रश्यतु शून्योमाभूत् अस्मिन् राज्ये स्थित्वा सर्वाः प्रजाः याहीत्यर्थः यद्वा श्रीर्वै राष्ट्रमिति श्रुतेः श्रीः त्वत्तोमा भ्रश्यतु भ्रंशु अधःपतने पुषादित्वाच्च्लेरङ् नमाङ्योगे इति अडभावः ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णोरराटमिति छेपवित्रे आज्ये चरौ च निधाय ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥६७॥

टी० विष्णोरराटमिति हे पवित्र त्वं विष्णोर्यज्ञस्य रराटं ललाटस्थानीयमसि यज्ञादिकर्मसु शुद्धकरत्वेन श्रेष्ठत्वात् वेवेष्टि व्याप्नोतीति विष्णुर्यज्ञः निरुक्तव्यासो विषेः किंचतिनुः यज्ञो वै विष्णु रिति श्रुतेः तथा विष्णोर्यज्ञस्य श्नप्त्रे स्थः श्नप्त्रशब्देन ओष्ठसन्धिरुच्यते ओष्ठसन्धिद्वयरूपमसीत्यर्थः हे पवित्र विष्णोर्यज्ञस्य संबन्धिनी स्यूः सूचिस्तद्वल्लक्षणती-क्ष्णरूपमसीत्यर्थः सीव्यन्त्यनेनेति स्यूः सूचिः पिनुतन्तु-सन्ताने क्विपि च्छ्वोः शूडनुनासिके चेति वस्योडादेशः तथा विष्णोर्यज्ञस्य ध्रुवोऽसि ध्रुवशब्देन रज्जुग्रन्थिरुच्यते ग्रन्थि रूपमसीत्यर्थः हे पवित्र त्वं वैष्णवमसि यज्ञसंबन्धि असि हे पवित्र विष्णवे विष्णुप्रीतये त्वा त्वां आज्ये चरौ वा स्थापयामीति शेषः ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवस्यत्वेति प्रोक्षणीपात्रस्थपवित्राभ्यां प्रणीतोदकेनासादितवस्तुसेचनम् ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् अग्नीषोमाभ्यां त्वा जुष्टं नियुनज्मि अद्भ्यस्त्वौषधीभ्योनु त्वा माता मन्यतामनुपितानुभ्राता सगर्भ्योऽनुसखा सयूथ्यः अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ ६८ ॥

टी० देवस्यत्वेति हेप्रणीतोदक सवितुर्देवस्य प्रसवे आज्ञायां वर्त्तमानोऽहम् अश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् अग्नीषोमाभ्यां अग्नीषोमदेवताभ्याम् जुष्टमभिरुचितं त्वा त्वां नियुनज्मि निबध्नामि गृह्णामीत्यर्थः हेआसादितवस्तु अद्भ्यः आषधीभ्यः अत्र विभक्तिव्यत्ययः अद्भिः ओषधिभिश्च त्वा त्वां सिञ्चामि किंभूतं त्वाम् अग्नीषोमाभ्यां जुष्टम् किञ्च हेआसादितवस्तु एवं सिञ्चितं त्वां माता जननी भूमिर्वा अनुमन्यताम् तथा पिता जनको द्यौर्वा अनुमन्यताम् सगर्भ्यः समानगर्भे उदरे भवः सोदरोभ्राता अनुमन्यताम् सयूथ्यः समानयूथे भवः सखा सुहृत् अनुमन्यताम् ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धृष्टिरसीति ज्वलदुल्मुकं प्रदक्षिणमाज्यचर्वोः समन्ताद्भ्रामयित्वा अग्नौ प्रक्षिपेत् ॥

ॐ धृष्टिरस्यपाग्नेऽअग्निमामादं जहि निष्क्रव्याद(ꣳ)᳘ सेधा देवयजं वह ध्रुवमसि पृथिवीं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ ६६ ॥

टी० धृष्टिरसीति हेज्वलदुल्मुकाग्ने त्वं धृष्टिरसि प्रगल्भोऽसि ञिधृषाप्रागल्भ्ये तीव्राङ्गाराणामितस्ततश्चालने प्रभुत्वादस्यप्रागल्भ्यम् तत्र त्रयोग्नयः सन्ति एक आमात् आममपक्वमत्ती त्यामाल्लौकिकोऽग्निः द्वितीयःक्रव्यात् शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः तृतीयोयागयोग्यः तेषां मध्ये यागयोग्यताहीनौ द्वावग्नी आमात्क्रव्यात्संज्ञौ तौ वारयितुं गार्हपत्यं प्रत्युच्यते हे अग्ने गार्हपत्य आमादमग्निं अप जहि परित्यजः व्यवहिताश्चेति क्रियापदोपसर्गयोर्व्यवधानम् तथा क्रव्यादं अग्निं निषेध निःशेषं दूरे गमय परित्यजेत्यर्थः हेगार्हपत्य देवयजं देवानां यागयोग्यं अग्निं आवह समीपमानय देवा इज्यन्ते यस्मिन्नसौ देवयाट् तं देवयजम् हेज्वलदुल्मुक त्वं ध्रुवम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आब्रह्मन्निति ब्रह्मार्चनम् ॥ ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतमाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथोजायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णूरथेष्ठाः सभेयोयुवास्य यजमानस्य वीरोजायतां निकामे निकामे नः पर्जन्योवर्षतु फलवत्योन ओषधयः पच्यन्तांयोगक्षेमोनः कल्पताम्॥ ७० ॥

स्थिरं भवासि पृथिवीं दृंह दृढीकुरु भूमेर्दाढ्यकृतं शैथिल्यं माकुरु इत्यर्थः किञ्च त्वां उपदधामि किमर्थम् भ्रातृव्यस्य शत्रो रसुरस्य पाप्मनोत्रा वधाय हिंसार्थम् व्यन्शापत्ये इत्याद्युदात्तत्वाद्भ्रातृव्यशब्दः शत्रुवाची किंभूतंत्वाम् ब्रह्मवनि वनषणसंभक्तौ ब्रह्मणा ब्राह्मणेन वन्यते अग्निशुद्ध्यर्थं स्वीक्रियते इति ब्रह्मवनि तथा क्षत्रवनि सजातवनीति पदद्वयं योज्यम् सजाताः समानकुले जाता यजमानस्य ज्ञातयस्तैर्वन्यते इति ॥ ६९ ॥

टी० आ ब्रह्मन्निति व्याख्याता ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं विष्णुरिति विष्ण्वर्चनम् ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाꣳसुरे स्वाहा ॥७१॥

टी० इदं विष्णुरिति विष्णुदेवत्या गायत्री मेधातिथिदृष्टा विष्णुः त्रिविक्रमावतारं कृत्वा इदं विश्वं विचक्रमे विभज्य क्रमतेस्म तदेव आह त्रेधा पदं निदधे भूमावेकं पदमन्तरिक्षे द्वितीयं दिवि तृतीयमिति क्रमादग्निवायुसूर्यरूपेणेत्यर्थः पांसवो भूम्यादिलोकरुपा विद्यन्ते यस्य तत्पांसुरं तस्मिन् पांसुरे अस्य विष्णोः पदे समूढं सम्यगन्तर्भूतं विश्वमितिशेषः यद्वाऽयमर्थः अस्य विष्णोः पदं पद्यते ज्ञायते इति पदमद्वैताख्यं स्वरूपं समूढमन्तर्हितमज्ञातमकृतात्मभिः कस्मिन्निव पांसुरे इव लुप्तापमानम् पांसुले रजस्वले प्रदेशे निहितं यथा न ज्ञायते तद्वत तदुक्तम् तद्विष्णोः परमं पदꣳसदा पश्यन्ति सूरय इति स्वाहा तस्मै विष्णवे हविर्दत्तम् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजापतेनेति प्रजापति पूजनम्

ॐ प्रजापते न त्वदेतान्यन्यो विश्वारूपाणि परिता बभूव। यत्कामास्तेजुहुमस्तन्नोऽअस्तु वय स्याम पतयो रयीणाम् ॥७२॥

हिरण्यगर्भ इति हिरण्यं निधाय

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधार पृथिवींद्यामुतेमां कस्मै देवाय हविषा विधेम ॥७३॥

टी० प्रजापतेनेति व्याख्याता ॥ ७२ ॥

टी० पुरुषाकारं हिरण्यं निधायेत्यर्थः श्रौतज्ञापकात्॥ व्याख्याता ॥ ७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेवाग्निरित्यग्निमर्चयेत् ॥ ॐ तदेवाग्निस्त-
दादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेवशुक्रं तद्ब्रह्म
ता आपः स प्रजापतिः ॥७४॥
ततः पूर्वस्थापितसमिधस्तिस्रोविहायापरसमि-
धादानम् ॥ॐ समिधाग्निं दुवस्यतघृतैर्बोध-
यतातिथिम् आस्मिन्हव्या जुहोतन ॥७५॥

तदेवाग्निरिति अग्निः तदेवसर्वकारणं ब्रह्मैव आदि
त्यस्तदेव वायुस्तदेव चन्द्रमास्तत तदेव उ एवार्थे शुक्रं
शुक्रं शुद्धं तत् प्रसिद्धं ब्रह्म अपीलक्षणम् ब्रह्मैव ताः प्रसि-
द्धाः आपः जलानि स प्रसिद्धः प्रजापतिरपि तदेवब्रह्म७४
टी० समिधाग्निमिति व्याख्याताः ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नावेव पूर्वादिक्रमेण ऋग्वेदादींश्च पूजयेत् अग्निमीडे इति पूर्वे ऋग्वेदाय नमः इषेत्वेति दक्षिणे यजुर्वेदाय नमः अग्नआयाहीति पश्चिमे सामवेदाय नमः शन्नोदेवीरिति उत्तरे अथर्ववेदाय नमः॥ आप्यायस्वेति चरुं ब्रह्मणे समर्पयेत्॥ ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् भवावाजस्य संगथे॥७६॥

टी० आप्यायस्वेति हेसोम त्वमाप्यायस्व वर्धस्व तेतव वृष्ण्यं वीर्यं सामर्थ्यं विश्वतः सर्वतः समेतु संगच्छताम् त्वया संयुक्तं भवतु एवं भूतस्त्वं वाजस्यान्नस्य संगथे संगमने भव अस्माकमन्नप्रदोभव अथवा हेसोम विश्वतः सर्वस्मात् वृष्ण्यं वीर्यं सर्वभूतोत्पत्तिकृद्बीजं ते तव समेतु समागच्छतु तेन च वीर्येण त्वमाप्यायस्व सर्वतोवर्धस्व किञ्च वाजस्यान्नस्य संगथे संगमननिमित्तं भव अन्नमस्मासु संगमयेत्यर्थः वृष्ण्यम् वृषसेचने कनिन्युवृषि इत्यादिना कन् वृष्णि सत्वं वृष्ण्यम् भवे छन्दसीति यत् अल्लोपोन इत्यकारलोपः येचाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते यतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाव इत्याद्युदात्तम् भवा द्वृचोतस्तिङ इति संहितायां दीर्घत्वम् संगथे पातृतुदिवचति इत्यादिना विधीयमानस्थक् प्रत्ययोबहुलवचनाद्भमेरपि भवति थाथादिनोत्तरपदान्तोदात्तत्वम् ॥ ७६ ॥

पारस्करगृहसूत्रे यथा ॥ १ अग्निमुपसमाधाय २ दक्षिणतोब्रह्मासनमास्तीर्य ३ प्रणीय ४ परिस्तीर्य ५ अर्थवदासाद्य ६ पवित्रे कृत्वा ७ प्रोक्षणीः संस्कृत्य ८ अर्थवत्प्रोक्ष्य ९ निरुप्य १० आज्यमधिश्रित्य ११ पर्यग्निकुर्यात् १२ स्रुवं प्रतप्य १३ संमृज्य १४ अभ्युक्ष्य १५ पुनः प्रतप्य निदध्यात् १६ आज्यमुद्वास्य १७ उत्पूय १८ अवेक्ष्य १९ प्रोक्षणीश्चपूर्ववत् २० उपयमनकुशानादाय २१ समिधोऽभ्याधाय २२ पर्युक्ष्य जुहुयात् २३ एष एव विधिर्यत्रक्वचिद्धोमः ॥

१ कर्मसाधनभूतं लौकिकं स्मार्तं श्रौतं वा अग्निं आत्माभिमुखं स्थापयित्वा।

२ तस्याग्नेर्दक्षिणस्यां दिशि ब्रह्मणे आसनं वारणादियज्ञियदारु निर्मितं पीठं आस्तीर्य कुशैस्तीर्त्वा तत्र वरणाभरणाभ्यां पूर्वसंपादितं कर्मसु तत्वज्ञं ब्रह्माणं तदभावे पञ्चाशत्कुशनिर्मितं अग्नेरुत्तरतः प्राङ्मुखमासीनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वयमुदङ्मुख आसीनोऽनुलेपनपुष्पमाल्यवस्त्रालङ्कारादिभिः संपूज्य अमुककर्माहं करिष्ये तत्र मे त्वममुकगोत्रामुकप्रवरामुकशर्मन् ब्राह्मण त्वं ब्रह्मा भवेति वृत्वा भवामीत्युक्तवन्तमुपवेशय.

३ अप इति शेषः तद्यथा अग्नेरुत्तरतः प्रागग्रं कुशैरासनद्वयं कल्पयित्वा वारणं द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वासने स्थापयित्वा.

४ अग्निं बर्हिर्मुष्टिमादाय ईशानादिप्रागग्रैर्बर्हिभिरुदक्संस्थमग्नेः परिस्तरणं कृत्वा.

५ यावद्भिः पदार्थैरर्थः प्रयोजनं तावतः पदार्थान् द्वन्द्वं प्राक्संस्थान् उदगग्रानग्नेरुत्तरतः पश्चाद्वा आसाद्य तद्यथा पवित्रच्छेदनानि त्रीणि कुशतरुणानि पवित्रे साग्रे अनन्तर्गर्भे द्वे कुशतरुणे प्रोक्षणीपात्रं वारणं द्वादशाङ्गुलदीर्घं करतलमितखातं पद्मपत्राकृति कमल मुकुलाकृति वा आज्यस्थली तैजसी मृण्मयी वा द्वादशाङ्गुलविशाला प्रादेशोच्चा तथैव चरुस्थाली संमार्जनकुशास्त्रयः उपयमनकुशास्त्रिप्रभृतयः समिधस्तिस्रः पालाश्यः प्रादेशमात्र्यः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रुवः खादिरोहस्तमात्रः अंगुष्टपर्वमात्रखातः परिणाहषर्तुलः पुष्करः आज्यं गव्यम् चरुश्चव्रीहितण्डुलाः षट्पञ्चाशदधिकमुष्टिशतद्वयपरिमितं पराद्धर्यम् बहुभोक्तृपुरुषाहारपरिमितमपराद्धर्यम् तण्डुलाद्यन्नं पूर्णपात्रम् दक्षिणावरोवा यथाशक्तिहिरण्यादि द्रव्यम्.

६ प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रक्षिप्य.

७ प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीसु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य प्रणीतोदकेन प्रोक्ष्य.

८ अर्थवन्ति आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य असञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निधाय.

६ आसादितमाज्यं आज्यस्थाल्यां पश्चादग्नेर्निहितायां प्रक्षिप्य चरुश्चचरुस्थाल्यां प्रणीतोदकमासिच्य आसादितान् तण्डुलान् प्रक्षिप्य.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१० तत्राज्यं ब्रह्मा अधिश्रपयति तदुत्तरतः स्वयं चरुमेवं युगपदग्नावारोप्य.

११ ज्वलदुल्मुकं प्रदक्षिणं आज्यचर्वोः समन्तात् भ्रामयेत् अर्द्धशृते चरौ.

१२ दक्षिणेन हस्तेन * स्रुवमादाय प्राञ्चमधोमुखमग्नौ तापयित्वा.

१३ सव्ये पाणौ कृत्वा दक्षिणेन संमार्जनकुशाग्रैर्मूलतोऽग्रपर्यन्तम् मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तम्.

१४ प्रणीतोदकेनाभिषिच्य.

१५ पुनः पूर्ववत्प्रतप्य दक्षिणतोनिदध्यात्.

१६ आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतोनीत्वा आज्यमग्नेःपश्चादानीय चरुञ्चानीय आज्यस्योत्तरतोनिधाय एवं त्रिचतुराण्यन्यान्यपि हवींष्युद्वासयेत् अधिशृतानां पूर्वेणोद्वासितानां पश्चिमतोहविष उद्वास्यानयनमिति याज्ञिकसंप्रदायात्.

* स्रुवस्यायं संस्कारोहोमार्थः अतः संस्कारविस्मरणे प्रायश्चित्तपूर्वकं प्रागन्त्यहोमात्कार्यः ऊर्ध्वंतु प्रायश्चित्तमात्रम् प्रोक्षण्युदकेनाभ्युक्षणमितिगर्गः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७ ऊर्द्धं पूर्ववत्पवित्राभ्याम्,

१८ अवलोक्याज्यं तस्मादपद्रव्यनिरसनम्.

१९ *पवित्राभ्यामुत्पूय पूर्ववत्.

२० दक्षिणपाणिना गृहीत्वा सव्ये निधाय.

२१ तिष्ठन् समिधः प्रक्षिप्य.

२२ प्रोक्षण्युदकेन सर्वेण सपवित्रेण दक्षिणचुलुकेन गृहीतेन अग्निमीशानादि उदगपवर्गं परिषिच्य जुहुयात् आघारादीन् संस्रवधारणार्थं पात्रं प्रणीताग्न्योर्मध्ये निदध्यात्,

२३ एव परिसमुहनादिपर्युक्षण

---

*प्रोक्षणी संस्कारोऽयं पर्युक्षणा र्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽग्निप्रार्थनम्॥ नमोयज्ञपुरुष वैश्वानर परमात्मा देवता ब्रह्मा ऋषिः कपिलवर्ण उष्णिक्छन्दोरुद्रोदेवता होमे विनियोगः नारद उवाच ॥ प्राङ्मुखस्तुस्थितोवन्हिः प्राङ्मुखा एव ऋत्विजः॥ प्राङ्मुखा देवताः सर्वाः कथं प्रङ्मुखोभवेत् ॥१॥

ब्रह्मोवाच ॥ आवाहयेत्ततोवन्हिमन्त्रपूतेनवारिणा ॥ अनलश्चजंलदृष्ट्वाभीतः प्रत्यङ्मुखो भवेत् ॥२॥

टी॰पर्यन्तोविधिरेव नमन्त्राः क्वचित् यत्र क्वचन लौकिके स्मार्ते वाऽग्नौ होममात्रस्तत्र वेदितव्यः । टी॰ब्रह्मा नारदं प्रत्युवाच॥यजमानः मन्त्रैः पूतेन पवित्रभूतेन जलेन वन्हिं आवाहयेत् अनलोऽग्निः तज्जलं दृष्ट्वा गुरुत्वात् प्रत्यङ्मुखोभवेत् अग्नेर्जलगुरुत्वं ब्रह्मवैवर्ते स्पष्टंभवति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारद उवाच ।।पावकस्यतु किं रूपं कोवर्णः किञ्च लक्षणम् ।। शिरोवाहूदराङ्घ्रीणां चक्षुः श्रोत्रमुखस्य च ।। ३ ।।

ब्रह्मोवाच ।। पावकं द्विजरूपं च त्रिनेत्रं च चतुर्भुजम् ।।त्रिशिखं सप्तजिह्वं च पञ्चलक्षण संयुतम् ।।४।।

टी०पुनर्नारदः पृच्छतिनारद उवाच पावकस्य अग्नेस्तु रूपं किं वर्णः कः शिरोवाहूदराङ्घ्रीणां चक्षुःश्रोत्रमुखस्य च लक्षणं किम् शिरश्च वाहू च उदरश्च अंघ्री च शिरोवाहूदराङ्घ्रयस्तेषाम् चक्षुषी च श्रोत्रे च मुखञ्च चक्षुः श्रोत्रमुखं तस्य प्राण्यङ्गत्वादेकवद्भावः शिरोवाहूदराङ्घ्रीणा मित्यत्रतु छान्दसत्वादेकवदभावः ।। प्राण्यङ्गकैकवद्भावस्यानित्यत्वाद्वातथा च प्रयुज्यते ग्रीवाकुक्षिललाटेषु नित्यं स्वेदः प्रशस्यते इति कश्चिन्तु दधिपयआद्रेराकृतिगणमाहर चिन्तयेदिति शेषः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिभागं तुमुखं तस्य * अधिकं वक्रमुच्यते ॥
उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः५
मध्यवक्त्रे तु ईशान एवं ब्रह्मप्रभाषितम् ॥
मूर्ध्नि चैव त्वहं ब्रह्मा मुखे चैव तु शङ्करः॥६॥
जिह्वायां संस्थितो विष्णु दंष्ट्रायां च ग्रहाःस्मृताः
नासायां देवताः सर्वाः चक्षुषीन्दुदिवाकरौः॥७॥
ऋग्वेदोहृदयस्थाने बाह्वङ्गुल्योर्यजुस्तथा ॥
उदरे कटिगुह्ये च सामवेदः प्रकीर्त्तितः॥८॥
अथर्वा जङ्घपादौ च ग्रीवौङ्कारस्तथैवच ॥
पृष्ठे चैव तु गायत्री एवं स्यात्तु षडङ्गकम्॥९॥
हरकमलपिङ्गललोचन लोहिताक्ष सर्वपापप्रणाशन ॥

टी०हरस्य ललाटस्थिते कमलवत्पिङ्गले लोचने यस्य सस्तत्संबुद्धौ हेहरकमलपिङ्गललोचन लोहिते अक्षणी यस्य सस्तत्संबुद्धौ हेलोहिताक्ष सर्वेषां यज्ञकर्त्तृणां पापं प्रकर्षेण

* सर्वेषां देवादीनां मुखेभ्योऽधिकं श्रेष्ठं मुखमुच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैश्वानरलक्षणम् ॥ कस्य पुत्रः कस्य कुलोत्पन्नः किं गोत्रम् कः पिता का माता इति कात्ययनवचनात् ॥ भृङ्गी गोत्रम् शाण्डिल्यः पिता अरणिर्माता उदानकुक्षिरूर्ध्वमुखललाटम् ॥

नाशयतीति सर्वपापप्रणाशनस्तत्संबुद्धौ हेसर्वपापप्रणाशन अग्ने त्वां ध्यायामीति शेषः यद्वा हेकमलपिङ्गललोचन हेलोहिताक्ष हेसर्वपापप्रणाशन अग्ने त्वमस्माकं पापं हर नाशयेति ॥

टी. एतादृशंऊर्ध्वमुखललाटं ध्यायेत्मुखञ्च ललाटञ्च मुखललाटं ऊर्ध्वं मुखललाटं यस्य स ऊर्ध्वमुखललाटस्तम् ॥

---

१ शण्डिलस्यापत्यं पुमान् शाण्डिल्यः गर्गादिभ्योयत् शाण्डिल्यः प्रकारान्तरे त्रिटेमुनौचेतिहेमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा ॥ स्फुलिङ्गिनी विश्वरूपा च देवी लेलायमाना इति सप्तजिव्हाः ॥

टी० काल्यादिविश्वरूपान्ता इत्यग्नेः सप्तजिव्हाः देवीतिविश्वरूपाविशेषणम् लेलायमाना इति सप्तजिव्हाविशेषणम् काली कालोवर्णोयस्यास्तीति काली कृष्णवर्णारूपा जानपदेत्यादिनाङीष् कराली करालं भयङ्कररूपं यस्यास्तीति कराली भीषणरूपा वव्हादिभ्यश्चेति ङीष् करालं दन्तुरे तुङ्गे भीषणे चाभिधेयवत् इतिकोषान्तरम् मनोजवा मनोवत् जवो वेगोयस्या सा मनोजवा मनोवेगरूपा सुलोहिता शोभनो लोहितोरक्तवर्णोयस्य सा सुलोहिता शोभनरक्तवर्णरूपा सुधूम्रवर्णा शोभनो धूम्रवर्णो यस्यासा सुधूम्रवर्णा शोभनधूम्र रूपा स्फुलिङ्गिनी स्फुलिङ्गा यस्या सन्ति स्फुलिङ्गिनी बहुस्फुलिङ्गरूपा विश्वरूपा विश्वं सर्वं रूपयति प्रकाशयतीति विश्वरूपा सर्वप्रकाशरूपा विश्वधरेतिकेचित् विश्वदासेतिभानुदीक्षितः विश्वरूचीति सण्ड्कोपनिषदि देवी दीप्यमाना लेलायन्ते इति लेलायमानाः लेलादीप्तौ प्रदीप्ता आहुतिग्रसनायातिशयनेन चञ्चलावा महाभारते नीलकण्ठटीकायाम् काली मनोजवा धूम्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिशिखं चक्रधरं साक्षसूत्रकमण्डलुम् ॥
व्याघ्रहस्तं दिव्यपुष्पगन्धाभरणभूषितम् ॥
अजस्कन्धसमारूढं कृष्णाजिनोत्तरीकम् ॥
ऋग्यजुःसामाथर्वाख्यवेदानांध्वानिभूषितम् ॥

कराली लोहिता तथा॥ स्फुलिङ्गिनी विश्वरूचिः सप्तजिव्हा विभावसोः॥वाचस्पतिः कराली धूम्रिनी श्वेता लोहिता नील लोहितासुवर्णा पद्मरागा च सप्तजिव्हा विभावसोः॥मण्डूकोपनिषदि तु काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरूची च देवी लेलायमाना इति सप्तजिव्हाः॥ अग्नेः शक्तयः वाचस्पतौ पीता श्वेतारूणा कृष्णा धूम्रा तीक्ष्णा स्फुलिङ्गिनी ॥ ज्वालिनी ज्वालिनी चेति कृशानोर्नवशक्तयः ॥

टी० त्रिशिखं ज्वालात्रयोपेतम् चक्रधरं चक्रस्य धरं चक्रधरम् अक्षसूत्रकमण्डलुभ्यां सहितं साक्षसूत्रकमण्डलुम् व्याघ्रोहस्ते यस्य तं व्याघ्रहस्तम् ॥

टी०अजस्य मेषस्य स्कन्धं पृष्ठं समारूढम् कृष्णाजिनं कृष्णसारमृगचर्म उत्तरीयं यस्य तं कृष्णाजिनोत्तरीयकम् समासान्तः कः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होमार्थं प्रार्थयेऽहं त्वां चर्वाजाज्याहुताशन ॥ अमुककर्मणि अमुकनामन् दिव्यरूपवैश्वानर आवाहितोभव ॥ तावत्तिष्ठात्र मे ब्रह्मन् यावत्कर्म समाप्यते ।

टी० हेब्रह्मन् हेअग्ने अग्निर्ब्रह्म इति श्रुतेः ॥ अग्नेर्ध्येयरूपमाह रुद्रकल्पे रुद्रतेजः समुद्भूतं द्विमूर्धानं द्विनासिकम् ॥ षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम् ॥ याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् ॥ स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणे ॥ तोमरं व्यजनं चैव घृतपात्रं तु वामके बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम् ॥ दक्षिणे च चतुर्जिह्वं त्रिजिह्वमुत्तरे मुखे द्वादशकोटिमूर्त्याख्यं द्विपंचाशत्कलायुतम् ॥ स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम् ॥ रक्तमाल्यांबरधरं रक्तपद्मासनस्थितम् ॥ रौद्रन्तु वन्हिनामानं वन्हिमावाहयाम्यहम् ॥ इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कर्मविशेषेऽग्नेर्नामानि ॥ अग्निश्च भरतोनाम गर्भाधाने विधीयेत ॥ तथा पुंसवने चैव सीमन्ते जातकर्मणि ॥ १ ॥

नाम्नि वै पार्थिवोवन्हिः प्राशने तु शुचिः स्मृतः ॥ चूडायां मङ्गलोनाम व्रतदाने समुद्भवः ॥ २ ॥

टी॰ अग्निः गर्भाधानकर्मणि पुंसवनकर्मणि सीमन्तकर्मणि जातकर्मणि च भरतोनाम विधीयते बिभर्ति धारयति पुष्णाति वा गर्भमिति भरतः भृमृदृशीत्यतच् ॥ १ ॥

टी॰ नामकर्मणि पार्थिवोनाम पृथिव्याईश्वरः पार्थिवः तस्येश्वर इत्यञ् प्राशनकर्मणि शुचिर्नाम शुचि पवित्रं करोतीति शुचयति शुचयतीति शुचिः रायन्तादचइ चूडाकर्मणि मङ्गलोनाम मङ्गलं कल्याणं यस्यास्तीति मङ्गलः अर्शआदित्वादच् व्रतबन्धकर्मणि समुद्भवोनाम सम्यक् उद्भवोव्रतादीनामुत्पत्तिर्यस्मात्स समुद्भवः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोदाने सूर्यनामा च विवाहे योजकस्तथा ॥
शान्तिके दारुणो नाम पौष्टिके वलवर्धनः॥३॥
आवसथ्ये भवेदग्निरग्निष्टोमे प्रदायकः ॥
वनदाहे दूतकाख्यः प्रकोष्टे जठरःस्मृतः ॥ ४ ॥

टी० गोदानकर्मणि सूर्योनाम सूर्यसुताश्वगात्र इति वचनात् सूर्यसदृशः विवाहकर्मणि योजकोनाम स्त्रीपुंसोः प्रीतियोजकः शान्तिकर्मणि दारुणोनाम दारयति शत्रुणां चित्तमिति दारुणः कृवृद्रादिभ्यउनन् पौष्टिककर्मणि वलवर्धनोनाम वलं वर्धयतीति वलवर्धनः ल्युः ॥ ३ ॥

टी० आवसथ्ययज्ञकर्मणि अग्निर्नाम अगिगतौ अङ्गेर्नलोपश्चेति निर्नलोपश्च याग़ा द्यागान्तरं गन्ता अग्निष्टोमयज्ञकर्मणि प्रदायकोनाम प्रकृष्टं ददातीति प्रदायकः राबुल् वनदाहकर्मणि दूतकोनाम दवति दुगतौ दुतनिभ्यां दीर्घश्चेति क्तः यद्वा दूयतेस्म दूङ्परितापे गत्यर्थेति क्तः दूतएव दूतकः स्वार्थेकन् उदरभरणकर्मणि जठरोनाम औदर्योऽग्निर्जठरः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वायव्ये वरुणोनाम स्थावरे पावको भवेत् ॥
क्रव्यादोमृतभक्षी च समुद्रे वडवानलः ॥ ५ ॥
युगान्ते चाक्षयोनाम वत्सरे प्रलयं गतः

टी० वायव्ययज्ञकर्मणि वरुणोनाम वृणोति व्याप्नोतीति वरुणः स्थावरकर्मणि * पावकोनाम पुनातीति पावकः शरीराहुतिकर्मणि क्रव्यादोनाम क्रव्यं शवमांसं अत्ति दहतीति क्रव्यादः अग्नि समुद्रे समुद्रमध्ये वडवानलोनाम समुद्रस्थाया वडवाया अश्वाया अनलः वडवानलः आधाराधेयभाव एव संवन्धत्वेन षष्ट्यर्थः ॥ ५ ॥

टी० युगान्ते अक्षयोनाम क्षयोनाश स्तद्भिन्नोऽक्षयः विनाशरहितः अः परमात्मा तस्मिन् क्षयोनिवासोयस्य स अक्षयः वत्सरे ब्रह्मणोदिने वर्षे वा सवर्त्तकोनाम लये संवर्त्तकस्तथा इति वचनात् ब्रह्मणः शतवर्षपूर्णे सोऽग्निः प्रलयं गतः प्राप्तः इति संवर्त्तः प्रलयः कल्प क्षयः कल्पान्त इत्यपि इत्यमरः ॥ अग्नेः सप्तत्रिविंशतिनामानि वाचस्पतौ प्रोक्तानि लौकिके पावकोह्यग्निः प्रथमः परिकीर्त्तितः ॥ अग्निस्तु मारुतोनाम गर्भाधाने प्रकीर्तितः ॥ पुंसवे चमसोनाम

* वृक्षादिप्रतिष्ठा कर्मणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोभनः शुकर्मसु ॥ सीमन्ते ह्यनलोनाम प्रगल्भोजातकर्मणि ॥ पार्थिवोनामकरणे प्राशनेऽन्नस्य वै शुचिः ॥ सभ्यनामातु चूडायां व्रतादेशे समुद्भवः ॥ गोदाने सूर्यनामा स्यात्केशान्ते याज्ञकः स्मृतः ॥ वैश्वानरोविसर्गे स्याद्विवाहे वलदः स्मृतः॥चतुर्थिकर्मणि शिखी धृतिरग्निस्तथापरे ॥ आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः ॥ ब्रह्माग्निर्गार्हपत्ये स्याद्दक्षिणाग्निरथेश्वरः ॥ विष्णुराहवनीये स्यादग्निहोत्रे त्रयोमताः ॥ लक्षहोमेऽभीष्टदः स्यात्कोटिहोमे महाशनः ॥ एके वृहार्चिषं प्राहुरग्निध्यानपरायणाः ॥ रुद्रादौ तुमृडो नाम शान्तिके शुभकृत्तथा ॥ आदिशब्दाल्लघुरुद्रशतरुद्रातिरुद्रा लक्ष्यन्ते ॥ पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारिके ॥ वश्यार्थे वशकृत्प्रोक्तोवनदाहे तु पोषकः ॥ उदरे जठरोनाम क्रव्यादः शवभक्षणे ॥ समुद्रेवाडवो ह्यग्निर्लये संवर्त्तकस्तथा ॥ सप्तविंशतिसंख्याता अग्नयः कर्मसु स्मृताः इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ चत्वारीति वैश्वानरमन्त्रस्यवामदेवऋषिस्त्रिष्टुप्छन्दः वैश्वानरोदेवता अग्निप्रार्थने विनियोगः ॐ चत्वारि शृङ्गा त्रयअस्य पादा द्वे शीर्षेसप्तहस्तासोअस्य॥ त्रिधावद्धोवृषभोरोरवीति महोदेवोमर्त्यां २ आविवेश॥

टी० अस्याग्नेः चत्वारि शृङ्गा शृङ्गाणि पादाः त्रयः द्वे शीर्षे। अस्याग्नेः सप्त हस्तासोहस्ताः। त्रिधावद्धः ऋग्यजुःसामभिर्वद्धः कामानां वर्षणात् वृषभः रोरवीति भृशं शब्दं करोति। महोमहान्। देवोऽग्निः मर्त्यान् मनुष्यलोकान्। आविवेश आविशति। शृङ्गेति शेश्छन्दसिबहुलमिति शेर्डादेशः हस्तास इति आज्जसेरसुगिति इत्यसुक् रोरवीतीति रुशब्दे यङ्लुगन्तम् मह इति महपूजायां घञर्थे कविधान मितिकः वृषभ इतिवृषुसेचने औणादिकोऽभच् किञ्च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोगन्धपुष्पादिभिरग्निं संपूजयेत् ॥ आग्नेये ॐ ब्रह्मणे नमः ॥ नैर्ऋत्ये ॐ पौष्टिकाय नमः वायव्ये वलवर्ध नमः ॥ ऐशाने ॐ प्रजापतये नमः ॥ मध्ये ॐ विष्णवे नमः ॥ अथ ब्राह्मणवरणम् ॥ तत्रादौ कुशतिलयवजलयुतगन्धपुष्पाक्षतताम्बूलपूगीफलवस्त्रद्रव्याभरणादीन्यादाय पूर्वाभिमुखोभूत्वा प्रत्यङ्मुखान् ब्राह्मणान् निमन्त्रयेत् ॥

ॐ तत्सत् विष्णुः ३ इत्यादिदेशकालादीन् संकीर्त्य अमुकगोत्रोऽमुकशर्माहं ममामुककर्मणि कृताकृतावेक्षणरुपब्रह्मकर्म कर्त्तुं तथाचामुककर्मणि प्रतिदेवतानां मुखे साज्यभागान्तमाहवनीयद्रव्ययुतहोमकर्म कर्त्तुं तथाचामुककर्मणि तत्तत्कर्मविहितोपयोग्याचार्यकर्मकर्त्तुं तथाचामुककर्मणि चतुर्वेदोक्तमन्त्रजपपाठकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तु नानानामगोत्रान् नानानाशर्मणोब्राह्मणा नेभिश्चन्दनपुष्पाक्षतताम्बुलपूगीफलवासोद्रव्याभरणादिभिर्गणपतिब्रह्महोत्राचार्यत्वेन जापकपाठकत्वेन च युष्मानहं वृणे ॥ ॐ वृताःस्म इति ते ब्राह्मणा ब्रूयुः ॥ अत्र पुण्याहवाचनपर्यन्तं विशेषवाक्यम् ॥ ब्रह्म प्रार्थना ॥ यथा चतुर्मुखोब्रह्मा सर्ववेदविशारदः ॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ १ ॥ होतृ प्रार्थना ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मविदांवर ॥ वितते मम यज्ञेऽस्मिनृत्विक् त्वं मे मखे भव२ आचार्यप्रार्थना ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन्नाचार्योभव सुव्रत ॥ ३ ॥ वेदपाठकानां प्रार्थना॥ पूर्वदिशि ऋग्वेदपारायणार्थम् ॥ ऋग्वेदः पद्मपत्राक्षोगायत्रः सोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ ४ ॥ दक्षिण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिशि यजुर्वेदपारायणार्थम् ॥ कातराचोयजुर्वेदस्त्रैष्टुभोत्रिष्णुदेवतः ॥ काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ ५ ॥ पश्चिमादिशि सामवेदपारायणार्थम् ॥ सामवेदस्तु पिङ्गाक्षोजागतः शक्रदैवतः ॥ भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ ६ ॥ उत्तरादिशि अथर्ववेदपारायणार्थम् ॥ बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभोरुद्रदैवतः ॥ वैशंपायनविप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ ७ ॥ अमुककर्माणि अमुकदेवताया अमुकमन्त्राजपकर्मकर्त्तुं त्वामहं वृणे॥ ततोब्राह्मणान्मधुपर्कादिना संपूजयेत् ॥ अथ मधुपर्कविधिः ॥

टी षडर्घ्या भवन्ति आचार्यः ऋत्विक् जामाता राजा प्रियः स्नातकः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्चकः आसनमानाय्य आह ॐ साधु भवा- नास्तामर्चयिष्यामो भवन्तम् ॥ विष्टरम् पद्यम् पाद्यम् अर्घम् आचमनीयम् मधुपर्कम् दधि मधु घृतम् अपिहितं कांश्ये कांश्येन ॥ अर्चकेन दत्तं विष्टरं अर्च्यः- वर्ष्मोऽस्मीतिमन्त्रेणादत्ते- ॐ वर्ष्मोऽस्मि समानाना मुद्यतामिव सूर्यः। इमं तमभितष्ठामि योमा कश्चाभिदासति ॥ इति मन्त्रान्ते तस्मिन्विष्टरे अभ्युपविशति ॥

टी० साधु सुखं यथा भवति तथा आस्तां तिष्ठतु अर्चयिष्याम. पूजयिष्यामः भवन्तम् अर्चनीयं यावत् अर्चयिष्याम इति बहुवचनं भार्यापुत्रादिसर्वगृह्यापेक्षम् तथा च श्रुतिः–यत्र वा अर्हन्नागच्छति सर्वंगृह्या इव वै तत्र चेष्टयन्ति इति.

टी० आथर्वणोऽनुष्टुप् विष्टरः उपवेशने ॥ आत्मानं अर्घ्यत्वाय अर्च्यः स्तौति ॥ कुलज्ञानाचारवपुर्वयोगुणैरहं समानानां सजातीयानां मध्ये वर्ष्मः श्रेष्ठः ज्येष्ठः इति या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्चकेनार्पितं पाद्योदकमादाय वामं चरणं प्रक्षाल्य दक्षिणं प्रक्षालयति क्षत्रियादि रर्च्यः। यदि ब्राह्मणोऽर्च्यः स्यात्तदा प्रथमं दक्षिणं प्रक्षाल्य वामं प्रक्षालयति। विराजोदोहोऽसीति मन्त्रेण ॥ ॐविराजोदोहोऽसिविराजोदहमशीय मयि पाद्यायै विराजो दोहः॥

वत् अस्मि भवामि। उद्यतां उदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्यः इव किञ्च इमं। विष्टरं तं पुरुषमुद्दिश्य विष्टरवद्धं अभिलक्ष्यीकृत्य अभिभूय वा तिष्ठामि अधः कृत्वा उपरि उपविशामि यः कश्चन मा मां अभिदासति उपक्षीणं कर्तुमिच्छति। दसु उपक्षये ॥

टी० प्रजापतिर्यजुशयः पादयोः जलप्रक्षेपे ॥ प्राणधारणादिगुणैः सकलसौहित्येन विविधं राजते इति विराट् अन्नं तस्य विराजोदोहः परिणामसारो रसः स त्वं असि भवसि हेउदक तं त्वां विराजोदोहं अशीय-अश्नुव छान्दसो विकरणलोपः।किञ्च मयिविषये या पाद्या पादयोः साध्वी सपर्या तस्यै तदर्थं विराजोदोहः मन्त्रसंस्कृतं जलं भवेतिशेषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्चकदत्तमर्घ्यमृअर्च्यः-आपःस्थयुष्माभिरित्यनेनमन्त्रेण प्रतिगृह्णाति ॥ ॐआपः स्थयुष्माभिः सर्वान्कामानवाप्स्यानि ॥

अर्च्यः- समुद्रं वः प्रहिणोमीति मन्त्रेण अभिमन्त्रयते ॥ ॐसमुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टाअस्माकंवीरामापरासेचिमत्पयः ॥

टी० प्रजापतिर्यजुरापः अपामादाने ॥ हेआपः यतो यूयं आपः आप्तिहेतवः स्थ भवथ तस्माद्युष्माभिः कृत्वा सर्वानशेषांन् कामान् अभीष्टार्थान् अवाप्स्यानि लभेयम्॥ प्रतिगृहीतमर्घं शिरसाभिवन्द्य भूमौ प्रवाहयन् ॥

टी० आथर्वणोऽनुष्टुप् आपः अर्घप्रतिक्षेपे ॥ हेआपः शाधितार्थाः वो युष्मान् समुद्रं प्रहिणोमि गमयामि अतः स्वां योनिं स्वकारणभूतं समुद्रं अभिलक्ष्यीकृत्य गच्छत व्रजत किञ्च युष्मत्प्रसादाच्चास्माकं वीराः पुत्रा भ्रातरश्च अरिष्टा अनुपहताः सन्तु मत् मत्तः पयः अर्घादिमङ्गलं जलंमापरासेचि अपगतं मास्तु सदैवाहमर्घ्योभवानीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत अर्चकदत्तमाचमनीयं प्रतिगृह्य अन्यः आमागन्यशसेतिमन्त्रेण सकृज्जलमाचामतिद्विः तूष्णीम्॥ ॐ आमागन्यशसा सꣳसृज वर्चसातं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥

टी० परमेष्ठी बृहती वरुणः आचमने ॥ हेललेश वरुण तं एवं रूपेण त्वामाश्रितं मा मां यशसा आ अमा सह सहभावं सामीप्यं वा आ अगम् आगमय तथा वर्चसा ब्रह्मवर्चसेन संसृज संसृष्टं कुरु। किञ्च प्रजानां श्रेष्ठजनानां प्रियं श्रेष्ठं प्रीतं वा पशूनां गोश्वादीनां अधिपतिं स्वामिनञ्च तथा तनूनां देहावयवानां शरीरिणां वा अरिष्टिं अहिंसकं सुखजनकं वा कुरु। हिंसा च अनभ्यासेन वेदानामाचारस्य च लङ्घनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः अर्चकहस्तगतं उद्घाटितं मधुपर्कम् । मित्रस्येतिमन्त्रेण अर्घ्यः पश्यति ॥ ॐमित्रस्य त्वा चक्षुषा प्रतीक्षे ॥

तत अर्चकदत्तं मधुपर्कं देवस्यत्वेति मन्त्रेण अर्घ्योदाक्षिणहस्तेन प्रतिगृह्णाति ॥ ॐदेवस्य त्वा प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामि ॥

टी० प्रजापतिः पङ्क्तिर्मित्रोदर्शने ॥ हेमधुपर्क त्वा त्वां मित्रस्य मित्रदेवस्य चक्षुषा प्रतीक्षे पश्यामि ॥

टी० परमेष्ठी गायत्री सूर्योग्रहणे ॥ हेमधुपर्क सवितुर्देवस्य प्रसवे आज्ञायां वर्तमानोऽहं अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वा त्वां प्रतिगृह्णामि असमणिबन्धयोर्मध्यभागो दीर्घदण्डाकारोबाहुः पञ्चाङ्गुलियुक्ताग्रभागोहस्तः। अश्विनौ हि देवानामध्वर्यू पूषा हि देवानांभागधुक्। अतोग्रहणस्य-भनयोः स्वबाह्वोरश्विबाहुभावना कार्या।हस्तयोस्तु पूषहस्त-भावनेतिभावः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्च्यः तं मधुपर्कं वामहस्ते निधाय दक्षिणपा णेरनामिकाङ्गुल्या त्रिवारं आलोडयति। नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि ॥

ततः अनामिकाङ्गुष्ठेन त्रिवारं पात्राद्बहिर्निर्गमयति। ततः तस्यमधुपर्कस्यैकदेशमादाय यन्मधुनोमधव्यमित्यादिनामन्त्रेण अर्च्यः सकृत्प्राश्य पुनरनेनैवमन्त्रेण उच्छिष्ट एव द्वितीयं प्राश्य तथैव तृतीयं प्राश्नाति ॥ मधुवाता इति तिसृभिर्ऋग्भिः प्रतिमन्त्रं वा पूर्ववत्त्रिः

टी० प्रजापतिर्यजुरग्निर्निरुक्तणे ॥ हेअग्ने ते तुभ्यं नमः किंभूताय श्यावास्याय कपिशमुखाय ते तव अन्नशने अन्नाशने अद्यते इति अन्नं तस्याशने ह्रस्वश्छान्दसः आविद्धं संश्लिष्टं अनदनीयं यत् तन्निष्कृन्तामि निरस्यामि अतः शुद्धं अन्नं गृहाणेत्यर्थः ॥

टी० कुत्सो जगती मधुपर्को मधुपर्कप्राशने ॥ हेदेवा मधुनः मकरन्दस्य यन्मधव्यं मधूनि साधु परमं उत्कृष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राश्नाति ॐयन्मधुनोमधव्यं परम ६ रूपमन्ना
द्यं तेनाहं मधुनोमधव्येन परमेण रूपेणान्नाद्ये-
न परमो मधव्योऽन्नादोऽसानि ॥
ॐमधु वाता ऋतायते मधु क्षरन्ति सिन्धवः॥
माध्वीर्नः सन्त्वोषधीः ॥

रूपयति प्रकाशयति देहसंघातमिति रूपम्। अन्नाद्यं ब्रीह्यादि वत्प्राणधारकम् अन्नोपादानकं वा अन्नादिरसकदंबं वा तेन सर्वरूपात्मकेन रसेन उक्तविशेषणविशिष्टेन अहं परमः सर्वेभ्योगुणाधिकः मधव्यः मधुपर्कार्हः अन्नादः सदन्नभोक्ता च असानि भवानि ॥

टी० गौतमो गायत्री विश्वेदेवाः मधुपर्कप्राशने ॥
ऋतं यज्ञमिच्छतीति ऋतयति ऋयतीति ऋतयन् तस्मै ऋतयते यजमानाय वाता वायवः मधु मधुमन्तो रसवन्तो-वान्त्विति शेषः। ऋतयतीत्यत्र क्यचिचेति प्राप्तस्येत्वस्य नच्छन्दस्यपुत्रस्य इत्यभावः अश्वाघस्यादित्यश्वाघयोरेव क्यनच्छन्दस्यपुत्रस्य इत्यभावः अश्वाघस्यादित्यश्वाघयोरेव क्यच्यात्वविधानात्।अकृत्सार्वधातुकयोरित्यात्वमपि न,संहितायां तु छान्दसो दीर्घः।मधु मधुमानित्यत्र मतुब्दर्शनात्सर्वत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ मधु नक्तमुतोषसोमधुमत्पार्थिव ँ रजः मधु द्यौरस्तुनः पिता ॥ ॐ मधुमान्नोवनस्पतिर्मधु माँऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः॥

मधुसब्दाग्रे मतुवज्ञेयः।सिन्धवः स्यन्दमाना नद्यः समुद्रा वा मधु मधुमत् रसवत उदकं चरन्ति स्रवन्त्वित्यर्थः।तिङां तिङः इति लोटोलडादेशः ओषधीः ओषधयः नोऽस्माकं माध्वीः मधुररसोपेताः सन्तु ॥

टी० नक्तं रात्रिर्नोऽस्माकं मधु मधुमत् मधुररसोपेतमानन्दकरमस्तु उतापि च उषसो दिवसा अपि मधुमन्तः सन्तु,पार्थिवं रजः पृथिवीलोको मातृभूतोमधुमन्मधुररसोपेतमस्तु । पिता पितृभूतो योः द्युलोको मधु मधुमान्मधुररसोपेतोऽस्तु ॥

टी० वनस्पतिरश्वत्थादिर्नोऽस्माकं मधुमान् रसवान्यज्ञसाधनभूतोऽस्तु । सूर्यो मधुमान् संतापराहित्यलक्षणमाधुर्यरसोपेतोऽस्तु॥गावः यज्ञसाधनभूताः पशवः रश्मयो वा नोऽस्माकं माध्वीः मधुमत्योरसवत्योभवन्तु। रसोवै मधु इति श्रुतेः । वातादीनि रसवन्त्यस्माकं भोग्यानि भवन्ति इति सर्वोऽर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोमधुपर्कशेषं पूर्वस्यांदिशि असञ्चरदेशे त्यजेत् ॥ आचम्य प्राणान्संमृशति वाङ्मइत्यादिभिर्मन्त्रैः ॥ ॐ वाङ्मे आस्ये अस्तु इति मुखम् ॐ नसोर्मे प्राणोऽस्तुइतिनासिकाछिद्रद्वयं युगपत् ॐ अक्ष्णोर्मे चक्षुरस्तु इति अक्षिद्वयं युगपत् कर्णयोर्मेश्रोत्रमस्तु इतिदक्षिणं कर्णं अभिमृश्य ततोवाममनेनैवमन्त्रेण बाह्वोर्मेबलमस्तु इतिदक्षिणं बाहुं ततोवाममनेनैवमन्त्रेण उर्वोर्मेओजोऽस्तु इति उरुद्वयं युगपेदव अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु इति शिरः प्रभृतिपादान्तानि सर्वाङ्गानां युगपत् ॥

टी० मे मम वागिन्द्रियमास्येऽस्तु । नसोर्नासिकयोः प्राणः प्राणवायुः । अक्ष्णोर्नेत्रगोलकयोः चक्षुश्चक्षुरिन्द्रियम् श्रोत्रं श्रवणेन्द्रियम् । बलं शक्तिः ओजस्तेजः मे मम तनूः देहः तन्वा देहस्याङ्गानि च सह युगपत् अरिष्टानि अनुपहतानि सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐमधु नक्तमुतोषसोमधुमत्पार्थिव ँ रजः मधु द्यौरस्तुनः पिता ॥ ॐमधुमान्नोवनस्पतिर्मधु माँ ऽअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः॥

मधुसब्दाग्रे मतुवृज्ञेयः।सिन्धवः स्यन्दमाना नद्यः समुद्रा वा मधु मधुमत् रसवत् उदकं चरन्ति स्रवन्त्वित्यर्थः।तिङां तिङः इति लोटोलङादेशः ओषधीः ओषधयः नोऽस्माकं माध्वीः मधुररसोपेताः सन्तु ॥

टी० नक्तं रात्रिर्नोऽस्माकं मधु मधुमत् मधुररसोपेतमानन्दकरमस्तु उतापि च उषसो दिवसा अपि मधुमन्तः सन्तु,पार्थिवं रजः पृथिवीलोको मातृभूतोमधुमन्मधुररसोपेतमस्तु । पिता पितृभूतो योः द्युलोको मधु मधुमान्मधुररसोपेतोऽस्तु ॥

टी० वनस्पतिरश्वत्थादिर्नोऽस्माकं मधुमान् रसवान्यज्ञसाधनभूतोऽस्तु । सूर्यो मधुमान् संतापराहित्यलक्षणमाधुर्यरसोपेतोऽस्तु॥गावः यज्ञसाधनभूताः पशवः रश्मयो वा नोऽस्माकं माध्वीः मधुमत्योरसवत्योभवन्तु। रसोवै मधु इति श्रुतेः । वातादीनि रसवन्त्यस्माकं भोग्यानि भवन्ति इति सर्वोऽर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोमधुपर्कशेषं पूर्वस्यांदिशि असञ्चरदेशे त्य-
जेत् ॥ आचम्य प्राणान्संमृशति वाङ्मइत्या-
दिभिर्मन्त्रैः ॥ ॐ वाङ्मे आस्ये अस्तु इति
मुखम् ॐ नसोर्मे प्राणोऽस्तुइतिनासिकाछि
द्रद्वयं युगपत् ॐ अक्ष्णोर्मे चक्षुरस्तु इति
अक्षिद्वयं युगपत् कर्णयोर्मेश्रोत्रमस्तु इतिद-
क्षिणं कर्ण अभिमृश्य ततोवाममनेनैवमन्त्रेण
बाह्वोर्मेबलमस्तु इतिदक्षिणं बाहुं ततोवाममने
नैवमन्त्रेण उर्वोर्मेओजोऽस्तु इति उरुद्वयं यु-
गपदेव अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे
सह सन्तु इति शिरः प्रभृतिपादान्तानि स-
र्वाङ्गानां युगपत् ॥

टी० मे मम वागिन्द्रियमास्येऽस्तु । नसोर्नासिकयोः
प्राणः प्राणवायुः । अक्ष्णोर्नेत्रगोलकयोः चक्षुश्च क्षुरिन्द्रि-
यम् श्रोत्रं श्रवणेन्द्रियम् । बलं शक्तिः ओजस्तेजः मे मम
तनूः देहः तन्वा देहस्याङ्गानि च सह युगपत् अरिष्टानि
अनुपहतानि सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत आचान्तोदकाय अर्घ्यायशासमादाय गौरालभ्यतामिति अर्चकः आह अर्घ्यः अर्चकं प्रत्याह मातेत्यमुं मन्त्रम्॥ ॐमाता रुद्राणां दुहिता वसूनाᳬस्वसादित्यानाममृतस्य नाभिः प्र नुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट मम चामुष्य च पाप्मानᳬ हनोमि इति यद्या लभेत अथ यदि अर्घ्योगामुत्स्रष्टुमिच्छेत् मम चामुष्य पाप्मा हतः ॐ उत्सृजत तृणान्यत्विति उच्चै र्ब्रूयात् ॥

टी० ब्रह्मा त्रिष्टुप् गौः अभिमन्त्रणे ॥ मातेत्यादि निगदः अमृतस्य क्षीरस्य नाभिराश्रयः नु वितर्के छन्दांसि व्यवहिताश्चेति प्रवोचं प्रब्रवीमि चिकितुषे चेतनावते जनाय पुंमात्राय मह्यं मां तोष्टुं यूयं इमां मा वधिष्ट मा घ्नत किन्तु गोपशुं विघातुं घ्नतेतितात्पर्यार्थः । किंभूताम् । अनागां अनागसम् । अदितिंअखण्डनीयां देवमातरं वा पयोदानात् तदन्ते च ममेत्यादि हनोमीतिप्रयोगः कार्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोगन्धाक्षतपुष्पमालावस्त्राभरणादिभिः ब्रह्म जज्ञानमिति ब्राह्मणपूजनम् ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

आलंभनपक्षे अहं च मम अमुष्यार्चकस्यचपाप्मानं गोस्थाने हमोमि हन्मि इति अथेति पक्षान्तरे उत्सर्गपक्षे तु मम चामुष्य च पाप्मा हतः। ॐउत्सृजत तृणान्यन्तु इति उच्चैर्ब्रुयात् ॥

टी० ब्रह्मजज्ञानमिति त्रिष्टुप् वीत्पुपसर्ग आव इति क्रियापदेन संबध्यते। व्यवहिताश्चेति पाणिनिस्मरणात्। ब्रह्म ब्राह्मणः सीमतः सीमानं वेदशास्त्रमर्यादां आदाय ल्यप्लोपे पञ्चमी सुरुचः सुष्टु रोचन्ते शोभन्ते तान् सुरोचनानिमान् लोकान् विआवः विवृतानकरोत् वेदशास्त्रप्रकाशेन। कीदृशं ब्रह्म प्रथमं क्षत्रियादिवर्णेभ्यः प्रथमभूतम् पुनः कीदृशम् पुरस्ताज्जज्ञानं कल्पादौ परमेश्वरमुखाज्जायमानम् तथा च मन्त्रवर्णः ब्राह्मणोऽस्यमुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासीत् इति जनेः शानचिपशः श्लौ सति जज्ञानमिति रूपम् किञ्च वेनः कामनीयोमेधावी वा स ब्राह्मणः बुध्न्या बुध्नमन्तरिक्षं तत्र भवा बुध्न्या दिशः विवः वेदशास्त्रज्ञानद्वारा विवृणोति तथा सतश्चासतश्चयोर्निं कारणं विवः प्रकाशयति वृणोतेः शपि लुप्ते लङि गुणे च व इति रुपम् अडभावश्चार्षः बहुलं छन्दस्यमाङ्योगेऽपि इति वचनात् कीदृशीर्बुध्न्याः उपमाः उप समीपे मान्ति भूतानि यासु ता उपमाः सावकाशा इत्यर्थः अतएवास्य जगतोविष्ठाः विविधस्थानभूताः विविधं तिष्ठन्ति यासु ताः अम्बावगोभूमि इत्यादिना षत्वम् ब्राह्मण एव वेदशास्त्रादिभिर्लोकान् दिशोभूतानि सदसन्मार्गश्चाभिव्यनक्तीत्यर्थः॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणान्प्रार्थयेत् ।। ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः ।। वेदानां चैव दातारः पातारः सर्वदेहिनाम् ।। जपयज्ञैस्तथाहोमैर्दानैश्चविविधैः पुनः।।देवानां च पितॄणां च तृप्त्यर्थं पाठकाः कृताः।। येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्।।रक्षन्तु सततं तेऽस्मान् जपयज्ञेष्ववस्थिताः।। ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।। येषां वाक्यामृतेनैव शुद्ध्यन्ति मलिनोजनाः।।पावनाःसर्ववर्णानां ब्राह्मणाः ब्रह्मरूपिणः ।। सर्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा ।। यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः।। अङ्गीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः ।। यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ।। यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः ।। मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञे सदा पूज्याःसन्तु वै ।नियमान्विताः।।अक्रोधनः शौचपराः सततं ब्रह्मवादिनः।।ब्रह्मध्यानरता नित्ये प्रसन्नमनसः सदा ।। अदुष्टभाषिणः सन्तुमा सन्तु परनिन्दकाः।। ममापि नियमा ह्येते भवन्तु भवतामपि।।इति ब्राह्मणप्रार्थनायां विशेषवाक्यानि।।अथ पुण्याहवाचनम्।। गन्धपुष्पाक्षत ताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रीश्चतुरः पञ्च वा ब्राह्मणान् संपूज्य हस्ते फलादिकं गहीत्वा ।। ॐ तत्सत् विष्णुरित्यादि देशकालौ स्मृत्वा अद्येहामुकगोत्रस्यामुकशर्मणो मम गृहेऽमुककर्मणि भोब्राह्मणाः ॐ पुण्याहं भवन्तोऽब्रुवन्तु३ इति त्रिः श्रावयेत् ।। ते च ॐ पुण्याहमिति त्रिः प्रतिवचनं ब्रूयुः ।। ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।

टी० पुनन्तुमेति व्याख्याता ।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः पूर्ववत् अद्येहेत्पाद्युच्चार्य भोब्राह्मणाः ॐ स्वस्ति भवन्तोऽब्रुवन्तु इति त्रिः श्रावयेत्. ॐ स्वस्ति३ इति प्रतिवचनम् ॥ ॐ स्वस्ति न इन्द्रोवृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नोवृहस्पतिर्दधातु ॥२॥

टी० स्वस्ति न इन्द्र इति इन्द्रः नोऽ स्मभ्यं स्वस्ति अविनाशं शुभं दधातुः ददातु कीदृशः वृद्धश्रवाः वृद्धं महत् श्रवः कीर्तिर्यस्य स पूषा नः स्वस्तिददातु कीदृशः विश्ववेदाः विश्वं सर्वं वेदोधनं यस्य विश्वं वेत्ति वा विश्ववेदाः तार्क्ष्योरथोगरुडोवा नः स्वस्ति दधातु । कीदृशः । अरिष्टनेमिः अरिष्टा अनुपर्हिंसिता नेमिश्चक्रधारा पक्षो वा यस्य सः । वृहस्पतिर्देवगुरुर्नोऽस्मभ्यं स्वस्ति ददातु ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनःपूर्ववत् अद्येहेत्याद्युच्चार्य भोब्राह्मणाः ॐऋद्धिं भवन्तो ब्रुवन्तु इति त्रिः ॐ ऋद्ध्यताम्३ इति त्रिः प्रतिवचनम् ॥ ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम ॥ दिवं पृथिव्या अध्यरुमाहाविदाम देवान्स्वर्ज्योतिः ॥३॥

टी० सत्रस्य ऋद्धिरिति यजमानानामात्मस्तुतिः हे-सोम सत्रस्य यज्ञस्य ऋद्धिः समद्धिः त्वमसि अतोवयं यजमाना ज्योतिः आदित्यलक्षणमगन्मप्राप्ताः ततः अमृता अमरणधर्माणः अभूम भूताः पृथिव्याः सकाशाद्दिवं द्यु-लोकमध्यारुहाम अध्यारुढाः ततोदेवानिन्द्रादीनविदाम-जानामः पश्याम इत्यर्थः वेत्तेर्व्यत्ययेन तुदादित्वेल ङिरूपम् । ज्योतिर्ज्योतीरूपं स्वः स्वर्गम् चाविदाम ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः पूर्ववत् अद्येहेत्यादि उच्चार्य भोब्राह्मणाः ॐ कल्याणं भवन्तोब्रुवन्तु इति त्रिःप्रतिवचनम् ॥ ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्या ꣳ शूद्राया चार्यायच स्वाय चारणायँ च ॥ प्रियोदेवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादोनमतु ॥४॥

टी० यथेमां वाचमिति इमां कल्याणीमनुद्वेगकरीं यथा यतः आवदानि सर्वतोब्रवीमि दीयतां भुज्यतामिति सर्वेभ्योजनेभ्योवचिम । केभ्यस्तदाह ब्रह्मराजन्याभ्यां ब्राह्मणाय क्षत्रियाय च शूद्राय अर्याय वैश्याय स्वायात्मीयाय अरणोऽपगतोदकः शत्रुः नास्ति रणः शब्दोयेन सह वाक्संबन्धरहितः शत्रुरितिवा प्रियोदेवानां मध्येऽवसानरहितानुष्टुप् लौगाक्षिदृष्टा यथेति पूर्वोक्ते रत्र तथा शब्दोऽध्याहार्यः यतोऽहं ब्राह्मणादिभ्यः कल्याणीं वाचं वदामि । तथा ततोऽहं देवानां प्रियः भूयासम् । इह संसारे दक्षिणायै दक्षिणायादातुश्च प्रियः भूयासम् । देवा दक्षि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः पूर्ववत् अद्येहेत्याद्युच्चार्य । ॐश्रियं भवन्तोऽनुवन्तु ३ इति त्रिः ॐश्री ३ इति त्रिः प्रतिवचनम् ॥ ॐ मनसः काममाकूतिं वाचः सत्यमशीय ॥ पशूना ँ रूपमन्नस्य रसोयशः यशः श्रीःश्रयताम् ॥

णादातारश्च मयि प्रीतिं कुर्वन्त्वित्यर्थः किञ्च मे ममायं कामः समृद्ध्यातां सफलोभवतु । अयमिति नामनिर्देशः । धनपुत्रादिकामोमे संपद्यतामित्यर्थः । किञ्च अदोमामाप्नुपनमतु अद इति इष्टनामग्रहणम् देवदत्तादिर्मां प्रीणयतु४

टी० मनसः काममिति । अहं मनसः काममभिलाषम् आकुञ्चनमाकूतिः प्रयत्नस्तं चाशीय मद्वाक् सत्यं वदतु । मयि एतत्सर्वं श्रयतां तिष्ठतु पशूनां रूपं पशुसंबन्धिनी शोभा अन्नस्य रसः स्वादुत्वं यशः कीर्तिः श्रीर्लक्ष्मीश्च ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः पूर्ववत् अद्येहेत्याद्युच्चार्य । भोब्राह्मणाः ॐ शान्ति भवन्तोब्रुवन्तु इति त्रिः ब्राह्मणाः ॐ शान्तिः ३ इति त्रिः प्रतिवचनम्॥ॐद्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्ति रेव शान्तिः सा मा शान्तिरेधि॥६॥

टी० द्यौः शान्तिरिति। एकाधिका शकरी द्यौः द्युलोकरूपा या शान्तिः अन्तरिक्षरूपा या शान्तिः पृथिवी भूलोकरूपा या शान्तिः ओषधयः ओषधिरूपा या शान्तिः वनस्पतस्यः वृक्षरूपा या शान्तिः विश्वेदेवाः सर्वदेवरूपा या शान्तिः ब्रह्म त्रयीलक्षणं परं वा तद्रूपा या शान्तिः शान्तिरेव शान्तिः या स्वरूपतः शान्तिःसा शान्तिः मा मां प्रति एधि अस्तु । पुरुषव्यत्ययः आहुतिपरिणामेन सर्वं शान्तिरूपं मां प्रत्यस्तु इत्यर्थः यद्वा द्यौरित्यादिषु विभक्तिव्यत्ययः। सप्तम्यर्थे प्रथमा। द्यव्यन्तरिक्षे पृथिव्यामप्स्वोषधीषु वनस्पतिषु विश्वे देवेषु ब्रह्मणि सर्वस्मिश्च या शान्तिः सा मां प्रत्यस्त्वित्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ शान्तिरस्तु पुष्टिरस्तु । तुष्टिरस्तु । वृद्धिरस्तु । अविनघ्नमस्तु । आयुष्यमस्तु । शिवं कर्मास्तु । कर्मसमृद्धिरस्तु । वेदसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु । पुत्रसमृद्धिरस्तु । इष्टसंपदस्तु । अरिष्टनिरसनमस्तु । यत्पापं तत्प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु । उत्तरोत्तरकर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्त-उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम् तिथिकरणे मुहूर्त्ते सनक्षत्रे सग्रहे सदेवते प्रीयेताम् दुर्गापाञ्चाल्यौ प्रीयेताम् । अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्ः माहेश्वरीपुरोगा उमा मातरः प्रीयन्ताम् वशिष्टपुरोगाः ऋषिगणाः प्रीयन्ताम् अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ऋषयश्छन्दां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्याचार्या वेदा यज्ञाश्च प्रीयन्ताम्. ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्.श्रीसरस्वत्यौ प्रीयेताम्. श्रद्धामेधे प्रीयताम्. भगवती कात्यायनी प्रीयताम्. भगवती वृद्धिकरी प्रीयताम्. भगवन्तौ विघ्नविनायकौ प्रीयेताम्.भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयताम्. हरिहरहिरण्यगर्भाः प्रीयन्ताम्. सर्वा ग्रामदेवताः प्रीयन्ताम्. सर्वाः कुलदेवताः प्रीयतान्म्. हताश्चब्रह्मविद्विषः हताः परि पन्थिनः हता अस्य कर्मणोविघ्नकर्तारः शत्रवः पराभवं यान्तु. शाम्यन्तु घोराणि. शाम्यन्तु पापानि. शाम्यन्तीतयः शुभानि वर्द्धन्ताम्. शिवाः ऋतवः सन्तु. शिवा अग्नयः सन्तु. शिवा आहुतयः सन्तु शिवा ओषधयः सन्तु. शिवा वनस्पतयः सन्तु. शिवा अति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थयः सन्तु अहोरात्रे शिवे स्याताम् निकामे कल्पताम् शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताः आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् भगवान्नारायणः प्रीयन्ताम् भगवान्पर्जन्यः भगवान् स्वामी महासेनः प्रीयन्ताम् पुण्याहकान्वाचयिष्ये ब्राह्मणा वाच्यन्ताम् भोब्राह्मणा मम गृहे अस्य कर्मणः पुण्याहं भवन्तोब्रुवन्तु ३ इति स्वयं मन्दस्वरेणोक्त्वा तथैव तैरुक्ते पुनरेवमुच्चस्वरेणोक्ते तथैव तैरुक्ते ॥ इति महापुण्याहवाचनाविधिः॥ अथ कलशस्थापनाविधिः ॥ वेद्या ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं कलशं धान्योपरिस्थापयेत् ॥ तत्प्रकारश्च भूरसीतिभूमिशोधनम् ॥ ॐभूरसि भूमिरस्यादीतिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥१॥ धान्यमसीति धान्यं स्थापयेत् ॥ ॐधान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा ॥ दीर्घामनुप्रसितिमायुषे धां देवोवः सविता हिरण्यपाणिः प्रतिगृह्णात्वछिद्रेण पाणिनाचक्षुषे त्वा महीनां पयोऽसि ॥२॥

टी० भूरसीति व्याख्याता ॥ १ ॥

टी० धान्यमसीति । हेधान्य त्वं धान्यमसि धिनोति प्रीणातीति धान्यम् । हिविदिविधिविजिवि प्रीणनार्थाः कृत्यल्युटोबहुलम् इति कर्तरि ण्यत् निपातनादन्त्यस्य लोप इकारस्य चात्वम् यद्वा धाने पोषणे साधु तत्र साधुरिति यत् यद्वा दधाति पोषयतीति धान्यम् दधातेर्यत् नुट्चेति यत्प्रत्ययोनुडागमश्च । अतोदेवान् अग्न्यादीन् धिनुहि प्रीणय । प्रकर्षेण अनिति सर्वदा मुखे चेष्टते इति प्राणः उत् अनिति ऊर्ध्वं चेष्टते इत्युदानः उत्क्रान्तिश्वासवायुः व्यनिति व्याप्य चेष्टते इति व्यानोव्यापकोबलहेतुवायुः । हेधान्य त्वा त्वां प्राणाय प्राणदानार्थं स्थापयामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मीति शेषः एवमुत्तरमन्त्रयोर्योज्यम् । प्रसितिः पिञ्बन्धने प्रबन्धः कर्मसन्ततिः दीर्घा अविछिन्नां प्रसिति अनु कर्मसन्ततिं अनुलक्ष्य आयुषे यजमानस्यायुरभिवृद्धचर्थं हेधान्य त्वां धाम् दधामि दधातेर्लुङि बहुलं छन्दस्यमाङ्योगेऽपि इति अडागमाभावः । यजमानस्यायुर्वृद्धौ सत्यां कर्मसन्ततिः प्रवर्त्तते । प्रसितिः प्रसयनात्तन्तुर्वा इति यास्कोक्तेः। हेधान्यानि सप्तधान्याभिप्रायेण बहुवचनानि ज्ञेयानि। सविता देवः वोयुष्मान् अछिद्रेण पाणिना अंगुलिविश्लेषहीनेन प्रतिगृम्णातु स्वीकरोतु। हृग्रहोर्भश्छन्दसीति हस्य भः पात्रीप्रक्षेपसमये भूमौ पतनं माभूदिति सवितुर्ग्रहणं प्रार्थ्यते । किंभूतः सविता हिरण्यपाणिः हिरण्ययुक्तावंगुलीयाद्याभरणयुक्तौ पाणी यस्य स हिरण्यपाणिः यद्वा दैत्यैः प्राशित्रप्रहारेण छिन्नौ सवितुः पाणी देवैर्हिरण्मयौ कृत्वाविति सवितुर्हिरण्यपाणित्वमिति बरूचश्रुतौ कथा हेधान्य यजमानस्य चक्षुरिन्द्रियपाटवाय त्वा त्वां पश्यामीति शेषः । यद्वा चक्षुषे तव चक्षुरादिबाह्येन्द्रियदानाय त्वामीक्षे । हेधान्य महीनां भूम्यवयवक्षेत्राणां पयोऽसि रसभूतमसि ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आजिघ्र कलशमिति धान्योपरि अव्रणं कलशं स्थापयेत् ॥ ॐ आजिघ्र कलशं मह्यां त्वा विशन्त्विन्दवः ॥ पुनरुर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥३॥

टी० आजिघ्र कलशमिति। महापङ्क्तिः कुसुरुबन्दुदृष्टा। अष्टार्णाषट्पादा! हेमहि हेपृथ्वि!त्वं कलशं आजिघ्र आभिमुख्येनाघ्राणं कुरु दृढीकरणार्थं स्वीकुरु। किञ्च हेपृथ्वि! इन्दवः सोमाः कलशस्थाः त्वा त्वामाविशन्तु प्रविशन्तु। किञ्च ऊर्जा अन्नेन सह पुनः अस्मान्प्रति निवर्तस्व। या त्वमेवं मया स्तुता सा त्वं नोऽस्माकं सहस्रं धुक्ष्व सहस्रसंख्यं धनं देहि। दुहतिर्दानार्थः। किञ्च त्वत्प्रसादादुरुधारा बहुपयोयुक्ता पयस्वती धेनुर्मा मां आविशतात्। आगच्छत्वित्यर्थः। तथा रयि धनं पुनरपि मामाविशतात् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरुणस्योतम्भनमसीति तीर्थादिजलं कलशे प्रक्षिपेत्॥ ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥४॥

टी० वरुणस्योत्तम्भनमसीति। पञ्च यजूंषि वारुणानि॥ हेतीर्थजल! त्वं वरुणस्य वरुणदेवस्य उत्तम्भनमसि उत्कर्षेण स्तम्भनं भवसि। हेकलश देवते जलदेवते! युवां वरुणस्य स्कम्भसर्जनी तुल्ये स्थः भवथः। यथा शकटयुगे वद्धयोर्वलीवर्दयोर्गलवहिर्भागे काष्ठनिर्मिते शम्ये स्थाप्येते ताभ्यां वृषयोरितस्ततो गमनं निवार्यते। ततः ते स्कम्भसर्जनीशब्देनोच्येते तथा कलशदेवताजलदेवताभ्यामपि वरुणो धार्यते इति भावः। स्कम्भरोधने सर्ज अर्जने, स्कम्भनं स्कम्भो रोधः स सर्ज्यते क्रियते याभ्यान्ते स्कम्भसर्जन्यौ, विभक्तेः पूर्वसवर्णादीर्घः। हेजलदेवते! त्वं वरुणस्य ऋतसदन्यसि ऋताय यज्ञाय सद्यते उपविश्यते यस्यां सा ऋतसदनी, करणाधिकरणयोरिति ल्युप्रत्ययः। ऋतं यज्ञस्तन्निष्पत्यर्थं निवासस्थानभूतासीत्यर्थः। हेकलश! त्वं ऋतसदनं यज्ञार्थं निवासस्थानं असि। कलशस्तुत्रिषु द्वयोरित्यमरः। हेवरुण! त्वं वरुणस्य आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या ओषधीरिति सर्वौषधीः प्रक्षिपेत् ॥ ॐ या ओषधीः पूर्वा जाता देवेभ्य स्त्रियुगं पुरा ॥ मनै नु बभ्रूणामह ꣳ शतं धामानि सप्त च ।५।

त्मनः ऋतसदनं यज्ञार्थमाश्रयभूतं कलशजलं आसीद यजमानस्येष्टसिद्धयर्थं सुखेनोपविश ॥ ४ ॥

टी०या ओषधीरिति । युगशब्दः कालवाची । त्रयाणां युगानां समाहारः त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च पुरा सृष्टयादौ या ओषधी ओषधयः पूर्वाः प्रथमाःभाविनीभ्यःओषधीभ्य आद्या जाता उत्पन्नाः। किमर्थम् । देवेभ्य ऋतुभ्यः ऋतवोवै देवा इति श्रुतेः। ऋतवः ओषधीयुताः कर्त्तव्याः, एतदर्थम् बभ्रूणां जगद्भरणसमर्थानां पाकेन पिङ्गलवर्णानां वा तासामोषधीनां शतं सप्त च धामानि अहं मनै नु मन्ये एव जाने। मन्यतेर्लिटि आत्मनेपदे उत्तमैकवचने शपि एत ऐ इति रूपम् । संवत्सरोपलक्षितमेकैकस्थानं शतायुर्वैपुरुष इति श्रुतेः । शतं धामानि वर्षात्मकानि शिरस्थानि मुखश्रोत्रदृङ्नासाख्यानि सप्त स्थानानि च । य एवेमे सप्तशीर्षन् प्राणास्तानेतदाह इति श्रुतेः ।न -राणशत वर्षपयन्तमिन्द्रियाणामोषधीभिस्तर्प्यमानत्वाद्दोषं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्यगर्भ इति पञ्चरत्नानि ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ सदाधार पृथिवी द्यामुतेमां कस्मै देवाय हविषा विधेम ॥६॥

या फलिनीरिति पुगीफलादीनि ॥ ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानोमुञ्चत्व ꣳहसः॥७॥

धीनां तत्स्थानत्वम्। यद्वा शतं धामानि स्थानभेदाज्जातिभेदानसंख्यान विशेषतश्च सप्त भेदान् ग्राम्यानारण्यांश्च व्रीह्यादीन्निवारादींश्चाहं जाने ॥ ५ ॥

टी० हिरण्यगर्भ इति—हिरण्यं हितरमणीयं रत्नपञ्चकं तन्मयं ब्रह्माण्डं तस्य गर्भो ब्रह्मा ब्रह्माण्डप्रभवत्वात् । हिरण्यं कस्मादित्यादि हितरमणीयं भवति इति यास्कोक्तेः। अन्यत्पूर्वं व्याख्यातम् ॥ ६ ॥

टी० याः फलिनीरिति । याः ओषधयः फलिनीः फलिन्यः फलयुक्ताः याश्चाफलाः फलरहिताः याश्चापुष्पाः पुष्परहिताः याश्चपुष्पिणीः पुष्पिण्यः पुष्पयुक्ताः ताः सर्वा ओषधयो बृहस्पतिप्रसूताः बृहस्पतिप्रेरिताः सत्यो नोऽस्मान्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओषधयः इति यवान् ॥ ॐ ओषधयः समव- दन्तसोमेन सह राज्ञा।।यस्मै कृणोति ब्राह्मणस्त ६ राजन् पारयामसि ॥८॥

गन्धद्वारामिति चन्दनम् ॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

हसः पापाद्रोगरूपान्मुञ्चन्तु पृथक् कुर्वन्तु ॥ ७ ॥

टी० ओषधय इति । राज्ञा स्वस्वामिना सोमेन सह ओषधयः देवताः समवदन्त संवादं कृतवत्यः । कथं संवादस्तमाह । ब्राह्मणो यस्मै रुग्णाय कृणोति अस्मन्मूलादिना चिकित्सां करोति । कृतौ स्वादिः। हेराजन् ! हेस्वामिन् ! सोम ! तं रुग्णं नरं वयं पारयामसि पारयामः । इदन्तो- मसि सोमसंवादो व्याधिनाशदाढर्यार्थः ॥ ८ ॥

टी० गन्धद्वारामिति। गन्धो दिव्यगन्धो मर्त्यगन्धहीनः द्वारं लक्षणं यस्मात्तां दुराधर्षां केनापि धर्षितुमशक्यां विष्णुपत्नीत्वात । नित्यपुष्टां नित्यसदागुणलक्षणादिभिः पुष्टां समृद्धां करीषिणीम् कीर्यते इति करीषः कृविक्षेपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षन्नमीमदन्तेति अक्षता ॥ ॐ अक्षन्नमीमदन्त ह्यवप्रिया अधूषत अस्तोषतस्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी १०

कृत्दभ्यामीषन्निति ईषन्प्रत्ययः । तन्तु शुष्कं करीषोऽस्त्री इत्यमरः । शुष्कगोमयादिवतीम् गोमयादौ निवासत्वम् महाभारते प्रसिद्धम् । सर्वभूतानां सर्वप्राणिनां ईश्वरीमधिष्ठात्रीं तां श्रियम् । इह श्रीखण्डादिचन्दने उपह्वये तथाभूतं चन्दनं कलशे समर्पयामीति भाव; । यद्वा गन्धः घ्राणग्राह्यो गुण; द्वारं लक्षणं यस्यास्तां पृथिव्या गन्धलक्षणत्वात् । दुराधर्षां केनापि धर्षितुमशक्यां नित्यपुष्टां नित्यं सदा शस्यादिभिः पुष्टां समृद्धां करीषिणीं शुष्कगोमयादिस्वद्धतीम् गवाश्वादिबहुपशुसमृद्धामिति यावत् । सर्वभूतानां सकलप्राणिनां ईश्वरीमधिष्टात्रीं आधारभूतां वा तां भूरूपां श्रीयं इहउ पह्वये ॥ ९ ॥

टी० अक्षन्निति । अस्मिन्यज्ञे ये देवाः सन्ति तेऽस्माभिः कलशे क्षिप्ताः अक्षताः अक्षन् भक्षितवन्तः स्वीकृतवन्त इतियावत् । कथमेतदवगम्यते । हि यस्मात् अमीमदन्तहर्ष·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामाः अस्मदीयां भक्तिमवगम्य प्रियाः प्रीतियुक्ताः सन्त अधूषत स्वकीयं शिरः कम्पितवन्तः । यद्वा प्रियास्तनूरधूषत । किञ्च स्वभानवः स्वयं दीप्तियुक्ताः विप्राः मेधाविनः सन्तः नविष्टया नवतमया मती मत्या बुद्ध्या युक्ताः अस्तोषत स्तुतिं कृतवन्तः । अहो शोभना अत्तताः वह्योदत्ता अहो भक्तिरित्याद्यभिधानं स्तुतिः । अतो हेइन्द्र ! नु क्षिप्रं ते तव हरी एतन्नामकौ हरितवर्णावश्वौ योज गमनाय रथे योजय । तवाभीष्टायाः देवतृप्तेः संपन्नत्वात्तैर्देवैः सह त्वया गन्तव्यमित्यर्थः । अक्षन् अदेर्लुङि लुङ्सनोर्घस्लादेशः मन्त्रे घस इत्यादिना च्लेर्लुक् । गमहन इत्युपधालोपः । खरिचेति चर्त्वम् , शासिवसि इति पत्वम् , अडागमः । अमीमदन्त मदतृप्तियोगे चुरादिरात्मनेपदी लुङि णिलोपादौ रूपम् । अधूषत धूञ्कम्पने लुङि । सिचिव्यत्ययेनगुणाभावः । मती सुपां सुलुक्पूर्वसवर्णेति तृतीयायाः पूर्वसवर्णदीर्घः । युजियोगे ण्यन्ताल्लोटि छन्दस्युभयथा इति शप आर्धधातुकत्वात णेरनिटि इति णिलोपः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रिश्च ते लक्ष्मीश्चेति पुष्पम् ॥ ॐ श्रीच ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूप मश्विनोऽव्यात्तम् ॥ इष्णन्निषाणामुं मइषाण सर्वलोकं म इषाण ॥ ११ ॥

टी० श्रीश्चत इति । हेआदित्य! श्रीः लक्ष्मीः च ते तव पत्न्यौ जायास्थानीये त्वद्वश्ये इत्यर्थः। यया सर्वदेवमनुष्यादिजनाश्रयणीयो भवति। सा श्रीः संपदित्यर्थः। यया लक्ष्यते दृश्यते जनैः सा लक्ष्मी सौन्दर्यमित्यर्थः। कमलादिपुष्पेषु संपत् सौन्दर्ये वर्त्तेते, अत एव त्वयि पुष्पसमर्पणेन यजमानेषु संपत्सौन्दर्येष्टसिद्धिर्भूयादिति भावः। अहोरात्रे तव पार्श्वे पार्श्वस्थानीये। नक्षत्राणि गगनगास्ताराः तव रूपम्। तवैव तेजसा भासमानत्वात्। तेजसां गोलकः सूर्यो नक्षत्राण्यम्बुगोलका इति ज्योतिःशास्त्रोक्तेः। अश्विनौ द्यावापृथिव्यौ तव व्यात्तं विकाशितमुखस्थानीये अश्नुवाते व्याप्नुतस्तौ अश्विनौ। अश्विनौ द्यावापृथिव्यौ इमे हीदꣳसर्वमश्नुवातामिति श्रुतेः।य ईदृशस्तं त्वां याचे। इष्णन् कर्मफलमिच्छन् सन् इषाण इच्छ, इषु इच्छायाम् निकरणव्यत्ययः। यद्वा इषआभिक्ष्ण्यो क्र्यादि अत्रेच्छार्थः। किमेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काण्डात्काण्डादिति दूर्वा: ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुष परूषस्परि ॥ एवानोदूर्वे प्रतनु सहस्रेण शतेन च ॥१२॥

णीयं तत्राह—अमुं परलोकं मे मम इषाण मम परलोकः समीचीनोऽस्त्वितीच्छा अमोघेच्छा, अमोघेच्छत्वादिष्टं भवतित्यर्थः । सर्वं मे मम इषाण सर्वलोकात्मकोऽहं भवेयमितीच्छेत्यर्थः । शक्तो भवेयमित्यर्थः। सर्वं खल्विदं ब्रह्मेति सामश्रुतेः ॥११॥

टी० काण्डात्काण्डादिति । मूलैर्भूसंबद्धं पर्व काण्डं भूम्यसंबद्धं परुः, हेदूर्वे ! काण्डात्काण्डात्प्रतिकाण्डम् परुषः परुषः प्रतिपरुः भूमिसंबद्धासंबद्धेभ्यः सर्वपर्वभ्यः सकाशायथा त्वं परि समन्तात् प्ररोहन्ती अङ्कुरवती वर्तसे । नित्यंविप्सयोरिति वीप्सार्थे काण्डपरुषोर्द्वीत्वम् । एवेत्यव्ययसेवमित्यर्थे । निपातस्यचेति संहितायां दीर्घः हेदूर्वे ! एवं स्वाङ्कुरविस्तारवत् सहस्रेण शतेन च सहस्रशतशब्दावसंख्यार्थौ । असंख्यैः पुत्रपौत्रनप्त्रादिभिर्नोऽस्मान्प्रतनु विस्तारय ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्योनापृथिवीति सप्तमृत्तिकाः ॥ ॐ स्योना पृथिवि नो भवाऽनृक्षरा निवेशनी ॥ यच्छा नः शर्म स प्रथा ॥१३॥

अश्वत्थेव इति पञ्चपल्लवैस्तन्मुखमाच्छाद्य ॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाज इत्तीत्कलासथ यत्सनवथ पूरूषम्॥ १४॥

टी० स्योना पृथिवीति । हेपृथिवि ! त्वं नोऽस्माकं स्योना सुखरूपा भव । किंभूता त्वम् अनृक्षरा ऋक्षरः कण्टकः ऋच्छतेः कण्टकः कन्तको वा कण्टतेर्वा कृन्ततेर्वास्याद् गतिकर्मण इति यास्कः । तद्ग्रहणं चौरदायादादिदुःखनिवृत्त्यर्थम् न सन्ति ऋक्षराः कण्टकाः दुःखदायिनो यस्या सा अनृक्षरा तथा निवेशनी निविशन्ति जना यस्यां सा निवेशनी साधुप्रतिष्ठाना करणाधिकरणयोश्चेति ल्युट् । तथा सप्रथाः प्रथनं प्रथः विस्तारः प्रथया सह वर्तमाना सप्रथाः सर्वतः पृथुः किञ्च नोऽस्मभ्यं शर्म शरणं यच्छ देहि ॥१३॥

टी० अश्वत्थे व इति । हेपञ्चपल्लवदेवाः ! वो युष्माकं अश्वत्थे उपलक्षणत्वात् अश्वत्थादिवृक्षपञ्चके निषदनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

था नं भवति । किञ्च वो युष्माकं पत्रे पत्रेषु वसतिः स्थितिः कृत्वा हेपञ्चपल्लवदेवाः! यूयं कलशमुखे स्थिताः सन्तः गां सूर्यं स्वर्गं भूमिं जलं वा भजन्तीति गोभाजः इत् एव किल असथ भवथ। गौर्नादित्ये वलीवर्दे किरण-क्रतुभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि॥ नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु इति । किमर्थ-मिदमित्यत आह। यत् यस्मात् कारणात् पूरुषं यजमानं यूयं सनवथ सेवध्वमन्नदानेन पोषयथ । अर्थान्तरं वा । हेमरुतः वो युष्माकं अश्वत्थे निषदनं स्थानं भवति किञ्च वो यूष्माकं पर्णे पत्रे वसतिः कृता। मरुतोऽश्वत्थे तस्थुरिति श्रुतेः। अर्थस्तु मरुतः शुक्रज्योतिःप्रभृतयः अश्वत्थे पिप्पलवृक्षे तस्थुः स्थितवन्तः। अतएवाश्वत्थपत्राणां सदैव चाञ्चल्यम् । हेमरुतः! यूयं पञ्चपल्लवैः सह गोभाजः गां कलशजलं भजन्तीति गोभाजः! इत् एव किल असथ भवथ। यत् यस्मात्कारणात् पूरुषं यजमानं यूयं सनवथ सेवध्वमन्नदानेन पोषयथः। तस्मादश्वत्थादिस्थानमित्यर्थ। देवाधिष्टानादश्वत्थोऽर्के नतिप्रदक्षिणादिना पूज्यते। अस्तेः शपि असथेति रुपम् । ष्णतिसनवतिः परिचर्यार्थो १४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहस्यतेऽअतियदिति वस्त्रयुग्मेन कलशं वेष्ट-येत् ॥ ॐ बृहस्पतेऽअति यदर्यौऽअर्हाद्द्युम-द्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवस ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ उप-यामगृहीतोऽसि बृहस्पतये त्वैषये योनिर्बृह-स्पतये त्वा ॥ १५ ॥

टी० बृहस्यतेऽअति यदिति । वस्त्राणां बृहस्पतिदैव-तत्वात् । अत्र बृहस्पतिः स्तूयते । ऋतात् सत्यधर्मणोऽङ्गिरसो मुनेः सकाशात् प्रजातं प्रकृष्टं जन्म यस्य स ऋतप्रजातस्तस्यसंबोधने हेऋतप्रजात! हेबृहस्पते!बृहतां महतां वस्त्रादीनां वेदानां वा पते पालक तद्बृहतोरिति सुट्लोपौ। तत् चित्रं नानाविधं वस्त्रं द्रविणं धनं च अस्मासु यज-मानेषु धेहि धारय देहीत्यर्थः । तत्किम् । अर्यः स्वामी यद्धनं अत्यर्हात् अत्यर्हति अतिपूजयति अत्युपसर्गः अर्हात् इत्यनेन संबध्यते । लेटोऽडाटौ इत्याडागमः । अर्यः स्वामिवैश्ययोरित्यर्यशब्दः स्वामिन्यन्तोदात्तो, वैश्ये आद्यु-दात्तः । ईश्वरयोग्यं धनं देहीत्यर्थः । यद्धनं जनेषु लोकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अम्बे अम्बिके इति आम्रपल्लवैस्तन्मुखमाच्छा-
द्य ॥ ॐ अम्बेअम्बिकेऽम्बालिके नमानयति
कश्चन स ससस्त्यश्वकः सुभाद्रिकां काम्पिलवा-
सिनीम् ॥१६॥

विभाति विविधं शोभते । कीदृशं धनम् द्युमत् द्यौः का-
न्तिरस्यास्तीति द्युमत् । दिवउश्च इत्युकारः । क्रतुमत् क्रत-
वो यज्ञा विद्यन्ते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं
देहीत्यर्थः । यद्धनं शवसा शव इति बलनाम बलेन दीद-
यत् दापयति प्रापयति वा धनानन्तरं तद्धनं देहीत्यर्थं ।
दयदानगतिर्हिंसादानेषु अस्माण्णिजन्ताल्लुङि रूपम् ।
अडभाव आर्षः । अतः परं यजुः नियतपादाक्षरावसाना
ऋक् । अनियतपादाक्षरावसानं यजुः, हेवस्त्रविशेषा उपयामः
पात्रविशेषः तेन गृहीतोऽसि बृहस्पतयेऽर्थाय त्वा गृह्णासि
स्थापयति । एष ते योनिः स्थानम् बृहस्पतये त्वां साद-
यामि ॥१५॥

टी० अम्बेअम्बिकेऽम्बालिके इति । अम्बेअम्बिके
इत्यत्र आपो जुषाणोवृष्णोवर्षिष्टेऽम्बेम्बालेऽम्बिके पूर्वे इति
प्रकृतिभावः । अम्ब्यते कीर्त्यते इति अम्बा तत्संबुद्धौ हे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अम्बे अविशब्दे गुरोश्च हल इत्यप् प्रत्ययः टाप् । अम्बैव अम्बिका तत्संबुद्धो हेअम्बिके! स्वार्थे कन्। अम्बालिके अविशब्दे बाहुलकात्कालन्प्रत्ययः । अम्बाला अम्बालेव अम्बालिका तत्संबोधने हेदुर्गे! कश्चन नरः काम्पीलवासिनीं कमितिमान्तमव्ययम् । पीलतीति पीलः पीलप्रतिष्टम्भे ईगुपधेति कः । कम् शिरः सुखवारिषु इति विश्वकोषाभिधानात् । कम् जलस्य पीलः अधारकत्वेन प्रतिष्टम्भकरुपो यज्ञकलशः कम्पील इत्युच्यते । यद्वा पयनं पीः पानं पीङ्पाने संपदादिः, कम् जलस्य पीः कम्पीः तां लातीति कम्पीलो यज्ञकलशः आतोऽनुपसर्गे क इति कः। कम्पीलस्य इदं काम्पीलं कलशमुखादि तस्मिन् वसति तच्छीला काम्पीलवासिनी विष्वादिदेवता* कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रित इत्यादिवचनात् । ताम् न मानयति आम्रपल्लवादिभिर्नपूजयति मानपूजायाम् चुरादिः स नरः अश्वकः अश्व इव प्रतिकृतिः अश्वकः । अदाम्याश्च तुल्यः सन् ससस्ति शेते दुःखे पततीत्यर्थः । ससस्वप्ने ह्वादिः कीदृशी काम्पिलवासिनीम् सुभद्रिकां शो-

---

*आदिश्चासौ देवता आदिदेवता विष्णुश्चासौ आदिदेवता विष्णादिदेवता तदनन्तरं रुद्रादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः कलशे गङ्गादितीर्थान्यावाहयेत् ॥ ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयान्तु यजमानस्य दुरितक्षयकारकाः॥ ॥ ततः कलशं स्पृष्ट्वाभिमन्त्रयेत् ॥ ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ॥ मूलेत्व- स्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ॥ ऋग्वेदोऽथ यजुर्वेदः समावेदोऽप्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥ ततः कलशप्रार्थना ॥ ॐ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दित्या वसवो रुद्रा विश्वे देवाःसपितृकाः॥त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे भलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ इति ॥ अथ दीपपूजा ॥ स्थिरोभवेति प्रज्वाल्य ॥ ॐ स्थिरोभव वीड्वङ्ग आशु र्भवाज्यर्वन् ॥ पृथुर्भव सुषदत्वमग्रेपुरीषवाहणः ॥स्थिरोभवेति व्याख्याता ॥ पृष्ठोदिवीति पूजनम् ॥ ॐ पृष्ठोदिवि पृष्ठोऽग्निः पृथिव्यां पृष्ठो विश्वाओषधीराविवेश।वैश्वानरः सहसा पृष्ठोअग्निः स नो दिधा सरिषस्पातु नक्तम्॥

टी० पृष्टोदिवीति ॥ वैश्वानरदेवत्या त्रिष्टुप् कुत्सदृष्टा वैश्वानरः सर्वनरेभ्यो हितरूपोऽग्निर्दिवा दिवसे ,नोऽस्मान् पातु रक्षतु, स च नक्तं रात्रौ नः पातु, सर्वदास्मान् रक्षत्वित्यर्थः । स कः योऽग्निर्दिवि द्युलोके पृष्टः कोऽयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मादित्यात्मना तपतीति मुमुक्षुभिः पृष्टः । यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद्ब्रह्म इति श्रुतेः । यश्चाग्निः पृथिव्यामन्तरिक्षलोके पृष्ट• कोऽयं विद्युदात्मना स्थित इति जलार्थिभिः । आन्तरीक्षमामसु पृथिवीति पठितम् । यश्च विश्वा ओषधीः सर्वा व्रीह्याद्योषधीः आविवेश प्रविशति प्रविष्टः सन् पृष्टः कोऽयं प्रजानां जीवनहेतुस्तापपाकप्रकाशैरुपकरोति यश्च सहसा बलेनाऽध्वर्युणा मथ्यमानः सन् पृष्टः जनैः कोऽय मथ्यते इति । सोऽयमग्निर्दिवा नक्तं रिषोर्वधात् पातु । रिषतिर्हिंसाकर्मा मास्माऽआश यत्विन्त्यर्थः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ गणेशपूजा ॥ ॐ अद्येत्यादि अमुकक- र्मनिर्विघ्नपरि समाप्त्यर्थममुककर्माङ्गतया गणे- शपूजनमहं करिष्ये इति संकल्प्य, गणानां त्वेति हेहेरम्बेत्यादींश्च पठन्नावाहयेत् ॥ ॐ गणा नांत्वागणपति॑ᳯहवामहे प्रियाणां त्वा प्रियपति॑ ᳯ हवामहे निधीनां त्वा निधिपति॑ ᳯ हवा- महे वसो मम ॥ आहमजानि गर्भधमा त्वम- जासि गर्भधम् ॥ २० ॥

टी० गणानां त्वेति प्रजापतिदृष्टं गणपतिदेवताकं यजुः । हेगणेश वयं त्वा त्वां हवामहे पूजनार्थं आह्वयामः, व्हेञोलिटि बहुलं छन्दसीति संप्रसारणम् । कीदृशं त्वाम् गणानां प्रमथगणानां मध्ये गणपतिं गणरूपेणपालकम्। यद्वा हेअगण गण्यते इति गणः गण संख्याने अस्माद- घञ् अल्लोपस्य स्थानिवत्वान्नवृद्धिः नगणः अगणः गणभा- वरहितः सर्वान्तर्यामित्वान्निर्गुणपरब्रह्मरूप स्तत्संबुद्धौ हेअ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गण हेगणेश यतो गणानां देवादिगणानां महदादितत्त्वगणानां ब्रह्मविष्णुरुद्रगणानां सगुणनिर्गुणब्रह्मगणानां च पतिं पालकम् हवामहे आह्वयामः। गणपतिं तत्तद्गणरूपेण पालकं वा हेप्रिय सर्वप्रिय गणेश! प्रियाणां प्रियभूतानां भक्तानां पतिं पालकम् । प्रियपतिं प्रियरूपेण पालकं वा हवामहे आह्वयामः। निधीनां महापद्मशंखपद्मादिनिधीनां सुखनिधीनां वा निधिपतिं सुखनिधिरूपेण पालकम् हवामहे आह्वयामः। हेवसो यज्ञमध्ये विघ्नहर्तृत्वेन वसतीति वसुः तत्संबुद्धौ हेवसो! हेगणेश! मम त्वं विघ्नहर्ता भूया इति शेषः। हेगणेश! गर्भधं गर्भं उदरमध्ये दधाति विश्वं धारयतीति गर्भधः तं त्वामहं आ अजानि आ शाकल्येन जानामि लंबोदरत्वात्। अजगतिक्षेपणयोः लोट् गत्यर्थत्वेन ज्ञानार्थत्वात। स्वोदरे सर्वस्यापि प्रतिष्ठितत्वात् स्वस्य न कस्याप्युदरस्थत्वात् स्वोदरोद्भवसर्वजनत्वात् स्वस्य नकस्याप्युदरभवत्वाच्च । तथा च स्मृतिः। लंबोदरोऽयमेकश्च वेदे संकथितोऽभवत ॥ न वर्म तादृशा वेदे लंबोदरप्रवाचकाः॥ तस्योदरात्समुत्पन्नं नानाविश्वं न संशयः॥ नानाब्रह्म तथेशश्च अन्ते तत्र स्थितोऽभवत् ॥ अतः सर्वामध्ये कलांशरूपेण क्रीडते गणनायकः॥ अतः सर्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिपूज्यश्च सर्वपूज्यो वभूवह ॥ सर्वेषां जनको माता तथा सर्वप्रदायकः ॥ तत्र किं संशयं विप्राः कुरुथ ब्रह्मणस्प तौ॥ ननु वेदप्रामाण्येषु पुराणेषु शिवसुतो गणेशोऽतः शिवः श्रेष्ठो गणेशजनकत्वात् ! कुतो ब्रह्मविष्णुरुद्रादिभ्यो गणेशः श्रेष्ठ इति चेत् त्वं भ्रान्तोऽसि।शृणु गणेशेन सृष्टाः शिवादयस्तपः चक्रुः। तत्रादौ शिवं हृदि ब्रह्मानुभवो वभूव। समाधिक्रियाधिक्यान।ततो हृदि गणेशं ददर्श संस्तुत्य प्रार्थना॥ चकार। त्वं मे पुत्रो भव त्वत्प्रितृतारकत्वात् । तदहं मायामोहभयहीनश्चरामि गणेशजनकत्वात्,एतत्सत्यमुक्तम् । विनायकसंहितायां मयुरेशक्षेत्रमाहात्म्ये—ध्याने मनसि मे जातः पुत्र त्वं पालय प्रभो॥मम पुत्र इति ख्यातो लोकेऽस्मिन्भगवन्भव । इत्यादिस्मृतिभ्यः त्रिगुणावतारैर्ब्रह्मविष्णुशिवाख्यैरवध्यविघ्नासुरनाशनार्थं कलांशगणेशावतरणं सर्वत्र प्रसिद्धम् । तदवतारचरित्रज्ञापनार्थत्वादत्रशिवसुत इति कथितः। किञ्च। विष्णवथर्वशीर्षे । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः इति श्रुतेः देवकीपुत्रत्वेन विष्णोर्नकनिष्ठत्वापत्तिरत एव गणेशस्य शिवसुतत्वेन कनिष्ठत्वापत्तिः भक्तवाञ्छितकृतत्वात् भक्ताधीनदेवेशत्वात् गणेश इति सत्यसनातनजनकत्वाच्च॥तथा च श्रुतिः"ॐगणेशोवै ब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्विद्यान्नदिदं किञ्च सर्वं भूतं भव्यं जायमानञ्च तत्सर्वं मि त्याचक्षते । अस्मान्नातः परं किञ्चित् यो वेद सवेद ब्रह्म ब्रह्मैवाप्नोति तत्सर्वमित्याचक्षते इति ॥ एतत्सर्वं स्पष्टमुक्तं गणपत्यथर्वशीर्षभाष्ये सायणाचार्येण ॥ आ त्वमजासि गर्भधम्, गीर्यते स्तूयते स्तुतियोग्योभवतीति गर्भो गणेशस्त दधाति हृदि धारयतीति गर्भधस्तथाभूतं भक्तं मा आ अजासि जानासि अनेकब्रह्माण्डैर्लम्बमानोदरत्वेन लंबोदरनामानं त्वां ध्यायन्तं मां जानासि अतस्त्वां पूजयामीति भावः । गृणातेर्भप्रत्ययः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ हेहेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज॥
सिद्धिबुद्धिपते त्र्यत्त लत्तलाभायितः पितः॥
नागास्य नागहार त्वं गणराज चतुर्भुजः॥
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः॥
आवाहयामि पूजार्थं रत्तार्थञ्च मम क्रतोः॥
इहागत्य गहाण त्वं पूजां क्रतुं च रत्त माम्॥
इत्यावाह्य॥ ॐ भूर्भुवः स्वः गणपतये सिद्धिबु-
द्धिसहिताय सवाहनाय सपरिवाराय इदमासनं
समर्पयामीति षोडशोपचारैः संपूजयेत्॥ तद्यथा
आसनम् पाद्यम् अर्घ्यम् आचमनीयम् यज्ञोपवी
तम वस्त्रम् चन्दनम् दूर्वा अत्तताःधूपः दीपः नैवे
द्यम आचमनीयम ताम्बूलम् वस्त्रालङ्कारादियज्ञ
ोधम् दत्तिणाद्रव्यम् पादवन्दनम् एभिः संपूज्य
नारिकेलादिफलम् सवस्त्रं पुरतः पात्रे निधाय
स्तुतिं कुर्यात्॥ ॐरत्त रत्त गणध्यात्त त्र्यत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्त्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ॥ वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥ अनेन फलदानेन फलदोऽस्तु सदा मम ॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ इति फलं निवेदयेत् ॥ अथ रक्षाबन्धनपूजा ॥ यव दूर्वा सर्षप चन्दन गोमय दधि सहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत् । ॐ पूर्वे रक्षतु गोविन्द आग्नेयां धरणीधरः ॥ याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥ वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ॥ उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ॥ ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु महीश्वरः ॥ एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥ यज्ञाग्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ हेहेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज॥
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितः पितः॥
नागास्य नागहार त्वं गणराज चतुर्भुजः॥
भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः॥
आवाहयामि पूजार्थं रक्षार्थञ्च मम क्रतोः॥
इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष माम्॥
इत्यावाह्य॥ ॐ भूर्भुवः स्वः गणपतये सिद्धिबुद्धिसहिताय सवाहनाय सपरिवाराय इदमासनं समर्पयामीति षोडशोपचारैः संपूजयेत्॥ तद्यथा आसनम् पाद्यम् अर्घ्यम् आचमनीयम् यज्ञोपवीतम् वस्त्रम् चन्दनम् दूर्वा अक्षताः धूपः दीपः नैवेद्यम् आचमनीयम् ताम्बूलम् वस्त्रालङ्कारादियक्षन्धम् दक्षिणाद्रव्यम् पादवन्दनम् एभिः संपूज्य नारिकेलादिफलम् सवस्त्रं पुरतः पात्रे निधाय स्तुतिं कुर्यात्॥ ॐ रक्ष रक्ष गणाध्यक्ष त्र्यक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्त्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ॥ वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥ अनेन फलदानेन फलदोऽस्तु सदा मम ॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ इति फलं निवेदयेत् ॥ अथ रक्षाबन्धनपूजा ॥ यव दूर्वा सर्षप चन्दन गोमय दधि सहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत् । ॐ पूर्वे रक्षतु गोविन्द आग्नेयां धरणीधरः ॥ याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋत्ते ॥ वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ॥ उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ॥ ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु महीश्वरः ॥ एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥ यज्ञाग्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रक्षताच्छंखः पृष्ठे वै पद्ममुत्तमम् ॥ वामपार्श्वे गदारक्षेद्दक्षिणे तु सुदर्शनः। उपेन्द्रः ब्रह्माण माचार्यं पातु वामनः॥ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमधोक्षजः॥ कृष्णोरक्षतुसामानमथर्वाणञ्च माधवः ॥ उपविष्टाँ श्चविप्राँस्तानिरुद्धोऽभिरक्षतु॥ यजमानं सपत्नीकं पुण्डरीकाक्ष एव तु ॥ रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः॥ वेदमन्त्रैश्च कर्त्तव्या रक्षा शुभ्रैस्तु सर्षपैः ॥ कृत्वापोटलिकां पूर्वं वध्नीयाद्दक्षिणे करे॥इति ततोवक्ष्य माणमन्त्रैः पूजयेत्॥ॐरक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्टयोयममात्योनिचखानेदमहं तं वलगमुत्किरामि यं मे समानोयमसमानोनिचखानेदमहं तं वलगमुत्किरामि यं मे सवन्धुर्यमसवन्धुर्निचखानेदमहं तं वलगमुत्किरामि यं मे सजातोयमसजातोनिचखानोत्कृत्यां किरामि ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जन-
राडसि रक्षोहा सर्वराऽस्यमित्रहा ॥ ॥
ॐरक्षोहणोवोवलगहनः प्रोक्षामि वैष्णावा-
न्रक्षोहणोवोवगलहनोवनथामि वैष्णवान्नक्षो
हणोवोवलगहनोवस्त्रिणामि वैष्णवान्नक्षोहणौ
वां वलगहना उपदधामि वैष्णवी रक्षोहणौ
वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि
वैष्णवास्थ ॥ ॥ ॐसप्तऋषयः प्रतिहिताः
शरीरे सप्त रक्षन्ति सदमप्रसादम् ॥ सप्तापः
स्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौ स-
त्रसदौ च देवौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टी० रक्षोहणमिति। रक्षोहणं रक्षांसि हन्तीति रक्षोहा तां रक्षोवधविजयाम्। तथा वलगहनं वलगान् हन्तीति वलगहा ताम् बहुलं छन्दसीति क्विप्। पराजयं प्राप्य पलायमानैराक्षसैरिन्द्रादिवधार्थमभिचाररूपेण भूमौ निखाताः अस्थिकेशनखादिपदार्थाः कृत्याविशेषा वलगाः वलगोवृणोतेरिति यास्कः यस्य वधार्थं क्रियते तं रोगादिभिर्वृणवन्नाच्छादयन् गच्छतीति वलग इत्युच्यते। वैष्णवीं विष्णुदेवत्यां यज्ञरक्षकस्य विष्णोः संबन्धिनीं रक्षणकर्त्रीं रक्षाम् पूजयामीति शेषः। अथवा वैष्णवीं वाचं रक्षाबन्धनपूजनार्थं इन्द्राय वदेति वाक्यशेषः॥ ष्टयैस्त्यै शब्दसंघातयोः। नितरांस्त्यायति संघातरूपेण सह वर्त्तते इति निष्ट्यः। यद्वा निर्गत्य शरीरात् स्त्यायति विस्तीर्णोभवतीति निष्ट्यः पुत्रादिः। यद्वा निर्गतो वर्णाश्रमेभ्यो निष्ट्यः चाण्डालादिः। निसो गते इति वार्तिकेन निस उपसर्गाद्गतार्थे त्यप् इति काशिकायाम्। अमाशब्दोगृहार्थः सहार्थो वा। अमा गृहे सह वा भवोऽमात्यः। अव्ययात्यप् इति भवार्थे त्यप्। धनिकस्य स्वामिनो धनगृहादिनिर्वाहकोऽमात्यः। केनापि निमित्तेन कुपितः पुत्रोऽमात्योवा मे मह्यं मद्वाधार्थं यं वलगं निचखान निखातवान् तं वलगमहमुत्किरामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्वपामि उद्धृत्यान्यत्र परिज्यजामि। इदं शब्दः क्रिया-विशेषणम्। इदं रक्षाबन्धनपूजनं यथा भवति तथा भाव-नयोद्वपामीत्यर्थः। समानोधनकुलादिभिः सदृशः, असमानोन्यूनोऽधिकोवा अन्यत्पूर्ववत्। सबन्धुः कुलशीला-दिभिः समानः मातुलपैतृष्वस्रेयादिः, तद्विपरीतोऽसबन्धुः। अन्यत्पूर्ववत्। सजातः समानजन्मा भ्राता तद्विपरीतोऽस-जातः अन्यत्पूर्ववत्। येयं कृत्या शत्रुभिरभिचरद्भिः संपा-दिता वलगरूपा रक्षाबन्धनपूजनकर्मणा तामुत्किरामि उद्धृत्य दूरे क्षिपामि॥ ॥ खण्डसीति। हेरक्षे त्वं स-ण्डसि स्वैनैव राजते इति स्वराड् स्वयमेवराजमाना असि दीप्यमाना भवसि, अतः सपत्नहा शत्रुघातिनी भवेति शेषः।सत्रराट् सत्रेषु यज्ञेषु पूजनतया राजते इति सत्रराट् असि, अभिमातिहा शत्रुघातिनी भव। जनराट् जनेषु यजमा-नेषु करवेष्टनेन राजते इति जनराट्। रक्षोहा यज्ञविनाशक राक्षसघातिनी, सर्वराट् सर्वेषु ब्राह्मणादिवर्णेषु राजते इति सर्वराट्, अमित्रहा शत्रुघातिनी भव॥रक्षोहणोव इति सप्त यजूंषि वैष्णवानि। वैष्णवान् विष्णुदेवताकान् रक्षाबन्धन-सूत्रविशान् वः पुष्पान् प्रोक्षामि, कीदृशान्? रक्षोहणो राक्ष-सहन्तॄन्, वमलहनः अभिचारसाधनहन्तॄन्। अवनयामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रोक्षणशेषोदकेन सिञ्चामि ।अवस्तृणामि दर्भैराच्छादयामि, उदग्रास्थापयामि, वैष्णवी वैष्णव्यौ लिङ्गव्यत्ययः । प्रस्तृणामि पुष्पादिभिः परितः छादयामि । हेरम्बबन्धन त्वं वैष्णवमसि यज्ञरक्षकविष्णुसंबन्धि भवसि हेरम्बबन्धन सूत्रविशेषाः यूयं वैष्णवाः स्थ यज्ञरक्षकविष्णुसंबन्धिनो भवथ। एकद्विबहुवचनानि रक्षणकर्तृत्वेनबहुतरमान्यत्वेन ज्ञेयानि॥सप्त ऋषिय इति अध्यात्मवादिनी जगती। सप्त ऋषयः प्राणाः त्वक्चक्षुःश्रवणरसनाघ्राणामनोबुद्धिलक्षणाः शरीरे प्रतिहिताः व्यवस्थिताः ते एव सप्तमदं सदाकालं अप्रमादं सावधानं यथा भवति तथा रक्षाबन्धनेन शरीरं रक्षन्ति ते सप्त स्वपतो नरस्य लोकमात्मानमीपुः प्राप्नुवन्ति लोकशब्देन विज्ञानात्मा हृदयाकाशप्रतिष्ठितः उच्यते । किंभूताः सप्त आपः आप्नुवन्ति देहमित्यापः व्यापनाः तत्र तस्यामुपरि लोकगमनावस्थायां देवौ दीप्यमानौ प्राणापानौ जागरणं कुर्वाते। कीदृशौ अस्वप्नजौ नस्वप्नो निद्रा जायते ययोस्तौ अस्वप्नजौ। तथा सत्रसदौ सतां जीवानां त्राणं रक्षणं सत्रं तत्र सीदतः तौ सत्रसदौ जीवितदातारावित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति रक्षाबन्धनपूजा ॥ ततः कलशस्कन्धप्रदेशे ॐ गणपति सूर्य देवी शिव विष्णून् विनायक दुर्गा वाय्वाकाशाश्विनिकुमारान् सूर्य सोम भौम बुध बृहस्पति शुक्र शनि राहु केतून् ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तान् अग्निअप् भूमिविष्णुइन्द्राणीप्रजापतिसर्पब्रह्मणः, इन्द्राग्नीयमनिऋृतिवरुणवायुसोमेशानब्रह्मानन्तान् धात्रादिद्वादशादित्यान् वीरभद्राद्येकादशरुद्रान् गौर्यादिषोडशमातॄः आवहादिसप्तमरुतः विनायकब्रह्मविष्णुरुद्रार्कवनस्पतीन् आवाह्य यथा लिखितोपञ्चोपचारैः षोड़शोपचारैर्वा पूजयेत् ॥

टी० प्रसङ्गवशात् धूपदीपनैवेद्यमन्त्राणांव्याख्यानं क्रियते धूरसीति धूपं दद्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओँ धूरसि धूर्व धूर्वन्तं धूर्वतं तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः। देवानामसि वन्हितमᳬसस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥

टी० धूरसीति हे धूप त्वं धूः असि धूर्वतीति धूः असि हिंसको भवसि। धुर्वीहिंसायाम् आजमासेति क्विप् राल्लोप, र्वोरिति दीर्घः। यतो धूरसि अतः धूर्वन्तं हिंसन्तं पाप्मानं धूर्व विनाशय, किञ्च राक्षसादिर्यागविघ्नेन अस्मान्धूर्वति हिंसितुमुद्युक्तस्तमपि धूर्व विनाशय। यञ्च वयं धूर्वामः तमपि धूर्व। यं आलस्यादिरूपं वैरिणं वयमनुष्ठातारो धूर्वामः हिंसितुमुद्यतास्तमपि धूर्व विनाशय। हे आज्य त्वमपि देवानां वन्हितमं असि, वहप्रापणे वहतीति वन्हि अतिशयेन वन्हि वन्हितमं देवानां अतिशयेन प्रीतिप्रापकं भवसि तथा सस्नितमं ष्णाशौचे अतिशयेन शुद्धम् आदृगमइत्यादिना क्रिप्रत्ययःपप्रितमं प्रापूरणे अतिशयमिष्टरसेन पूरितम् जुष्टतमं जुषीप्रीतिसेवतोयोः देवानां अतिशयेन प्रियम्, देवहूतमं ह्वेञ्स्पर्धायां शब्दे च देवान् ह्वयतीति देवहूः अतिशयेन देवहूःदेवहूतमम्, देवानामतिशयेनाह्वातृ त्वां दृष्ट्वा देवा आहूता इव शीघ्रमागच्छन्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रमा मनस इति दीपं दद्यात ॥ ॐचन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥

टी० चन्द्रमामनस इति—यथा घृतादिद्रव्याणि गवादयः ऋगादिवेदाः ब्राह्मणादयोमनुष्याश्च तस्मात्परमेश्वरादुत्पन्ना एवंचन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह मनसः सकाशात चन्द्रमाः जातः चक्षोःचक्षुषः सकाशात्सूर्यः अजायत वायुः प्राणश्च श्रोत्रात्कर्णादजयत मुखादग्निरजायत परमेश्वरमुखादेवाग्नेर्जायमानत्वेन पूजनादिकर्मसु दीपप्रज्वलनत्वमावश्यकमिति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभ्या आसीदिति नैवेद्यम् ॥ ॐ नाभ्या आसीदन्तरीक्षꣳशीर्ष्णो द्यौः समवर्त्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥

टी० नाभ्या आसीदिति यथा परमेश्वरस्य मनःप्रभृतयश्चन्द्रादीनकल्पयन् तथान्तरीक्षादिलोकानित्याह परमेश्वरस्य नाभेः सकाशात् अन्तरीक्षमासीत् शीर्ष्णः द्यौः स्वर्गः समवर्त्तत उत्पन्ना अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना श्रोत्राद्दिश उत्पन्नाः तथाः तेनोक्तविधिना लोकान् भूरादीन् परमेश्वरसकाशात् कल्पितवन्तः फलदानोत्सुकाः कालाः फलादिवस्तूनि कल्पितवन्त इति शेषः। परमेश्वरादुत्पन्नानि सर्ववस्तूनि परमेश्वरे लीनत्वात् परमेश्वरे एव समर्पितानि भवन्तु। त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितमिति वचनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुःशशीभूमिसुतो बुधश्च॥ गुरुश्चशुक्रः शनिराहुकेतवो नवग्रहाः शान्तिकरा भवन्तु ॥ ॥अथ होमसंकल्पः ॥ कुशादिन्यादाय ॐ तत्सत् विष्णुः३ इत्यादिदेशकालादीन्संकीर्त्य अमुकगोत्रस्य अमुकप्रवरस्यामुकशर्मणोममामुककर्मणि पञ्चवारुणिहोमपूर्वकप्रधानभूतेभ्यो देवेभ्योगणपत्यादिपाञ्चायनभ्योविनायकादिपञ्चलोकपालेभ्यः सूर्यादिनवग्रहेभ्यः ईश्वराद्यधिदेवेभ्योऽग्न्यादिप्रत्यधिदेवेभ्य इन्द्रादिदशदिक्पालेभ्योध्रुवाद्यष्टवसुभ्योधात्रादिद्वादशादित्येभ्यो वीरभद्राद्येकादशरुद्रेभ्योगौर्यादिषोडशमातृभ्यःआवाहादिसप्तमरुद्भ्योविनायकब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यः तथाचतुःस्वस्त्यादिभ्यःपयःपञ्चभ्यः षड्विष्णुभ्योद्वादशदेवताभ्योद्वादशशान्तिभ्यः षट्प्रातर्भ्यः षड्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रातेभ्यस्त्र्यनुडुद्भ्यः पञ्चभगेभ्यःपंचेन्द्रियेभ्यः पंचवरुणेभ्योगायत्र्यै सावित्र्यै गृहमात्रेऽन्नपूर्णायै महालक्ष्म्यै महारिष्टविनाशिन्यै वराह्यै द्यौराल्यै वास्तुदेवाय गेहुदेवाय क्षेत्रपालाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासुकिभ्यो मित्रलोकपालाय मान्धात्रेतीर्थराजाय व्रतराजाय पुनर्दिक्पालेभ्यस्तिथिभ्योनक्षत्रेभ्योयोगेभ्यो वारेभ्यः करणेभ्योवातेभ्योमेघेभ्यः समुद्रेभ्यो नदीभ्यः इष्टदेवाय कुलदेवेभ्यः स्थापितदेवेभ्यो भैरवाय भैरव्यै विन्ध्यवासिन्यै स्थानविशेषाधिपतिदेवताभ्यः सर्वदेवेभ्यः सर्वहोमपूरणार्थेभ्यःपंचपाण्डवेभ्योभीमसेनाय पितृभ्योवैश्वानराय उत्तराङ्गभूर्भुवःस्वः अग्निवरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्कप्रजापतिशिवहृद्देवेभ्यः इदमाज्यादिहवनीयद्रव्यहोमं यथासंख्येन ब्राह्मणद्वाराहंकरिष्ये इति संकल्पः । ततःपृष्ठो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

।दिवीतिमन्त्रेणसपवित्रप्रोक्षण्युदकमादायाभिमन्त्रयेत्॥ ॐ पृष्टोदिविपृष्टोऽग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश ॥ वैश्वानरःसहसापृष्टोऽग्निःसनोदिवासरिषस्पातुनक्तम् ॥ सुसमिद्धायेतितज्जलेनप्रदक्षिणक्रमेणाग्निंपर्युक्षय ॥ ॐ सुसमिद्धायशोचिषेघृतंतीव्रंजुहोतन ॥ अग्नयेजातवेदसे ॥

टी० पृष्टोदिवीति व्याख्याता ॥

टी०सुसमिद्धायेति–हेऋत्विजः अग्नये यूयं घृतं जुहोतन-जुहोत जुहोतेःपरस्य लोट्मध्यमबहुवचनस्य तस्य तप्तनप्तनथनाश्चेति तनबादेशे गुणे जुहोतनेतिरूपम् । किंभूताग्नये सुसमिद्धाय शोभनतया सम्यग्दीप्ताय अत एव शोचिषे शोचिष्मते दीप्तिमते ज्वलिताय जातवेदसे जातंवेत्ति वेदयति वा जातवेदास्तस्मै जातप्रज्ञानाय वा किंभूतं घृतम् तीव्रं स्वादुतमं समग्रं वा पटुतरं वा ग्रहणोद्वासनाधिश्रयणावेक्षणादिभिः संस्कृतमित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः प्रणीतापात्रे पवित्रे निधाय उपयमनकुशान्वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा समिद्धतमेऽग्नौ समिधाग्निमितिमन्त्रेणपूर्वस्थापितास्तिस्रः समिधः प्रक्षिप्योपविश्य॥
ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ॥
आस्मिन्हव्या जुहोतन ॥
पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ श्रुवेणाऽज्याहुतीर्जुहोति ॥

टी० समिधाग्निमिति व्याख्याता । ॥

टी० ब्रह्मपुराणे । क्षुत्तृट्क्रोधत्वरायुक्तोहीनमन्त्रोजुहोतियः॥ अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि ॥ स्वल्पे रुक्षे सस्फुलिङ्गे वामावर्ते भयानके ॥ आर्द्रकाष्ठैच संपूर्णे फुत्कारवति पावके ॥ कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ॥ आहुतीर्जुहुयाद्यस्तु तस्य नाशोभवेद्ध्रुवम् ॥ छन्दोगपरिशिष्टे–उत्तानेन तु हस्तेन ह्यङ्गुष्ठाग्रेण पीडितम् ॥ संहताङ्गुलिपाणिस्तु वाग्यतोजुहुयाद्धविः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ ॐ प्रजापतय इतिप्रजापतिरृषिस्त्रिष्टुप्छन्दःप्रजापतिर्देवता आज्यहोमे विनियोगः ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम इति मनसा ॥

कात्यायनस्मृतौ– पाण्याहुतिर्द्वादशपर्वपूरिका कंसादिना चेत्स्रुवमात्रपूरिका ॥ दैवेन तीर्थेन च हूयते हविः स्वङ्गारिणि स्वर्चिषि तच्च पावके ॥ योनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः ॥ मन्दाग्निरामयावी च दरिद्रश्च स जायते ॥ तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन ॥ आरोग्यमिच्छताऽऽयुश्च श्रियमात्यन्तिकीं पराम् ॥ होतव्ये च हुते चैव पाणिशूर्पस्फ्यदारुभिः ॥ न कुर्यादग्निधमनं कुर्याद्वा व्यजनादिना ॥ मुखेनैके धमन्त्यग्निं मुखाद्ध्येषोऽध्यजायत ॥ नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत् ॥

टी० प्रजापतये स्वाहेति मनसा ध्यायन् । प्राञ्चमूर्द्धं ऋजुं सन्ततधारमाज्येन अग्नेरुत्तरप्रदेशे प्रथमाघारमाघार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः इन्द्रो-देवता आज्यहोमे विनियोगः ॐ इन्द्राय स्वाहा इदमिन्द्राय नमम ॥

यति इदं प्रजापतये इति त्यागं कृत्वा हुतशेषं प्रोक्षणीपात्रे प्रक्षेपः । प्रजापतये मनसा आहुतिं दद्यात् न तु वाचा । न स्वाहेति च नानिरुक्तं॰ह्यतद्यस्तूष्णीम् इति वचनात् । आघारोनाम तत्संज्ञकोहोमः प्रजापतये स्वाहेति उत्तरपरि-धिसन्धिमारभ्याग्निमध्यादापरिध्यन्तं घृतक्षरणरूपः प्रथ-माघारः । समिद्धतमे एवाग्निप्रदेशे आघाराद्याः सर्वाहुती र्जुहुयात् । आघारादिचतुर्दशाहुतिकं कर्म सर्वकर्मसु भ-वति ॥

टी॰इदमैन्द्रमाघारमग्नेर्दक्षिणभागे जुहूयात इत्याघारो द्वितीयाघारो नाम इन्द्रायस्वाहेति दक्षिणपरिधिसन्धिमा-रभ्याग्निमध्यादापरिध्यन्तं घृतक्षरणरूपोज्ञेयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्दे-वता आज्यहोमे विनियोगः ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥

ॐ सोमायेतिप्रजापतिऋषिस्त्रिष्टुप्छन्दःसो-मोदेवताआज्यहोमेविनियोगः ॐ सोमाय-स्वाहाइदंसोमायनमम ॥

टी॰ अग्नेरुत्तरार्द्धपूर्वार्द्धेआग्नेयमाज्यभागं जुहुयात्॥

टी॰ अग्नेर्दक्षिणार्द्धपूर्वार्द्धे सौम्यमाज्यभागं जुहुयात् प्रोक्षणीपात्रे प्रक्षिपेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भूर्भुवः स्वरितिमहाव्याहृतीनां प्रजापति-ऋषिरग्निवायुसूर्या देवताः गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्न्याधाने विनियोगः॥ ॐ भूः स्वाहा इदमग्नये न मम प्रोक्षणीपात्रेऽपि प्रक्षिपेत् ॥ ॐ भुवः स्वाहा इदं वायवे न मम प्रोक्षणीपात्रेऽपि ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम प्रोक्षणीपात्रेऽपि० एता महाव्याहृतयः ॥

टी० अग्निवायुसूर्याः पृथिव्याकाशस्वर्गाः ब्राह्मणक्षत्रियवैश्याः पितृमातृपुत्राः ऋग्यजुःसामानि इच्छाज्ञानक्रियाशक्तयः उत्तमाङ्गमध्यमाङ्गाधमाङ्गानि इडाप्राणायामपिङ्गलाप्राणायामसुषुम्णाप्राणायामाः प्राणापानव्यानाः प्रातर्मध्याह्नसायंकालाः मूलाधारविशुद्धसहस्रारचक्राणि भूतभविष्यद्वर्तमानकालाः सत्वरजस्तमांसि स्थूलसूक्ष्मकारणानि विश्वतैजसप्राज्ञाः विराट्सूत्रेश्वराः वा तेभ्यः स्वाहा सुहुतमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ त्वन्नोऽअग्नइतिवामदेवऋषिरग्नीवरुणौ-देवतेत्रिष्टुप्छन्दःप्रायश्चित्तहोमेविनियोगः ॥ ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानो-विश्वाद्वेषाᳬसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ १ ॥

टी० त्वन्नोऽअग्नइति चैत्रमादिसर्वप्रायश्चित्तं प्रजापतिदेवत्योहोमः त्वन्नोऽग्ने सत्वन्न इति अग्निवरुणदेवत्ये त्रिष्टुभौ वामदेवदृष्टे । हेअग्ने त्वं नोऽस्मान्प्रति वरुणस्य देवस्य हेडः क्रोधम् हेड्अनादरे असुन् अवयासिसीष्ठाः निवर्तय यसु उपरमे अवपूर्वस्य णिजन्तस्याशीर्लिङि रूपम् । किञ्च विश्वा विश्वानि सर्वाणि द्वेषांसि दौर्भाग्यानि अस्मद् अस्मत्तः सकाशात् प्रमुमुग्धि प्रमुञ्च दूरीकुरु । मुञ्चेर्व्यत्येन शपः श्लुपः । कीदृशस्त्वम् । विद्वान् स्वाधिकारं जानन् यजिष्ठः अतिशयेनयष्टा यजिष्ठः तुरिष्टेमेयःसु इति तृचोलोपः वन्हितमः वहतीति वन्हिः अत्यन्तं वन्हिः वन्हितमः अतिशयेन हविषां वोढा शोशुचानः अत्यन्तं शोचते दीप्यते इति शोशुचानः शोचतेर्यङन्ताच्छानच्प्रत्ययः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ सत्वन्नोऽग्ने इति वामदेवऋषिस्त्रिष्टुप्छ-न्दोऽग्नीवरुणौ देवते प्रायश्चित्तहोमे विनि-योगः ॥ ॐ सत्वंनोऽग्नेऽवमोभवोतीनेदि-ष्ठोऽअस्या उसषोव्युष्टौ ॥ अवयक्ष्व नोवरुण-ꣳरराणोवीहि मृडीकꣳसुहवोन एधि स्वाहा इदमग्नीवरुणाभ्यां न मम॥प्रोक्षणीपात्रेऽपिर

टी० हेअग्ने स त्वं अस्या उपसोव्युष्टौ व्युष्टकालेऽस्मिन्नहनि ऊतीऊत्या अवनेन तर्पणेन प्रीणनेन वा नोऽस्माकमवमः रचकः नेदिष्ठोऽन्तिकतमः समीपतमश्च भव । अवतीत्यवमः अवतेरमप्रत्ययः यद्वा अवतीत्यवः पचाद्यच् अत्यन्तं अवः अवतमः तलोपश्छान्दसः। अत्यन्तं अन्तिकः नेदिष्टः । अन्तिकबाढ़योर्नेदसाधौ इति इष्ठे परे नेदादेशः। किञ्च रराणोरादाने । हविर्ददत् सन् नोऽस्माकं वरुणमवयक्ष्व अवयज अवपूर्वाद्यजतेर्लोटि शपोलुक् अवपूर्वोयजर्जिनाशनार्थः इह तु धात्वन्तरयोगात् स्वार्थमेव वक्ति ततो मृडीकं सुखकरं हविः वीहि भक्षय वी कान्तिव्याप्तिक्षेपप्रजननखादनेषु किञ्च नोऽस्माकं सुहवः स्वाव्हानः एधि भव घ्वसोरेद्धावभ्यासलोपश्चेत्येकारः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः ॥३॥

ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च स त्वमित्त्वमया असि । अयानोयज्ञं वहास्ययानोधेहि भेषजꣳस्वाहा इदमग्नये न मम प्रोक्षणीपात्रेऽपि

टी॰ अयाश्चाग्ने इति वामदेवस्त्रिष्टुप् अग्निः हेअग्ने त्वं अया न यातीति अयाःया प्रापणे सर्वत्र वाह्याभ्यन्तरावस्थितः असि भवसि किंभूतः अनभिशस्तिपाः न विद्यते अभिशस्तिरभिशापोयेषान्ते अनभिशस्तयः तान् पाति आत्मसात्करोति शोधयतीति यावत् प्रायश्चित्तानुष्ठानेन कर्मानुष्ठानपरिपालक इत्यर्थः किञ्च हे अग्ने यः त्वं अयाः शुभात्रहोविधिरसि।तत्सत्यमित् सत्यमेव इत एवार्थे दीर्घश्छान्दसः । यस्माद्धे अयाः नोऽस्माकं अयाः सुमनाः स्वाश्रयोता भूत्वा यज्ञं वहासि वहसि यद्वा यज्ञं यज्ञसम्पादकं चरुपुरोडाशादिवस्तुजातं कृपालुत्वेन देवेभ्यः सम्पादयसि तस्मान्नोऽस्मभ्यं भेषजं सुखजननं दुःखध्वंसनरूपमपूर्वं धेहि देहीतिप्रार्थना । विभेत्यस्मादिदिति भेषः तं जयतीति भेषजम् । चकाराद्युक्तर्थसमुच्चनार्थौ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो-वरुणः। सविता विष्णुर्विश्वेदेवामरुतः स्वर्का देवताः प्रायश्चित्तहोमे विनियोगः ॥ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्यसवितोत विष्णुर्वि-श्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरु-णाय सवित्रे विष्णवे विश्वेभ्योदेवेभ्योमरुभ्य-स्वर्केभ्यो न मम प्रोक्षणीपात्रेऽपि ॥४॥

टी० ये ते शतमिति। वामदेवस्त्रिष्टुप् लिङ्गम् हे वरुण ते तव ये शतं बहुसंख्याता ये च सहस्रं असंख्याताः पाशाः पापानि बन्धनहेतुत्वात् किंभूताः यज्ञियाः यज्ञप्र-स्यूहोत्पन्नाः विततः सर्वत्र विस्तृताः महान्तः अपरिहार्याः तेभिःतैः पाशितान्नोऽस्मान् अद्य अस्मिन्नेव अहनि सवि-त्रादयोदेवा मुञ्चन्तु मोचयन्तु अकरणायथाकरणान्यथा-करणप्रत्यवायाभिभूतान्पुनन्त्वित्यर्थः। उत अप्यर्थः। किंभूताः। स्वर्काः स्वञ्चनाः सर्वगाः सर्वपूज्यावेत्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ उदुत्तममिति शुनः शेपऋषिस्त्रिष्टुप्छन्दो-वरुणोदेवता पाशान्मोचने विनियोगः । ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमंः श्रथाय ॥ अथावयमादित्य व्रते तवानागसोऽ अदितये स्याम स्वाहा इदं वरुणाय न मम प्रोक्षणीपात्रेऽपि ॥५॥

टी० उदुत्तममिति । वरुणदेवत्या त्रिष्टुप् शुनःशेपदृ-ष्टा । उदित्युपसर्गोऽववि एतावपि श्रथयेत्यनेन संवध्यते । हे वरुण उत्तमं उत्तमाङ्ग शिरसि स्थापितं त्वदीयं पाशम-स्मत् अस्मत्तः सकाशात् । उत्श्रथय उत्कृष्य विनाशय अधमं अधमाङ्गे पादप्रदेशे स्थापितं त्वत्पाशं अवश्रथय अवकृष्य अस्मत्तोविनाशय मध्यमं मध्यमप्रदेशे स्थितं पाशं विश्रथय विछेदय श्रथवन्धे मित्वाण्णिचिलोटि मध्यमैकवचने रूपम् । श्रथायेति संहितायां दीर्घश्छान्दसः यद्वा श्रथ क्र्यादिः लोटि मध्यमैकवचनं छन्दसि शायज-पि इति श्नाप्रत्ययस्य शायजादेशे श्रथायेतिरूपम् अथ पाशत्रयविनाशानन्तरं हे आदित्य अदितिपुत्र वरुण अ-नागसः अनापराधा निष्पापास्तवव्रते कर्मणि वर्त्तमानाः सन्तः वयमदितये अदीनतायै स्याम । अखण्डितत्वाय योग्या भवेम अथा इत्यत्र निपातस्य चेति दीर्घः॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एताः प्रायश्चित्तसंज्ञकाः ॥ इति पञ्चवारुणि-
होमः ॥ अथ प्रधानदेवताहोमसूत्राणि ॥ ॥
गणेशोभास्करोदेवी शिवोविष्णुश्च पञ्चमः
पञ्चायतननामानिकथिताः पञ्चदेवताः॥१॥
विनायकस्तथादुर्गावायुराकाश एव च ॥ ना-
सत्यदस्रौ पञ्चैते लोकपालाःप्रकीर्तिता ॥२॥
सूर्यः सोमश्च भौमश्च बुधोजीवश्च भार्गवः ॥
शनीराहुश्च केतुश्च कथिताश्च नवग्रहाः ॥३॥
ईश्वरश्च उमास्कन्दोविष्णुर्ब्रह्मा शचीपतिः ॥
यमः कालश्चित्रगुप्त इत्येता अधिदेवताः॥४॥
अग्निरापोधराविष्णुरिन्द्र ऐन्द्री प्रजापतिः ॥
सर्पा ब्रह्मा क्रमात्प्रोक्ता नव प्रत्यधिदेवताः॥५॥
इन्द्राग्नी यमानिऋती वरुणोमरुतोविभुः ॥
ईशोब्रह्मा तथानन्तोदिक्पालाःपरिकीर्तिताः६
ध्रुवाद्यष्टवसुर्ज्ञेयोधात्रादित्यास्तु द्वादश ॥
वीरभद्राद्येकादशगौर्य्यादिमातृषोडश ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आवाहादिमरूत्मग्र विनायकविधी हरिः ॥
रूद्राश्चार्कस्तथा प्रोक्तोवनस्पतिः क्रमेण हि ८
चतुःस्वास्तिः यःपञ्च षड्विष्णुर्दवद्वादश ॥
शान्तिर्द्वादशषट्प्रातःषड्वातास्तु क्रमेण हि ९
श्च नुडुत्संज्ञकोज्ञेयोहोमकर्मणि वै ध्रुवम् ॥पञ्चभ-
गेन्द्रियाः पञ्चवरूणाः पंच एव च ॥१०॥
गायत्री चैव सावित्री वाग्देवी गृहमातृका ॥
अन्नपूर्णा महालक्ष्मी महारिष्टविनाशिनी ११
वराड़ी घौराली विजेया वास्तुभूम्यस्तथैव च ॥
गैड्डुश्च क्षेत्रपालश्च ग्रामदेवास्ततःपरम् ॥ १२ ॥
स्वर्गेन्द्रोवासुकिश्चैव मित्रलोकस्तथैव च ॥
मान्धातातीर्थराजश्च व्रतराजस्ततः परम् १३
पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः ॥
वारश्च करणश्चैव वायुमेघसमुद्रकाः ॥१४ ॥
नदीष्ट कुलदेवाश्च स्थापितादेवताः क्रमात् ॥
भैरवोभैरवी विन्ध्यवासिनी स्थानदेवताः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एषोहसर्वदेवाश्च शुक्रज्योतिस्तथैव च ॥
पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ॥१६॥
पूर्णपात्रं ततोदद्याद्बर्हिहोमस्ततःपरम् ॥ गोभू-
रत्नहिरण्याःदिरौप्यवस्त्राणि चैव हि ॥ १७॥
देयानि द्विजमुख्येभ्योयजमानोविशेषतः ॥ ॥
इति होमसूत्राणि ॥

अथ प्रधानदेवताहोमः ॥ ॐगणानां त्वा गण-
पतिꣳहवामहे प्रियाणां त्वा प्रियपतिꣳहवामहे
निधीनां त्वा निधिपतिꣳहवामहे वसोमम ॥
आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥
ॐ गणपतये स्वाहा इदं गणपतये ॥१॥

टी० गणानांत्वेति व्याख्याता ॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ आ कृष्णेन रजसा वर्त्तमानोनिवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्यन् ॥ ॐ सूर्यायस्वाहाइदंसूर्याय २

टी० आ कृष्णेनेति हिरण्यस्तुपदृष्टा त्रिष्टुप् सवितृदेवत्या यस्यैकादशाक्षराश्चत्वारः पादा भवन्ति सा त्रिष्टुप् ॥ सविता सुवति प्रेरयति कार्येषु जगदिति सविता षूप्रेरणे ण्वुल्तृचौ इति तृच् इडागमः । देवोदानादिगुणयुक्तः दीव्यति प्रकाशते इति देवः पचादित्वादच् । देवोदानाद्द्योतनाद्दीपनाद्वा इति यास्कः । हिरण्ययेन हिराममयेन ज्योतिर्मयेन रथेन स्यन्दनेन आयाति उदयाचलादागच्छति प्राच्यां दिश्युदेतीति यावत् । किं कुर्वन् । कृष्णेन रजसा आवर्त्तमानः कर्षति प्राणिनां दृष्टिमिति कृष्णस्तेन कृषेर्वर्णे इति नक्प्रत्ययः । रजसा लोकेन लो... रजांस्युच्यन्ते इति यास्कः । कृष्णवर्णेन लोकेन रात्रिलक्षणेन सह आवर्त्तमानः पुनर्भ्रमणं कुर्वन् व्यवहिताश्चेति सूत्रेण आइति वर्त्तमान इत्यनेन संध्यते । अमृतं अमरणधर्मकं देवादिकं मर्त्यञ्च मरणधर्मकं मनुष्यादिकञ्च निवेशयन् स्वस्वप्रदेशेषु स्थापयन् भुवनानि भूतजातानि पश्यन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्यन् कानि साधु कुर्वन्ति कान्यसाध्विति विचारयन् । यद्वा सविता देवः रथेन भुवनानि पश्यन् आयाति । कीदृशः सविता आकृष्णेन रजसा वर्त्तमानः आकृष्णेने· ति एकपदम् । कृषेर्वर्णे इत्यत्र बाहुलकाद्वर्णं विनापि कर्म· णि नक्प्रत्ययविधानात् । कीरणैरासमन्तात्कृष्यते इति आकृष्णं तथाभूतेन रजसा जलेन रजसोविमान इत्यत्र रजस उदकस्य विमानोनिर्माता इति वेदभाष्ये व्याख्यात· त्वात् । वर्त्तमानः सहितः । कीदृशेन रजसा हिरण्ययेन हिरण्यं रजतं तत्समानवर्णं याति प्राप्नोतीति हिरण्ययं शुक्लवर्णमित्यर्थः । तेन हिरण्यपूर्वात् याप्रापणे इति धातोः आतोऽनुपसर्गे क इति कप्रत्यये आतोलोप इत्याकारलो· पः । हिरण्यवर्णा यज्ञियास्ता न आप इत्यस्य भाष्ये हिरण्यवर्णा रजतसमानवर्णा शुक्लवर्णा आप इति व्या· ख्यानात् । जलस्य शुक्लवर्णत्वमुक्तं स्वदोदये । आपः श्वेताः क्षितिः पीता रक्तवर्णोहुताशनः । मारुतोनीलजीमूत आकाशं सर्ववर्णकमिति । किं कुर्वन् सविता । अमृतं म· र्त्यञ्च निवेशयन् । न मृतं मरणमस्त्यस्मिन्निति अमृतं जलम् । अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अया· चिते च मोक्षे च ना धन्वन्तरिदेवयोः । अमृता मागधी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पथ्या गुडूच्यामलकीषु च इति कोषान्तरात् । मर्त्यं तापं मर्त्यशब्देन ताप उच्यते । म्रियन्ते प्राणिनोऽनेनेति मर्तः तापः मृङ्प्राणत्यागे हसिमृग्रिण्वमिति करणे तन् । ततः स्वार्थे यत् । जलं विना सर्वप्राणिनां म्लायमानत्वात् चतुर्षु मासेषु जलं अष्टसु मासेषु तापं भूमौ निवेशयन् ॥ स्थापयन् ऋत्वनुसारेण वृष्टिं तापञ्च कुर्वन्नित्यर्थः । तदुक्तं श्रीमद्भागवते दशमस्कन्धे प्रावृड्शोभावर्णने । अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु । स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते इति ॥ स्वगोभिः स्वरश्मिभिः पर्जन्य सूर्य इति तस्यार्थः यद्वा सविता देवो हिरण्ययेन हिरण्मयेन ज्योतिर्मयेन रथेन भुवनानि पश्यन् आयाति ॥ किङ्कुर्वन् । कृष्णेन रजसा आवर्तमानः ॥ प्रवहाख्यवायुना भ्रमणार्थं कृष्यते आकृष्यतेइति कृष्णं तथाभूतेन रजसा रजन्ति गमनार्थमनुरक्ता भवन्ति देवा यस्मिन्निति रजो राशिचक्रं तेन । रञ्जरागे इत्यस्मात् भूरञ्जिभ्यां किव इत्यौणादिकसूत्रेणासुन्प्रत्यये असिप्रकृतेऽञ्जेरञ्जेर्नलोपोवाच्यः इति रञ्जेर्नलोपः । मधुमत्पार्थिवंरज इत्यस्य भाष्ये सायनाचार्येण रजकरजनरजः सूत्रसंख्यानम् इति रञ्जेर्नलोप इत्युपात्तिंत तद्वार्तिकपाठेनदृश्यते। आवर्तमानः तद्भिमरो भ्रमन्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रमन् । पुनः किङ्कुर्वन् । अमृतं मर्त्यञ्च निवेशयन् स्वौ-ग्यादिस्थानस्थितश्चेत् अमृतं मिष्टान्नादिमर्त्यञ्च नीचादि-स्थानस्थितश्चेत् मरणधर्मकममिष्टान्नादि निवेशयन् मनु-ष्यादिषु स्थापयन । यद्वा सविता देवोरथेन भुवनानि पश्यन् आयाति कीदृशः ! हिरण्ययेन आवर्त्तमानः । हर्यतीतिहिरण्यं सुवर्णम् । हर्यगतिकान्त्योः । इत्यस्मात् हर्यतेः कन्यन्हिरच् इत्यौणादिकः कन्यन्प्रत्ययोहिरआदे-शश्च हिरण्यस्य विकारोहिरण्ययं हिरण्मयं करद्वयं तेन । ऋत्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि इति हिरण्यश-ब्दाद्विहितस्य मयटोमशब्दस्य लोपोनिपात्यते । दैत्यैः प्राशित्रप्रहारेण छिन्नं सवितुः करद्वयं देवैः हिरण्मयं कृतमिति सवितुर्हिरण्यपाणित्वमिति बहृचश्रुतौ कथा । उक्तं माध्यन्दिनीये प्रथमाध्याये सविता हिरण्यपाणिः प्रतिगृभ्णात्वित्यादि । आवर्त्तमानः आसमन्ताद्वर्त्तमानः सहितः । किंकुर्वन् । अमृतं मर्त्यञ्च निवेशयन् अमृतं यस्यास्तीति अमृतः शंखोजलजत्वात् अर्शआद्यच् तं शंखं मर्त्यञ्च मर्त्यशब्देन चक्रमुच्यते । येन दैत्यादयो म्रियन्ते तच्चक्रं मर्तं ततः स्वार्थे यत् । निवेशयन् स्थापयन तस्मि-न्नेव हिरण्मये करद्वये शंखचक्रे धारयन्तित्यर्थः । तदुक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हारी हिरण्मयवपुर्धृतशंखचक्र इति। कीदृशेन हिरण्ययेन। रजसा उपासका रजन्ति अनुरक्ता भवन्ति अनेन तथाभूतेन। तत्रहेतुः। कृष्णेन कृष्यन्ते आकृष्यन्ते शत्रवोऽनेनेति तेन। यद्वा सविता देवोरथेन भुवनानि पश्यन् आयाति किंकुर्वन् हिरण्ययेन आवर्त्तमानः हिरण्ययमिवहिरण्ययं हिरण्मयं ज्योतिर्मयं मण्डलं तेन आवर्त्तमानः भ्रमन् ज्योतिश्चक्रमाधिष्ठाय भ्रमन्नित्यर्थः कीदृशेन हिरण्ययेन। कृष्णेन कृष्णवर्णेन तथा रजसा रक्तवर्णेन। रक्तः श्यामोभास्कर इति वचनात्। अथवा कृष्णेन कर्षन्ति यत्र स्थिता रश्मयो रसान्निति कृष्णं तेन। पुनः कीदृशेन हिरण्ययेन। रजसा रज्यन्ते व्यज्यन्ते रश्मिप्रदीपितानि ग्रहनक्षत्रादीनां रूपाणि दृश्यन्ते अनेनेति रजः तेन। अयमाशयः तेजोमयः सूर्यो जलमयानि प्रकाशशून्यानि अन्यानि ग्रहनक्षत्रादीनि तेषु रवेर्दीधितयोमूर्च्छितास्तमोनैशं क्षपयन्तीति। उक्तञ्च ज्योतिःशास्त्रे। तेजसां गोलकः सूर्योग्रहर्क्षाण्यंपुगोलकाः। प्रभावन्तोहि दृश्यन्ते सूर्यरश्मिप्रदीपिताः इति। पुनःकिंकुर्वन् सविता। अमृतं मर्त्यञ्च निवेशयन् अमृतं सुधां घृतं जलं पुरोडाशादिहव्यं वा मर्त्यञ्च मरणधर्मकं अन्नादिकञ्च। निवेशयन् देवमनुष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिषु यथाभागं विभज्य स्थापयन् । यद्वा सविता देवो रथेन आवर्त्तमानः भ्रमन् भुवनानि पश्यन् आयाति । किं कुर्वन् रजसा अमृतं मर्त्यञ्च निवेशयन् । रजति अनुरक्तो भवति सूर्योऽनेनेति रजः अर्ककाष्ठं सूर्यस्य प्रीतिकरत्वात् । तेन सूर्यप्रीतये वन्हौ दत्तेन अमृतं अर्कसमिद्धोमफलरूपं सुखं । मर्त्यञ्च मरणधर्मकं पापिष्ठमनुष्यादिकञ्च होमाद्यकरणेन दुःखेषु निवेशयन् स्थापयन् । कीदृशेन रजसा । हिरण्ययेन हिरण्यं रजतं तत्समानं शुक्लरसं याति प्राप्नोतीति हिरण्ययं तेन । पुनः कीदृशेन । कृष्णेन कर्षति नाशयति रोगादिकं सूर्यप्रीतयेऽग्नौ क्षिप्तेनेति कृष्णं तेन । यद्वा सविता देवो रथेन भुवनानि पश्यन् आयाति । कीदृशः सविता । कृष्णेन आवर्त्तमानः । सच्चिदानन्दरूपेण आशाकल्येन वर्त्तमानस्तद्रूपेणस्थित इत्यर्थः । कृषिर्भूवाचकः शब्दोणश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति स्मृतेः । श्रुतिश्च असावादित्योब्रह्म इति । किं कुर्वन् । अमृतं मोक्षं आत्मचित्सु मर्त्यञ्च मरणधर्मकं संसारं च इतरेषु निवेशयन् स्थापयन् । यतो हि द्विविधो मार्गो देवयानाख्यः पितृयाणाख्यश्च तत्र पितृयाणा मार्गाः भूतश्चन्द्रमा येन स्वर्गं ताभिनः पुनरिहागच्छन्ति । मोक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वारं सूर्यः सूर्यमण्डलं भित्वा मोक्षभाजोभवन्तीति । उक्तं भागवते सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् । श्रुतिश्च सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः पुरुषोह्यव्ययात्मा । तमेवविदित्वातिमृत्युमेति नान्यपन्था विद्यतेऽयनाय इति । कीदृशेन कृष्णेन रजसा यत्र योगिनोरंजन्ति अनुरक्ता भवन्ति तथाभूतेन । पुनः कीदृशेन । हिरण्मयेन हिरण्मयेन सुवर्णमयेन तद्वत्पीतवर्णेनेत्यर्थः । तथाच श्रुतिः । य एषोऽन्तरादित्येहिरण्मयः पुरुष इति । अथवा हिरण्मयानि हिरण्मयानि ब्रह्माण्डानि यस्य परब्रह्मणोदेहे सन्ति परमाणुवत् इति हिरण्मयं तेन । अर्थश्चायच् ब्रह्माण्डस्य हिरण्मयत्वमुक्तं स्कान्दे । तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति । अलमिति विस्तरेण ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ देवीर्द्वार इन्द्रꣳसंघाते वीड्वीर्यामन्नवर्धयन्। आवत्सेन तरुणेन कुमारेण च मीवता पार्वाणꣳरेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ देव्यै स्वाहाइदं देव्यै ॥ ३ ॥

टी० देवीर्द्वार इति । एकाधिका शक्वरी । प्रैपरुपा । द्वारः भुक्तमुक्तीनां द्वारभूता देव्यो दुर्गाद्या देव्यः पूर्वसवर्णदीर्घः।संघाते सम्यक् हन्यन्ते असुरायस्मिंस्तत् संघातं युद्धं तस्मिन् घञ् । हनस्तोऽचिण्णलोरितितकारान्तादेशः। यद्वा सम्यक् असुराणां घातोयस्मिन्तत्संघातं । तस्मिन् यामन् यच्छन्ति नियता भवन्ति भटा यत्रेति याम कर्म । यमेर्मनिण्प्रत्ययोवृद्धिश्च सप्तम्यालुक् । तस्मिन् युद्धकर्मणि वीड्वीः वीड्व्यः । पूर्वसवर्णदीर्घः । दृढाः सत्यः । इन्द्रं हर्षं अवर्धयन । ता देव्यः वत्सेन प्रियभूतेन तरुणेन बलवता मीवता मीञ्हिंसायाम् ।मयनं मीः क्विप् मीरस्यास्तीति मीवान् तेन हिंसाशीलेन कुमारेण च स्कन्देन च यद्वा कुत्सितनोमार्गेयेन स कुमारोवाणस्तेन अथवा सिंहेन वाहनभूतेन सह रेणुककाटं संग्रामं आसमन्तात् अपनुदन्ताम् निवर्तयन्तु । रेणु ककटिति अतिशयेन वर्षतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ नमः शंभवाय च मयोभवाय च नमः शंक-राय च मयस्कराय च नमः शिवाय च शिव-तराय च ॥ ॐ शिवाय स्वाहा इदं शि-वाय ॥४॥

तेन त्वा वृणोति निश्चमिति रेणुकक्काटः संग्रामस्तम् । कटे-वर्षावरणयोरित्यस्मात्यङ्लुकि घञ् । कीदृशं संग्रामम् । अर्यन्ते गम्यन्ते सैन्यानि यस्मिन्स अर्वा तम् । ऋगतौ इत्यतः अन्येभ्योऽपि दृश्यन्ते इति वनिप् प्रत्ययः । वसुवने वसुवननाय धनदानाय वसुधेयस्य वसुनोधानाय यजमान गृहे निखननाय व्यन्तु देवेन होत्रा दत्तं आज्यं पिबन्तु । वसुवनेवसुधेयस्येति सप्तमीषष्ठ्यौ चतुर्थ्यर्थे हेमनुष्यहोतः त्वमपि यज आज्यंदेहि ॥ ३ ॥

टी० नमः शंभवेति शं सुखं भवत्यस्मादिति शंभवः यद्वा । शं सुखरूपश्चासौ भवः संसाररूपश्च मुक्तिरूपोभवरू-पश्च तस्मै । मयः सुखं भवत्यस्मान्मयोभवः संसारसुखप्र-दः तस्मै । शं लौकिकसुखं करोतीति शंकरः । यद्वा । शं सुखं करे हस्ते यस्य स शंकरः । यद्वा शं सुखरूपा कराः कीरणा यस्य स शंकरः । यद्वा शंकानां समूहः शंकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा ॥ ॐ विष्णवे स्वाहा इदं विष्णवे ॥५॥

तस्य र इवाग्निरिव भस्मकर्त्ता शंकरः तस्मै । मयोमोक्ष-सुखं करोतीति मयस्करस्तस्मै । स्रक्चन्दनादिरूपेण लौकिकसुखकारित्वं शास्त्रादिरूपेण ज्ञानप्रदत्वान्मोक्षसुखकारित्वमित्यर्थः । एताभ्यां पदाभ्यां साक्षात्सुखकारित्वं पूर्वपदाभ्यां तद्द्वाराकारयितृत्वमिति विवेकः । शिवः कल्याणरूपो निष्पापस्तस्मै । शिवतरोऽत्यन्तं शिवो भक्तानपि निष्पापान् करोति तस्मै । अस्यां षड्यजूंषि वर्त्तन्ते ॥ ४ ॥

वी० विष्णोरराटमिति । हे विष्णो त्वं विष्णोर्यज्ञस्य रराटंललाटस्थानीयोऽसि । वेवेष्टि व्याप्नोतीति विष्णुयज्ञः विष्लृ व्याप्तौ । विषेः किच्चेति नुः । यज्ञो वै विष्णुरिति श्रुतेः । तथा विष्णोर्यज्ञस्य श्नप्त्रे स्थः श्नप्त्रशब्देन ओष्ठसन्धिरुच्यते ओष्ठसन्धिरूपे स्थो युवामित्यर्थः । हे विष्णो विष्णोर्यज्ञस्य संबन्धिनी स्यूः सूचिरूपोऽसि स्यूयते सीव्यतेऽनेनेति स्यू र्हविः षिवुतन्तुसन्ताने क्विप् छ्वोः शूडनुनासिके चेति वस्योङ्जादेशः । तथा विष्णोर्यज्ञस्य ध्रुवोऽसि ध्रुवशब्देन रज्जुग्रन्थिरुच्यते रज्जुग्रन्थिरूपोऽसीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पाञ्चायनाः ॥ अथ पञ्चलोकपालाः ॥ ॐगणानांत्वेति विनायकाय स्वाहा इदं विनायकाय ॥ १ ॥ ॐअम्बेअम्बिकेऽम्बालिके न मानयति कश्चन ॥ ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॐदुर्गायैस्वा इदं दुर्गायै ॥ २ ॥

हेविष्णो त्वं वैष्णवं असि विष्णोरिदं वैष्णवं यज्ञियं सर्ववस्तुस्वरूपं त्वमेवासीत्यर्थः । विष्णोः सर्वरूपत्वात् यज्ञस्यापिस्वरूपं विष्णोरेवस्वरूपमितिभावः । तस्मात् हेयज्ञ विष्णवे त्वा त्वां अर्पयामीतिशेषः ॥ ५ ॥ गणानांत्वेति व्याख्याता ॥१॥

टी ० अम्बेअम्बिके इति प्रजापतिदृष्टा दुर्गादेवत्यानुष्टुप् । अम्बिके इत्यादिशब्दत्रयं पूर्वं व्याख्यातम् । हेदुर्गे कश्चन नरः त्वां न मानयति वल्युपहारादिभिर्नपूजयति । मानपूजायाम् चुरादिः स नरः अश्वइवप्रतिकृतिः अश्वकः अदाम्याश्वतुल्यः सन् ससस्ति शेते दुःखे पततीत्यर्थः । सस्स्वप्ने व्हादिः किंभूतां त्वाम् सुभद्रिकां शोभनंभद्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्या सा सुभद्रा सुभद्रैव सुभद्रिका सर्वमङ्गलभूता ताम् । यद्वा कर्मधारयान्मत्वर्थीयस्यानिषिद्धत्वेऽपिमतुवर्थिकइति-भग्येणालाघवादस्य सूचितत्वात् सोभनञ्च तद्भद्रं सुभद्रं सर्वमङ्गलं सुभद्रं यस्यास्तीति सुभद्रा अर्शआदित्वादच् टाप् सुभद्रैव सुभद्रिका सर्वमङ्गलभूता ताम्तथा काम्पीलवासिनी काम्पीलनगरे वसति तच्छीला काम्पीलवासिनी ताम् । यद्वा कमितिमान्तमव्ययम् पीलतीति पीलं पीलप्रतिष्टम्भे इगुपधेतिकः । कम्शिरःसुखवारिषु इति विश्वकोषाभिधानात् कम् जले सुधासमुद्रजले तन्मध्ये पीलं प्रतिष्टम्भरूपं मणिद्वीपं कम्पीलमुच्यते तत्रस्थितं चिन्तामणिगृहं काम्पीलं तत्र वसति तच्छीला काम्पीलवासिनी ताम् । यद्वा पयनं पीः पानं पीङ्पाने संपदादिः । कम् जलस्य पीः कम्पी तां लातीति कम्पीलोदेह अन्नजलाधारत्वात् । आतोऽनुपसर्गेक इति कः । कम्पीलेभवं हृदयकमलं काम्पीलं तत्र वसति तच्छीला काम्पीलवासिनी ताम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐवायो ये ते सहस्रिणोरथासस्तेभिरागहि । नियुत्वान्सोमपीतये ॥ ॐवायवे स्वाहा इदं वायवे

ॐऊर्ध्वा अस्य समिधोभवन्त्यूर्ध्वा शुक्रा शो॰ चींष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ॐ आकाशाय स्वहा इदं आकाशाय ॥ ४ ॥

टी ॰ वायो ये ते इति व्याख्याता ॥ ३ ॥

टी ॰ ऊर्ध्वा अस्येति प्रजपतिदृष्टा आकाशदेवत्योष्णिक् । सम्यकूइध्यन्ते दीप्यन्ते तेजोभिरिति समिधः सूर्यादयोदेवाः अस्य आकाशस्य ऊर्ध्वा उपरिस्थिता भवन्ति शुक्रा शुक्राणि शुद्धानि निर्मलानि द्युमत्तमा द्यौः दीप्तिः प्रकाशोयेषान्तानि द्युमन्ति अत्यन्तं द्युमन्ति द्युमत्तमानि नक्षत्रादीनि ऊर्ध्वा ऊर्ध्वानि ऊर्ध्वस्थितानि । विभक्तेराकारः । अग्नेः शोचींषि ज्वाला अपि ऊर्ध्वगतानि भवन्ति । कीदृशस्याकाशस्य । सुप्रतीकस्य । सुष्टुविस्तीर्णं प्रतीकं मुखमवकाशं यस्य तस्य । तथा सूनोरात्मपुत्रस्य । तस्माद्वा एतस्माद्वात्मन आकाशः संभूतः । आकाशाद्वायुरिति श्रुतेः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ या वां कशा मधुमत्यश्विना सूनृतावती तया यज्ञं मिमिक्षतम् ॥ ॐ अश्विनिकुमाराभ्यां स्वाहा इदं अश्विनिकुमाराभ्याम् ॥ ५ ॥ इति पञ्चलोकपालाः ॥ अथ नवग्रहाः ॥ ॐ आकृष्णेनेति सूर्याय स्वाहा इदं सूर्याय ॥ १ ॥

टी० या वां कशेति मेधातिथिदृष्टा अश्विदेवत्या गायत्री । हेअश्विना अश्विदेवौ वां युवयोर्या कशा कशेति वाङ्नामसु पठितम् । काशयति प्रकाशयति वाङ्मयमिति कशा वाक् । मधुमती मधु ब्रह्म तद्वती मधुब्राह्मणोपनिषत्प्रशंसायुता । तथा सूनृतावती प्रियं सत्यं वचः सूनृतं तद्वती सत्यप्रियवचनोपेता । हेअश्विनौ तया वाचास्मदीयं यज्ञं मिमिक्षतम् । मिहसेचने सन्नन्तः । सेक्तुमिच्छतं निष्पादयतमित्यर्थः ॥ आकृष्णेनेति व्याख्याता ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐइमं देवा असपत्नᳪसुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इममनुष्य पुत्रममुष्यै विष एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाᳪराजा॥
ॐ सोमाय स्वाहा इदं सोमाय॥ २॥

टी० इमं देवा इति वरुणदृष्टा अत्यष्टिः सोमदेवत्या। यस्या अष्टषष्ट्यक्षरा भवन्ति सा अत्यष्टिः। अध्वर्युर्यजमानार्थी सोमं प्रार्थयते। देवाः हेदेव हेसोम छान्दसत्वात् वहुवचनमेकवचनस्यार्थे पूजार्थं वा। चन्द्रमा जायते पुनः। नवोनवोभवति जायमान इति श्रुतिवचनेन प्रतिमासं पुनः पुनर्जायमानत्वाद्वा। इममुकसंज्ञं यजमानं असपत्नं सपत्नरहितं कृत्वा सुवध्वं सुव प्रेरय। षूप्रेरणे किमर्थम्। महते क्षत्राय महत्यै क्षत्रपदव्यै क्षतात्राणाय वा महते ज्यैष्ठ्याय ज्येष्ठभावाय। महते जानराज्याय जनानामिदं जानं जानञ्चतद्राज्यं जानराज्यं तस्मै जनानामाधिपत्यायेत्यर्थः। इन्द्रस्य आत्मन इन्द्रियाय वीर्याय आत्मज्ञानसामर्थ्यायेत्यर्थः। इन्द्रशब्देन आत्मेत्युच्यते। इन्द्रः शक्रादित्यभेदयोगभेदान्तरात्मसु इति कोपात्। इन्द्रस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्मनो लिंङ्ग इन्द्रियम् । इन्द्रलिङ्गमित्यादिना घच् निपातितः । इमं यजमानं सुव प्रेरय । किंभूतमिमं । अमुष्य पुत्रम् । अमुष्येतिषष्ठ्यन्तं यजमानपितुर्नामग्राह्यम् । तथा अमुष्यै षष्ठ्यर्थे चतुर्थी । अमुष्याः देव्याः पुत्रम् । मनुष्या इति यजमानमातुर्नामग्राह्यम् । अस्यै विशे अस्या विशः प्रजाया अधिपतिमितिशेषः । अस्यै षष्ठ्यन्तं जातिनामग्राह्यम् । असौ इति प्रथमान्तं संबोधनं देशनामग्राह्यम् । हेअमी हेअमुकदेशीयाः वोयुस्माकं अस्माकं ब्राह्मणानाञ्च एष सोमश्चन्द्रः राजा राजा सुखदाता प्रभुरस्तु । राजेतिद्विरुक्तिरादरार्था । आदरे भूयांसमर्थं मन्यन्ते इति यास्कः। ननु सोमस्य पुनःपुनर्जायमानत्वं कुत इति चेत न । श्रुतिवचनस्यायमाशयः । आप्यमण्डलं सोमस्तेजोमयं मण्डलं सूर्यस्तयोरेकनक्षत्रावस्थाने सोमोन दृश्यते नेत्रस्य सूर्यमण्डलेन सह देशस्थितेन व्यवधानात्सा अमावास्या । अथ षष्टिघटिकाभिश्चन्द्रोनक्षत्रान्तरं गच्छति सूर्यस्तु त्रयोदशभिरहोरात्रैः। अतः प्रतिपदमारभ्य विप्रसंस्थितस्य सूर्यमण्डलस्य पञ्चदशः पञ्चदशोभाग आप्यमण्डले प्रतिबिंबितोदृश्यते । सा कलेत्युच्यते । एवं पञ्चदशेऽन्हि त्रयोदशभिर्नक्षत्रैरन्तरमिति । राशिचक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये संमुखौ चन्द्रादित्यौ तिष्ठतस्तदा संपूर्णं प्रतिबिंबं भूछा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यालाञ्छितं दृश्यते सा पौर्णिमा । तस्याममावास्यायां प्रतिबिंबेन सह षोडशकलश्चन्द्र लपचर्यते । ततः पुनःप्रति-षदमारभ्य मण्डलयोर्विपसीभावात्कलान्हासः । तत्र कला-नामेवोत्पत्त्यादयोनाप्यमण्डलस्य कलान्हासे आप्यमण्ड-लस्यादर्शनादितिसिद्धम् । यद्वा सोमार्थं सवित्रादिदेवान्प्रा-र्थयते । हेदेवाः सवित्रादयः इमं सोमं असपत्नं सपत्नरहितं कृत्वा सुवध्वं प्रेरयध्वम् । किमर्थम् महते क्षत्रायेत्यादि-पूर्वोक्तं भवति । इदानीं यजमानार्थं सोमं प्रार्थयते । हेसोम इममुमुकसंज्ञकं यजमानं सुवेत्येकवचनानुसङ्गः । कीदृशं यजमानम् अमुष्य पुत्रमित्यादि । अमी हेअमुकदेशीयाः वोयुष्माकं अस्माकं ब्राह्मणानां एष यजमानः सोमप्रसा-दात् राजा सुखदाता प्रभुरस्तु । कथंभूतोयजमानः । सोमः उमा ब्रह्मविद्या त या सहितः । राजते गुणैर्दीप्यते इति राजा । अथवा अस्माकं ब्राह्मणानां तु सोम एव राजा सुख-दाता प्रभुरस्तु । द्विजराजत्वात् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् अपाᳯ रेताᳯसि जिन्वति ॥ ॐ भौमाय स्वाहा इदं भौमाय ॥ ३ ॥

टी० अग्निर्मूर्धा इति विरुपाङ्गिरसदृष्टा गायत्री भौमदेवत्या यस्या अष्टाक्षराः त्रयः पादा भवन्ति । सा गायत्री ॥ अयं भौमो नामग्रहः भानोः पश्चादुगतः सन् अपां जलानां रेतांसि साराणि जिन्वति जिन्वतिः प्रीतिकर्मा प्रीणयति वर्धयतीत्यर्थः । भानोरग्रे भूमिसुते जलशोषः प्रजायते । भानोः पश्चाद्भूमिपुत्रे वृष्टिर्भवति भूयसी इति वचनात् । यद्वा अयं भौमः शुभोच्चादिस्थानस्थितश्चेत् । अपां रेतांसि साराणि शरीराणि जिन्वति पुष्णाति । भौमे लग्ने स्वोच्चे स्वक्षेत्रे आरोग्यम् । दृढगात्रत्वात् । राजसन्मानकीर्तिः दीर्घायुरिति भृगुसूत्रात् । यद्वा अपां द्युलोकाद्वृष्टिरूपेण पतन्तीनामपां रेतांसि साराणि व्रीहियवादिरूपेण परिणतानि जिन्वति । यद्वा अपां रेतांसि कारणानि जिन्वति पुष्णाति आहुतिपरिणामेन वृष्टिं जनयतीत्यर्थः । ते वा आहुती हुते उत्क्रामत इत्यादिश्रुतेः। कीदृशोभौमः आग्निः अङ्गति गच्छति कदाचित् चलति वा अग्निः चलिते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भौमो वृष्टिं जनयतीत्यर्थः । चलत्यङ्गारकोवृष्टिरित्युक्तेः । अगिगतौ अङ्गेर्नलोपश्चेति निर्नलोपश्च । यद्वा अग्निसमानवर्णः रक्तवर्णत्वात् । पुनः कीदृशः। दिवः द्युलोकस्य मूर्धा शिरःसमानः । यथा शिरः शरीरस्योपरिवर्त्तते तथा भौमोऽपिस्वर्गलोकस्योपरिवर्त्तते । तथा ककुत् कं सुखं अग्निं वा कौति कीर्त्तयतीति ककुत् । अग्निदैवतात्वात् । कुशब्दे क्विप् तुक् । यद्वा ककुत् ककुत्सदृशः ककुच्छब्दोगोपृष्ठोन्नतावयववाची । पतिः दक्षिणदिशायाः पालकः । ककुत्पतिरित्येकपदं वा कं यमराजं कौति कीर्त्तयतीति ककुत् । दक्षिणा दिक् तस्या पतिः ककुत्पतिः रविःशुक्रोमहीसूनुःस्वर्भानुर्भानुजोविधुः । बुधोबृहस्पतिश्चेति दिशाञ्चैव तथाग्रहा इत्यमराक्तेः । कोब्रह्मणि समीरात्मयमदक्षेषु भास्करे। मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कम् इति कोषान्तरात् । पृथिव्याः भूमेः पुत्र इति शेषः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स१६सृजेथामयं च ॥ अस्मिन्सधस्थेऽअध्युत्त-रस्मिन्विश्वेदेवा यजमानश्च सीदत ॥ ॐबु-धाय स्वाहा इदं बुधाय ॥ ४ ॥

टी० अध्वर्युर्यमानार्थी बुधग्रहं प्रार्थयते उद्बुध्यस्वे-ति परमेष्ठिदृष्टा बुधदेवत्या त्रिष्टुप्। यस्या एकादशाक्ष-राश्चत्वारः पादा भवन्ति सा त्रिष्टुप्। हेअग्ने हेबुध अ-त्राग्निशब्देन बुध उच्यते। अङ्गति गच्छति सर्वं जानाति वा अग्निस्तस्य संबोधनम्। अगिगतौ। त्वमुद्बुध्यस्व मायाशयनादुद्बुद्धोभव। एनं यजमानं प्रतिजागृहि माया-शयनाज्जागरुकं कुरु। तदुक्तं गीतासु। या निशा सर्वभू-तानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतोमुनेरिति। यद्वा उद्बुध्यस्व यज्ञादिक-र्मणि उद्बुद्धोभव। सावधानोभव एनं यजमानंप्रतिजागृ-हि जागरुकं कुरु सावधानं कुरु। तत इष्टापूर्ते इष्टञ्च पूर्त-ञ्च इष्टापूर्ते देवताद्वन्द्वेचेत्पानङ्। श्रौतस्मार्ते कर्मणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संसृजेथां संसृष्टे भवेताम् । त्वत्प्रसादादयञ्च यजमानः इष्टापूर्ताभ्यां संसृज्यताम् । पुरुषव्यत्ययः । यथाहामरसिंहः। त्रिष्वथक्रतुकर्मेष्टं पूर्त्तं खातादिकर्मणि इति । मनुरपि । एकाग्निकर्महवनं त्रेतायां यच्च हूयते । अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते । पुष्करिण्यः सभा वापीदेवतायतनानि च । आरामश्च विशेषेण पूर्त्तं कर्म विनिर्दिशेत् इति । किञ्च हेनुध विश्वे सर्वे देवाः अयं कृतेष्टापूर्त्तोनिष्पापोयजमानश्चसधस्थे देवाः सह तिष्टन्ति यस्मिन्तत्सधस्थं तस्मिन्सधस्थेदेवैः सहस्थितियोग्ये । सहपूर्वात्तिष्टतेर्घञर्थे कविधानमिति कप्रत्ययात् । सधमास्थयोश्छन्दसीति सहस्य सधादेशेन सधस्थमितिरुपम् । अस्मिन् सर्वोत्कृष्टरविलोके द्युलोके सीदत तिष्टत अधि अधिकं चिरं तिष्टतेत्यर्थः । द्यौर्वा उत्तर ७सधस्थमिति श्रुतेः । सर्वै देवैः सालोक्यं यजमानस्य प्रार्थ्यते इति भावः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ बृहस्पतेऽअति यदर्योऽअर्हाद् द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवशऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् । उपयामगृहीतोऽसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा ॥ ॐ बृहस्पतये स्वाहा इदं बृहस्पतये ५

टी० बृहस्पतिं प्रार्थयते बृहस्पत इति गृत्समदहृष्टा बृहस्पतिदेवत्या त्रिष्टुप् यस्या एकादशाक्षराः चत्वारःपादाः सा त्रिष्टुप् । हेऋतप्रजात ऋतशब्देन देवाः प्रजाशब्देन मनुष्या उच्यन्ते । ऋतञ्च प्रजाश्च ऋतप्रजास्ताः तायते पालयतीति ऋतप्रजातः तायृ सन्तानपालनयोः अन्येष्वपीतिडः । देवानां पुरोहितत्वात् देवमनुष्यादिपालक इत्यर्थः । सत्यं देवाः अनृतं मनुष्या इति श्रुतेः । यद्वा ऋतेन सत्यरुपेण प्रजायन्ते इति ऋतप्रजा देवाः तान् तायते इति ऋतप्रजातः । यद्वा ऋतात् सत्यरुपादङ्गिरसोमुनेः सकाशात् प्रजातं प्रकृष्टं जातं जन्म यस्य स ऋतप्रजातस्तस्य संबोधने हेऋतप्रजात हेबृहस्पते बृहतां मते पालक । तद्बृहतोरिति सुट्तलोपौ । चित्रं नानाविधं तत् द्रविणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनमस्मासु यजमानेषु धेहि धारय स्थापय देहीत्यर्थः । तत्किम् अर्यः स्वामी यद्धनम् । अत्यर्हात् अतिपूजयति अत्युपसर्ग अर्हात् इत्यनेन संबध्यते । लेटोऽडाटौ इत्याडागमः । अर्यः स्वामिवैश्ययोरित्यर्यशब्दः स्वामिन्यन्तोदात्तोवैश्ये आद्युदात्तः । ईश्वरयोग्यं धनं देहीत्यर्थः । यद्धनं जनेषु लोकेषु विभाति विविधं शोभते कीदृशं धनम् । द्यौः कान्तिरस्यास्तीति द्युमत् दिवउच्च इत्युकारः । क्रतुमत् । क्रतवोयज्ञा विद्यन्ते येन तत् येन यज्ञाः क्रियन्ते तादृशं धनं देहीत्यर्थः यद्धनं शवसा शव इति बलनाम बलेन दीदयत् दापयति प्रापयंति वाबाधनान्तरं तद्ध देहीत्यर्थः । दयदानगतिहिंसादानेषु अस्माण्णिजन्ताल्लुङिरूपम् । अडभावः आर्षः । अतः परं यजुः । नियतपादाक्षरावसाना ऋक् अनियतपादाक्षरावसानं यजुः इति । नं हेघृतचरुपुरोडाशादिहविर्विशेषः त्वम् । उपयामसंज्ञकेन पात्रेण गृहीतोऽसि बृहस्पतयेऽर्थाय त्वां गृह्णामि ध्रुवादौ स्थापयति । एष ते योनिः स्थानम् । बृहस्पतये त्वा त्वां जुहोमि ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अन्नात्परिस्रुतोरसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानꣳशुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ॐशुक्राय स्वाहा इदं शुक्रायꣳ

टी॰ शुक्रं प्रार्थयते अन्नात्परिस्रुत इति अश्विसरस्वतीन्द्रदृष्टा शुक्रदेवत्या अतिजगती यस्या द्वापञ्चाशदक्षरा भवन्ति सा अतिजगती अन्नात्परिस्रुतः सर्वाणि हवा इमानि भूतान्यन्नमेवेति श्रुत्या अन्नं अदनीयं भोग्यपदार्थरूपं जगत् अत्ति भक्षयति संहरतीति अन्नात् रुद्रः तस्मात्परिस्रुतः वीर्यद्वारान्निर्गतः अन्नात्परिस्रुतः वीर्यद्वारान्निर्गतत्वं शुक्रस्य महाभारते प्रसिद्धम् प्रजापतिः प्रजानां दैत्यप्रजानां पतिः पालकः प्रजापतिः गुरुत्वात् शुक्रनामा ग्रहः यद्वा अन्नादित्येकपदम् अनिति प्राणयति जीवयतीति अन्नं ब्रह्म तद्रुपान्नात्परिस्रुतोनिर्गतः। तथाच श्रुतिः अन्नं ब्रह्म अन्नाद्ध्येवखल्विमानि भूतानि जायन्ते इति। अन प्राणने इति धातुपाठात् औणादिको नप्रत्ययः यद्वा अत्ति संहरतीति अन्नं रुद्रः तस्मात् परिस्रुतः वीर्यद्वारान्निर्गतः। अदभक्षणे रदाभ्यां निष्ठा तोनः पूर्वस्य च दः इति निष्ठां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य धातोर्दकारस्य च नकारादेशेन अन्नमितिरूपम् । क्षत्रं क्षतात्राणकारम् सोमम् पयः पीयते इति पयः पान योग्यं घृतं क्षीरं च वा पीङ्पाने असुन् ब्रह्मणा ब्रह्मेतिमन्त्रनाम ब्रह्म तत्वं तपोवेदोब्रह्म। विप्रः प्रजापतिरितिकोशात् मृतसञ्जीविनीमन्त्रेण गायत्रीमन्त्रेण वा व्यपिबत् विविच्य पिबतु लोडर्थेलङ् यद्वा परिस्रुतः सुरारुपात् अन्नात् रसं व्यपिबत् विविच्य पिबतु क्षत्रञ्च व्यपिब त् वशीकरोतुक्षत्रियस्य पानं वशीकरणम् । पयः क्षीरं सोमञ्च व्यपिबत् विविच्य पिबतु कीदृशेन ब्रह्मणा। ऋतेन सत्यरुपेण इन्द्रस्य इन्दति यज्ञादिधर्मेण ऐश्वर्यवान्भवतीति इन्द्रोयजमानः इदि परमैश्वर्ये । ऋजेन्द्रेत्यादिनारन्प्रत्ययः : धर्मादर्थोऽभिजायते इति वचनात्। तस्य त्वत्प्रसादादैश्वर्ययुक्तस्य यजमानस्य यत् अन्धसोऽन्नस्य सोमस्वरूपस्य विपानं विविच्य पानं शुक्रं शुक्रं शुद्धं पापासंपृष्टमितियावत् । इन्द्रियं इन्द्रस्यात्मनोलिङ्गमिन्द्रियम् । इन्द्रलिङ्गमित्यादिनापच् निपातनात् । वीर्यं सत्यंसत्यस्वरूपं । अमोघवीर्यं भूयादिति शेषः । यद्वा ऋतेन ऋतमिति यज्ञनाम । अनेन यज्ञेन यजमानस्येदृशं भूयादितिसंबन्धः । इदं अमृतं अन्नम् । पयः क्षीरञ्च उपलक्षणत्वात्। दध्याद्यपिगृह्यते रोगादिरहितं कृत्वा मधु मधुरम् इन्द्रियं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीर्यप्रदं भूयात् । यद्वा ऋतेन अनेन सत्येन एतत्सत्यं ज्ञातम् । अत्रेन्द्रपदेन शुक्रनाम । इन्द्रस्य ऐश्वर्ययुक्तस्य शुक्रस्य यत् । अन्धसोहविर्लक्षणस्य विपानं विविच्यपानम् । शुक्रं शुक्रं शुद्धम् । अत एव इन्द्रियं वीर्यप्रदं भूयात् पयश्च शुक्रस्येदृशं भवतु । कीदृशम् । इन्द्रियं वीर्यवत् अमृतमजरामरत्वप्रदम् मधु मधुरञ्च यद्वा इन्द्रस्य शक्रस्य अन्यत्तसमानम् विपानमित्यर्थस्यायमाशयः यदा शक्रेणापांफेनरुपेण वज्रेण नमुचिसञ्ज्ञकस्य दैत्यस्य शीर्ष्णि छिन्ने सति लोहितमिश्रः सोमोऽभवत् तस्मात् भीता देवा एतदन्धसोविपानमपश्यन् सोमोराजामृतꣳसुत इत्यादिभिरष्टमन्त्रैर्लोहितास्पृग्भूतस्य सोमस्य स्वादं प्रापुः । तथाच श्रुतिः तस्य शीर्ष्णि छिन्ने लोहितमिश्रः सोमोऽतिष्ठत् तस्मादबीभत्सन्त त एतदन्धसोविपानमपश्यन् सोमोराजामृतꣳसुत तेनैनꣳस्वदयित्वात्मन्नधत्त इति यथा एकाकाराणि वस्तूनि विविच्यमानानि दृश्यन्ते यथा च पृग्भूतानि संसृष्टानि पुनर्विविच्यन्ते एवमयमपिलोहितमिश्रः सोमोविविक्तः सोम एवेतिभावः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ शंनोदेवीरभिष्टय आपोभवन्तु पीतये। शंयोरभिस्रवन्तु नः ॐशनैश्चराय स्वाहा इदं शनैश्चराय॥ ७॥

टी० अथोद्गुरुंदुःखप्रदं शनिं प्रार्थयते। शंनोदेवीरिति दधीचिदृष्टा शनिदेवत्या गायत्री यस्या अष्टाक्षराः त्रयः पादा भवन्ति सा गायत्री। आप उ इतिच्छेदः उ चार्थे। आ समन्तात् आपोजलानि यस्मिन्स आपः सूर्यः। आदित्याज्जायते वृष्टिरिति श्रुतेः। ऋक्पूरब्धूःपथामानक्षे इति अप्रत्ययः। यद्वा आ समन्तात् पाति रक्षति जगदिति आपः सूर्यः। आतश्चोपसर्गे इति कः। आपस्यापत्यं पुमानिति आपः शनैश्चरः तत्संबुद्धौ हेआप तस्यापत्यमित्यण्। यद्वा आप्नोति प्राप्नोति मन्दगतिमिति आपुः शनैश्चरः तत्संबुद्धौ हेआपो आप्लृव्याप्तौ बाहुलकादन्यत्राप्युण्। यद्वा आप्नोति व्याप्नोति सर्वं जगद् दशाभिरिति आपः असुन्प्रत्ययः तत्संबोधने हेआपः हेशने देवीर्देव्यो-दीप्यमानाः त्वदीया दशाः। वा छन्दसीति पूर्वसवर्णदीर्घः नोऽस्माकं अभिष्टये अभिषेकाय अभीष्टाय यज्ञाय वा पीतये च उपलक्षणत्वाद् घृतक्षीरादिसहितचतुर्विधान्नभक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यायेत्यर्थः । शं सुखरूपा भवन्तु । बहुवचनं गोचराद्यभिप्रायेण । ज्ञेयम् । बहुदुःखप्रदानेन मान्यत्वाद्वा । अभिष्टिरित्यत्र पृषोदरादित्वादिकारलोपः । यद्वा आप इति अपूशब्दोदशापरः । कीदृश्योदशाः । आप आप्यते प्राप्यते शुभाशुभदशायां शुभाशुभफलं याभिस्ता आपः । तदुक्तं वराहेण । सौरीं प्राप्य खरोष्ट्रयानमहिषीवृद्धाङ्गनावाप्तयः श्रेणीग्रामपुराधिकारजनितापूजाकुधान्यागमः ॥ श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्तितन्द्राश्रमान्भृत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यङ्गतामिति ॥ शं रोगाणां शमनम् योर्भयानां यवनं पृथक्करणञ्च अभिस्रवन्तु नोऽस्माकं भयरोगनाशं कुर्वन्ति त्यर्थः । शंयोरितिपदद्वयमव्ययम् । योरिति यु अमिश्रणे बाहुलकात् डोस्प्रत्ययः । यद्वा हेशने त्वदीयदशाभ्यः देवीः दीव्यन्ति क्रीडन्ति सृष्ट्यादिभिर्विजिगीषन्तेऽसुरादीन् व्यवहरन्ति सर्वभूतेष्वात्मशक्त्या द्योतन्ते तेजसा माद्यन्ति दैत्यादिवधार्थं पानेन मोदन्ते भक्तेषु निद्रारूपेण तिष्ठन्ति सर्वभूतेषु सर्वं गच्छतन्ति वा देव्योदुर्गाद्या बहुवचनमवताराद्यभिप्रायेण ज्ञेयम् । दिवुधातोः पचाद्यौ देवड्ढिति निपातनान्ङीप् । शं सुखकारिण्यः भवन्तु तन्माहात्म्यपठनश्रवणादित्यर्थः पुनः की-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्यः । आपः आप्नुवन्ति व्याप्नुवन्ति जगदिति आपः जगत्कारणरुपा इत्यर्थः । आप्लृव्याप्तौ आप्नोतेर्ह्रस्वश्चेति क्विप् । धातोर्ह्रस्वत्वश्च । अन्यत्समानम् । यद्वा शनिप्रीतये शनिसमिद्भिः कृतहोमात् हेशने त्वत्प्रीतये होमीकृताः समिधः नोऽस्माकं शं सुखरुपा भवन्तु । कीदृश्यः समिधः आपः आप्यते प्राप्यते आरोग्यं याभिरिति आपः पापशमनेनारोग्यप्रदा इत्यर्थः । पुनः कीदृश्यः । देवीः देव्यो-दीप्यमानाः । अन्यत्समानम् । यद्वा हेशने त्वत्प्रसादात् आपः आप्नुवन्ति देहमिति आपः शरीरव्यापकानि सप्त-दशतत्वानि शं सुखरुपाणि भवन्तु । पञ्चज्ञानेन्द्रियाणि पञ्चप्राणाः द्वे बुद्धिमनसी एतानि सप्तदशतत्वानि चित्ता-हङ्कारौ बुद्धिमनसोरन्तर्भूतौ कीदृश्यः आपः । देवी देव्यः शरीरप्रकाशका इत्यर्थः । यद्वा आपः आप्यन्ते प्राप्यन्ते सुखदुःखानि याभिस्ता आपः कर्माणि शं सुखरुपाणि भवन्तु । कथंभूता आपः देवाः देव्यो दुःखसुखानुभवप्र-दायिन्य इत्यर्थः । यद्वा हेशने त्वत्प्रसादात् आपोजलानि शं सुखरुपाणि भवन्तु । कथंभूता आपः देवी देव्योदीप्य-मानाः अन्यत्समानमलमितिविस्तरेण ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ कया नश्चित्र आभुवदूती सदावृधः सखा॥ कया शचिष्ठया वृता ॐराहवे स्वाहा इदं राहवे ॥ ८॥

टी० अथाध्वर्युर्यजमानार्थं राहुं स्तौति । कया नश्चित्र इति वामदेवदृष्टा राहुदेवत्या गायत्री यस्या अष्टाक्षराः त्रयः पादा भवन्ति सा गायत्री । हेराहो यजमानः कया ऊती ऊत्या अवनेन तर्पणेन प्रीणनेन वा तव अन्येषां देवानाञ्च सखा सहायः आभुवत् आभिमुख्येन भवति । तथा वृता वर्त्तते इति वृत् तथा वर्त्तमानया शचिष्ठया अतिशयेन शची शचिष्ठा तया अतिशयवत्या यागक्रियया सखा भवति । शचीति कर्मनाम तत इष्ठन्प्रत्ययः । कीदृशोयजमानः । कयान इत्येकपदम् यज्ञादिकर्मणा कं सुखं याति प्राप्नोतीति कयानः कृत्यल्युटोबहुलमिति बहुलग्रहणात्कर्त्तरिल्युट् पुनःकीदृशः । चित्रः उत्तमयज्ञकर्त्तृत्वेनाश्चर्यरुपः । चिद्रूपं परमात्मानं त्रायते इति चित्रः पूज्योवा सदा सर्वदावृधः वर्धते धनपुत्रादिभिरिति वृधो-वर्धमानः वृधुवृद्धौ इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः ऊती अवरक्षणाद वितिधातोः ऊतियूतिजूतिसातिहेतिकीर्त्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यश्चेति क्विन्प्रत्ययान्तोर्निपात्यते ज्वरत्वरेत्यूठ् । तृतीयैक-
वचनस्य सुपांसुलुगिति पूर्वसवर्णदीर्घः सखा समानं ख्या-
यते जनैरिति सखा समाने ख्यः सचोदात्त इत्यौणादिक-
सूत्रेण समानशब्देउपपदे ख्या इत्यास्मादिण् स च डित्
यलोपश्च समानस्य तूदातः स इात्यदेशश्च आभुवत् इतश्च-
लोपः परस्मैपदेषु इतीकारलोपः शवरछान्दसडित्वे धातो-
रुवङादेशः यद्वा यजमानोराहुं स्तौति । राहुः कया ऊती
ऊत्या अवनेन तर्पणेन प्रीणनेन वा नोऽस्माकं सखा सहायः
श्राभुवत् आभिमुख्येन भवति तथा वृता वर्णमानया श-
चिष्टया अतिशयवत्या यागक्रियया अस्माकं सखा भवति
कीदृशोराहुः चित्रोविचित्ररुपः पूज्योवा पुनः कीदृशः
सदावृद्धः सदावर्धमानः अथवा दानं शुभाशुभफलप्रदानं
दाः क्विप् तैः सहिताः दशाः सदाः वर्धते इति वृधः ताभिः
सदाभिर्दशाभिर्वृधोवर्धमानः सदावृधः अथवा सदा अप्
ऋधः आप्यन्ते प्राप्यन्ते शुभाशुभफलं याभिरिति आपो·
दशा ऋध्यति ऋध्नोति वा ऋधः ऋधुवृद्धौ अत्रापि
इगुपधेति कप्रत्ययः सदा सर्वदा अर्द्धदशाभिः ऋधोवर्ध-
मानः सदावृधः पुनःकीदृशः कया कं शिरोऽमृतपानेन ।
जरामरणतां याति प्राप्नोतीति कयाः कपूर्वात् याप्राणेप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति धातोः किप् यद्वा हि सुधापानसमये देवलिङ्गप्रतिच्छ-न्नोराहुर्नामदैत्योदेवपङ्क्तौ चन्द्रार्कयोर्मध्ये प्रविष्टः सन् सुधामपिवत् तदातााभ्यामेव चन्द्रार्काभ्याञ्च सूचितोविष्णुः सुदर्शनचक्रेण तस्य शिरः छित्वा सुधया प्लावितं तच्छिर-स्त्वमरतां नीतं ग्रहमध्येऽक्करत् यस्तुवैरबुद्धिमास्थाय पर्वणि चन्द्रर्काविभिधावति लोके उपराग इति वदन्ति एतत्पष्टं श्रीमद्भागवते यद्वा कयाः कायति कञ्चति वा कैशब्दे कचिदीप्तौ अन्येभ्योऽपीतिडः कोब्रह्मणिसमीरात्मयमदक्षे-षुभास्करे मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कमि-तिवचनात् कः सूर्यः कं जलं तदात्मकत्वात् चन्द्र उच्यते कश्च कञ्च कम् नपुंसमनपुंसकेन इत्येकशेषः कं कदाचि-त्पर्वणि क्षणमात्रं गृहीतुं याति धावतीति कयाः अथवा कं कदा चित्पर्वणि क्षणमात्रं गृहीत्वा याति त्यक्त्वा गच्छ-तीति कयाः यद्वा कया इति द्विरुक्तिः अभ्यासे भूयासमर्थं मन्यन्ते इति नारुक्ते यास्कवचनं प्रसिद्धम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ केतुं कृण्वन्नकेतवे पेशोमर्या अपेशसे ॥ समुषद्भिरजायथाः ॥६॥ ॐ केतवे स्वाहा इदं केतवे ॥

टी० अथ केतुं स्तौति कृण्वन्निति मधुच्छन्दोदृष्टा केतुदेवत्या गायत्री यस्या अष्टाक्षराः त्रयः पादाःन्ति भव सा गायत्री । हेकेतो त्वमुषद्भिः सह अन्तर्वेद्यां विप्रचित्तेः सकाशात्सिंहिकायां समजायथाः उत्पन्नोऽसि जनेर्लङि रूपम् व्यवहिताश्चेति सूत्रेण समिति अजायथा इति क्रियापदेन संबध्यते उपदाहे उषन्ति दहन्ति पीडयन्ति उदयेन क्षितीशादीनिति उषन्तो धूमकेतवः उदिते धूमकेतौ तं पश्यतां प्राणिनां विपदो भवन्तीति सूचितम् । विप्रचित्तिः सिंहिकायां शतञ्चैकमजीजनत् राहुज्येष्टं केतुशतं ग्रहत्वं य उपागत. इति भागवतात् मात्स्ये धूम्रा द्विबाहवः सर्वे गदिनोविकृताननाः गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ ग्रन्थान्तरे एकोत्तरशतं त्वेके सहस्रमपरे विदुः । एकञ्च-वहुधा भाति प्राह वै नारदोमुनिः ॥ त्रिशिखाश्च त्रिताराश्च रक्तलोहितरश्मयः प्रायशस्तूत्तरामाशां सेवन्ते नित्यमेवहि॥ क्रूरस्त्रिशिख एकोब्रह्मसुतः । सर्वास्वाशासुसंदृष्टोब्रह्मदण्ड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षयावह ॥ ब्रह्मसुत एक एव त्रिशिखोवर्णैस्त्रिभिर्युगान्तकरः ॥ अनियतदिक्संप्रभवोनिर्ज्ञेयोब्रह्मदण्डाख्यः ॥ चन्द्रमस्युत्थितः केतुः क्षितीशानां विनाशकृत् ॥ इत्यादिवचनैरेकत्वबहुत्वप्रकारेण केतोः स्वरूपमुक्तम् ॥ यद्वा उषद्भिर्दाहकैरुदयेनानिष्टस्थानपरत्वेन वा जनानां विनाशकैर्दशादिकर्मभिः सहितः इति शेषः उषः किदिति असिप्रत्यये स्ववः स्वतवसोरुपसश्चेष्यते इति वार्तिकेन भादौ प्रत्यये परे उषस् इति सकारस्य तकारादेशेन भिसि उषद्भिरिति रूपम् किं कुर्वन् । अकेतवे नास्ति केतुः रोगो शत्रुर्वा ज्ञानं यस्य स तस्मै मर्याय मरणधर्मिणे मनुष्याय विभक्तिव्यत्ययः । केतुं रोगं शत्रुं ज्ञानं वा यथा क्रमेण कृण्वन् हिंसन् कुर्वन् वा कृवि हिंसाकरणयोश्च शतृ अयमर्थः । अनिष्टदशायां अरोगिणे रोगं अशत्रवे शत्रुं कुर्वन । नास्ति केतुर्ज्ञानं यस्मादिति पञ्चमी समासपक्षे तु सर्वोत्तमज्ञानाय मनुष्याय केतुं ज्ञानं कृण्वन् हिंसन् शुभदशायान्तु अकेतवे अज्ञानाय केतुं ज्ञानं कुर्वन् । केतुरिति चायृपूजानिशामनयोरिति धातोः चायः किः इति तुः केतुर्नाकृत्ताकारिणुहोत्पातेषु लक्ष्मणि इति । अपेशसे नास्ति पेशः सुवर्णं शोभनरूपं वा यस्य यस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिति वा अपेशाः तस्मै अपेशसे असुवर्णाय अशोभनरूपाय मनुष्याय शुभदशायां पेशः सुवर्णं शोभनरूपं वा कृण्वन् कुर्वन् अनिष्टदशायां तु सर्वोत्तमसुवर्णाय सर्वोत्तमशोभनरूपाय वा जनाय अपेशः असुवर्णं अशोभनरूपं वा कुर्वन् पेश इति सुवर्णनाम शोभनरूपनाम वा ज्ञेयम्। स्थानवशेन दशायां शुभाशुभफलं जातकशास्त्रेभ्योऽवगन्तव्यम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति नवग्रहाः ॥ अथाधिदेवताः ॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वा-
रुकमिव बन्धनादितोमुक्षीय मामुतः ॥ १ ॥
ॐ ईश्वराय स्वाहा इदं ईश्वराय अत्र प्रणीतो-
दकस्पर्शः ॥

टी० त्र्यम्बकमिति वसिष्ठदृष्टा रुद्रदेवत्या अनुष्टुप् त्र्यम्बकं त्रीणि अम्बकानि लोचनानि यस्येति त्र्यम्बकः यद्वा त्रिषु कालेषु लोकेषु वा अंबकं दृष्टिर्यस्येति त्र्यम्बकः अंबकं नयनं दृष्टिरिति हलायुधः । यद्वा त्रयाणां लोकानां अंबकः इति त्र्यम्बकः यद्वा त्रीन् अंबते शब्दायते इति त्र्यम्बकः अविशब्दे कर्मण्यण् संज्ञायामिति कः यद्वा त्रिषु लोकेषु कालेषु वा अंबः शब्दोवेदलक्षणोयस्येति त्र्यम्बकः यद्वा त्रयः अकारोकारमकाराः अंबाः शब्दवाचका यस्येति त्र्यम्बकः यद्वा त्रीणि सत्वरजस्तमांसि अंबकानि नयनानि यस्येति त्र्यम्बकस्तं रुद्रम् यजामहे पूजयामः अन्यत्पूर्वं व्याख्यातम् । पतिवेदनं पतिं धना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे न· क्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ ॐउमायै स्वाहा इदं उमायै ॥२॥

दीनां पालकं वेदयतीति तम् विदलक्षामे अंन्यत्पूर्ववत् । इतोमुक्षीय इतोदुःखौघात् मुक्षीय मुक्ता भूयासम् अमुतः सुखवृन्दात मामुक्षीय मुक्ता मा भूयासम् ॥ १ ॥

टी० श्रीतेश्च इत्युत्तरनारायणदृष्टा लमादेवत्या त्रि· ष्टुप् । हेउमे श्रीःसपत् लक्ष्मीश्च सौन्दर्यञ्च ते तव पत्न्यौ पत्न्याविवपत्न्यौ पत्नीवत्वद्वश्ये इत्यर्थः । ननु पत्युर्नोयज्ञ- संयोग इति सूत्रेण यज्ञसंबन्धत्वेन पतिशब्दस्य नकारादेशे ङीपि च कृते पत्नीशब्दोभवति स्त्रीत्वधर्मप्राप्तायामुमायां संपत्सौन्दर्ययोर्यज्ञसंबन्धाभावात्कुतः पत्नीशब्दप्रयोग इति चेन्न पत्नीवपत्नीत्युपचारात तथाचोक्तम् पुंयोगादाख्याया- मिति सूत्रे भाष्यकारेणचतुर्भिः प्रकारैरतस्मिन्स इत्येतद्भ· वति तात्स्थ्यात्ताद्धर्म्यात्तत्साहचर्यादिति एवञ्चपत्न्यां यानि गुणवश्यादीनि कार्याणि तानि कुर्वत्यौ पत्नीति प्रयोगोभवति ॥ श्रीयते सेव्यते अनया सर्वजनैरिति वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्समुद्रादुत वापुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ ॐ स्कन्दाय स्वाहा इदं स्कन्दाय ॥ ३ ॥

श्रीः संपत् श्रयतेः क्विब्वचीत्यादिना क्विब्दीर्घौ श्रीर्वेषरच-नाशोभाभारतीसरलद्रुमे लक्ष्म्यां त्रिवर्गसंपत्तौ वेषोपकरणे मतावपि इति विश्वमेदिन्यौ इति लक्ष्यते दृश्यते जनैरिति या सा लक्ष्मीः सौन्दर्यमित्यर्थः लक्षदर्शनाङ्कयोः लक्षेर्मुट्चेति ईप्रत्ययस्तस्यमुट्च लक्ष्मीः संपत्तिशोभयोरिति कोषभेदः अन्यत्पूर्वं व्याख्यातम् ॥ २ ॥

टी० यदक्रन्द इति भास्करजमदग्निदीर्घतमोदृष्टा स्कन्ददेवत्या त्रिष्टुप् । अर्वन् ऋच्छति यथार्थं दैत्यान्प्रति गच्छतीति अर्वा स्कन्दः तत्संबोधने हेअर्वन् हेस्कन्द ऋगतौ अन्येभ्योऽपीति वनिप् । अर्वगतौ बाहुलकात्कनिन्वा यत् यदा त्वं अक्रन्दः क्रन्दितवान् हुंकारशब्दमकार्षीः तदा ते तव महि पराक्रममाहात्म्यं उपस्तुत्यं योग्यं जातम् । कथं स्तुत्यं तदाह श्येनस्य पक्षौ शौर्येण बाहू वेगेन अनेन क्रन्दनेन जिताविति शेषः । कीदृशस्त्वम् समुद्रात् प्रथम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ विष्णोरराटमसि विष्णोःश्नप्त्रे स्थोविष्णोः स्यूरसि विष्णोर्ध्रुवेसिष्णवमसि विष्णवे त्वा ॥ ॐ विष्णवे स्वाहा इदं विष्णवे ॥ ४ ॥

ॐ आ ब्रह्मन्ब्राह्मणोब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथोजायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धि र्योषा जिष्णूरथेष्ठाः सभेयोयुवास्य यजमानस्य

जायमानः, सर्वे देवाः सम्यगुत्कर्षेण द्रवन्ति गच्छन्ति अभयार्थं यस्मिन्निति समुद्रो रुद्रः अथवा समुद्रवन्ति समुद्भवन्ति भूतानि यस्मादिति समुद्रो रुद्रः अथवा मुद्राया उपदेशार्थं तर्कमुद्रया सह वर्त्तते इति समुद्रो रुद्रः तस्माद प्रथमं जायमानः, उतवा अथवा पुरीषात् देवानां यजमानदत्तहविःपूरकादग्नेः सकाशात् उद्यन् उत्पद्यमानः, अग्निभूर्गुह इत्यमरकोषामिधानाद । पिपर्ति पूरयतीति पुरीषम् पृपालनपूरणयोः श्रृपृभ्यांकिच्चेति ईषन् किच्च उदोष्ठ्यपूर्वस्य इत्युठादेशः ॥ ३ ॥

टी॰ व्याख्याता ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वीरोजायतां निकामे निकाम नः पर्जन्योव-
र्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षे-
मो नः कल्पताम् ॥ ॐब्रह्मणे स्वाहा इदं ब्र-
ह्मणे ॥ ५ ॥

ॐसजोषा इन्द्रः सगणो मरुद्भिः सोमं पिव वृतहा शूर विद्वान् । जहि शत्रूँरपमृधोनुद-स्वाथाभयं कृणुहि विश्वतो नः ॥ ॐइन्द्राय स्वाहा इदं इन्द्राय ॥ ६ ॥

टी० व्याख्याता ॥ ५ ॥

टी०सजोषाइन्द्रेति विश्वामित्रदृष्टा इन्द्रदेवत्या त्रिष्टुप्। हेइन्द्र हेशूर वीर! त्वं सोमं पिव, किं भूतस्त्वम् सजोषाः जुषीप्रीतिसेवनयोः जोषणं जोषः प्रीतिः, असुन्प्रत्ययः, तेन सह वर्त्तमानः सन्तुष्टः मरुद्भिः कृत्वा सगणः सपरिवारः मद्गणसहित इत्यर्थः वृत्रहा वृत्रं दैत्यं हतवानिति वृत्रहा ब्रह्मभ्रूणवृत्रेषुक्विप्, विद्वानेतमर्थं जानानः;ततः सोमं पीत्वा शत्रून् जहि मारय, किञ्च मृधः संग्रामात् अपनुदस्व नुद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पशस्पाहि अर्चिरसि शोचिरसि तपोऽसि ॥
ॐ यमाय स्वाहा इदं यमाय ॥ ७ ॥

प्रेरणे युद्धं निवर्तये त्यर्थः शत्रूनपेत्यत्र दीर्घादटिसमानपदे इति नस्य रुत्वम् अत्रानुनासिकः पूर्वस्यतु वा तत्पूर्वस्य इकारस्यानुनासिकत्वम्, यद्वा मृध इति पञ्चम्येकवचनम् मृधः संग्रामात् अपनुदस्व शत्रूनित्यस्यानुसङ्गः ये हतावशिष्टाः शत्रवस्तान् संग्रामात् पलायनार्थं प्रेरयस्व प्राणदानं कुर्वित्यर्थः एवं रिपुनाशं कृत्वा अथानन्तरं नोऽस्माकं विश्वतः सर्वतः अभयं कृणुहि कुरु कृञ् करणे स्वादिः॥६॥

टी० यमाय त्वेति दध्यङाथर्वणदृष्टं यमदैवत्यं यजुः हेमय यमाय आनृशंस्यादि दशविधयमप्राप्तये इत्यर्थः। दशविधयमत्वमुक्तमत्रिस्मृतौ–आनृशंस्यं क्षमा सत्यमहिंसा दानमार्जवम्। प्रीतिः प्रसादोमाधुर्यं मार्दवञ्चयमा दशेति। यद्वा यमनं यमः मनः संयमार्थम् त्वा त्वां पूजयामीति शेषः तादर्थ्ये चतुर्थी तथा मखाय यज्ञसिद्ध्यर्थं त्वा त्वां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजमामि सूर्यस्य तपसे तपोऽर्थम् त्वां पूजयामीत्यर्थः। यद्वा सूर्यस्य सूर्यवत्सर्वप्रकाशकस्य परमात्मनः तपसे ज्ञानार्थं आत्मज्ञानार्थं त्वां पूजमामीत्यर्थः।यस्य ज्ञानमयं तप इति श्रुपतेः अत एव सविता सूर्योदेवः अथवा सविता देवः सर्वजगत्प्रेरणकर्ता परमात्मा देवः मधु मधुशब्देन जगदु-च्यते सर्वं वा इदं मधु इति श्रुतेः मधु जगत् शास्मितुमिति शेषः त्वा त्वां आअनक्तु व्यनक्तु शुभाशुभफलरूपसुख-दुखःप्रदानविवेककरणमुख्यत्वेन प्रेरयतीत्यर्थः अञ्जू व्य-क्तिम्रक्षणकान्तिगतिषु लडर्थे। लोट् व्यक्तिर्विवेचनमिति पृथिव्या विस्तीर्णाया यमपूर्याश्चिपतिस्त्वमिति शेषः म-न्त्रपदान्यसंपूर्णार्थत्वात्स्वार्थलाभाय ब्राह्मणमपेक्षन्ते इति न्यायात्, अतएव संस्पृशस्पाहि संस्पृशति पापिनं दुःखभो-गप्रदानार्थम् सम्यक् स्पर्श करोती स सँस्पृक् पापं तस्मा-त्पाहि रक्ष स्पृशस्पर्शने क्विन्। हेयम त्वमर्चिर्धार्मिकाणां चन्द्रवदाल्हादकारिकान्तिरूपोऽसि शोचिः स्वयन्तु अग्नि-वत्तेजोरूपोऽसि तपः तपतीति तपः असुन् पापिनां ताप-पोऽसि अतस्त्वां पूजयामीति भावः ॥७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि। समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥८॥

टी० कार्षिरसीति—दध्यङ्ङाथर्वणदृष्टा कालदेवत्यानुष्टुप् हेकाल! त्वं कार्षिः कर्षति हृदयकमलमध्याज्जीवाकर्षणं करोतीति कार्षिः कृषविलेखने कृषेर्वृद्धिश्छन्दसीति इञ्प्रत्ययोवृद्धिश्च। समस्तजीवाकर्षणरूपोऽसीत्यर्थः, समुद्रस्य मुदं हर्षं रान्तिददति ते मुद्राः स्त्रीपुत्रादयः आतोऽनुपसर्गे कः तैः सहितस्य समुद्रस्य मम अक्षित्यै शतवर्षपर्यन्ताक्षीणत्वाय, अथवा क्षित्यै शतवर्षपर्यन्तं निवासाय, क्षिक्षये क्षिनिवासे क्विब् क्तौचेति क्विप्। क्षितिर्गेहे भुवि क्षये इति हैमः। त्वा त्वां उन्नयामि उन्नीतिं करोमि पूजां करोमीति यावत्, त्वत्प्रसादात् आपः देहान्तर्गतरसरूपाणि जलानि अद्भिः पानयोग्यैर्जलैः, समित्युपसर्ग अग्मतेति क्रियापदेन संबध्यते। समग्मत संगच्छन्ताम्, गमेर्लुङि तङि प्रथमबहुवचने शपि लुप्ते गमहनेत्युपधालोपे समग्मतेतिरूपम्। तथा ओषधीः ओषधयः ओषः पाकः आसु धीयते इत्योषधयः कर्मण्यधिकरणेचेति किप्रत्ययः, कृदिकारादक्तिन इति ङीप् जसि वा छन्दसीति पूर्वसवर्णदीर्घत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ इन्धनास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि । वयस्वन्तो वयस्कृतꣳ सहस्वन्तः सहस्कृतम् अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥ ॐ चित्रगुप्ताय स्वाहा इदं चित्रगुप्ताय ॥ ६ ॥

ओषधीमयानि अन्नमयानि शरीराणि ओषधीभिर्भोजनयोग्यैरन्नैः संगच्छन्ताम् न तु विषमं प्राप्नुवन्ताम्, देहस्य कारणभूतत्वादन्नादीनामपियोगोऽस्तु, अथापि वद्धितेन कृत्स्नवन्निगमाः भवन्तीति यास्कोक्तेः ॥ ८ ॥

टी० इन्धनास्त्वेति देवदृष्टा चित्रगुप्तदेवत्या महापङ्क्तिः, यस्या षट्पादा अष्टाक्षराः भवन्ति, सा महापङ्क्तिः अग्ने षट्ः तप्ताक्षरः। हेअग्ने अञ्चति गच्छति मनुष्याणां मनोवाक्कायकृतं कर्म जानातीति अग्निश्चित्रगुप्तः, गत्यर्थधातूनां ज्ञानार्थत्वात् तेजसा अग्नितुल्यो वा हेअग्ने! हेचित्रगुप्त! शतं हिमाः शतं वर्षाणि अस्मदायुषि वर्त्तमानान् शतं संवत्सरान् त्वा त्वां समिधीमहि वयं सन्दीपयामः यज्ञजाहवनादिभिः प्रकाशं कुर्मः इत्यर्थः। जिइन्धी दीप्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंभूता वयम् इन्धना दीप्यमानाः त्वदनुग्रहेणैव कृतव्रत-
पूजादिभिः प्रकाशमानाः इत्यर्थः । वयस्वन्तः वय इति
पक्षनाम अन्नवन्तः सहस्वन्तः सह इति बलनाम बलवन्तः
अदब्धासुः अदब्धाः केनाप्यनुपहिंसिताः, दभ्नोतिर्हिंसाक-
र्मा, आज्जसेरसुगित्यसुक्। किंभूतं त्वाम् द्युमन्तं दीप्तिमन्तम्
वयस्कृतं वयोऽन्नं करोतीति वयस्कृत् तम्, सहस्कृतं महा
बलं करोतीति सहस्कृत् तम्। सपत्नदंभनं सपत्नानां
हिंसितारम् अदाभ्यं केनापिहिंसितुमशक्यम्, हेचित्रभानो!
चित्राणि विचित्राणि अद्भुतरूपाणि रोगगृहाणि वसन्ति
यस्मिन्सचित्रावसु श्चित्रगुप्तस्तत्संबुद्धौ हेचित्रावसो! हेचित्र-
गुप्त! तदुक्तम् गारुडे—चित्रगुप्तालयात्प्राच्यां ज्वरस्यास्ति
महागृहम् । दक्षिणस्याञ्चशूलस्य लूताविस्फोटयोस्तथा ॥
पश्चिमे कालपाशः स्यादजीर्णस्यारुचेस्तथा ॥ उदीच्यां
राजरोगोऽस्तिपाण्डुरोगस्तथैव च ॥ ऐशान्यान्तु शिरोऽर्त्तिः
स्यादाग्नेयामग्निमूर्छना ॥ अतिसारो ऋते तु वायव्यां
शीतदाहकौ ॥ एवमादिभिरन्यैश्च व्याधिभिः परिवारितः ॥
लिखते चित्रगुप्तस्तु मानुषाणां शुभाशुभमिति ॥ वस नि-
वासे शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्यु,
अन्येषामपीति पूर्वपदस्यदीर्घः । स्वास्त्व चेमं यथा भवसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा ते तव प्रसादादितिशेषः, पारं दुःखात्पारं अशीय व्याप्नवानि प्राप्नवानीत्यर्थः अश्नोतेः बहुलं छन्दसीति शपोलुकि लिङयुत्तमैकवचने रूपम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यधिदेवताः ॥ अथप्रत्यधिदेवताः ॥ ॐअ-ग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे ॥ देवाँ२ आसादयादिह ॥ १ ॥ ॐअग्नये स्वाहा इदमग्नये ॥

ॐअप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे ॥ गर्भे सञ्जायसे पुनः॥ ॐअद्भ्यः स्वाहा इदमद्भ्यः॥२॥

टी॰ व्याख्याता ॥ १ ॥

टी॰ अप्स्वग्न इति विरूपदृष्टा अब्देवत्या गायत्री ॥ हेअग्ने अङ्गति निम्नं प्रतिगच्छतीति अग्निर्जलं तत्संबुद्धौ हेअग्ने हेजल! अप्सु आप्लृ धातोर्व्याप्त्यर्थत्वात् व्यापकेषु मेघेषु तव सधिः स्थानम् घनरसत्वात्, यद्वा आप इति अन्तरिक्षनाम अप्सु अन्तरिक्षेषु तव सधिः स्थानम्, आ-काशात्पतितं तोयमिति वचनात्, यद्वा अप्सु व्यापकेषु भूप्रदेशेषु तव सधिः स्थानम् भूशिराद्वारानिर्गतत्वात्, यद्वा अप्सु व्यापकेषु समुद्रेषु तव सधिः स्थानम् निम्नगानां निवासत्वात्, सधिष्टवेत्यत्र युष्मत्तत्तक्षुष्वन्तःपादमितिमूर्ध-न्यादेशे ष्टुत्वम्, स त्वमोषधीः यवाद्याः अनुरुध्यसे स्वीकृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐस्योना पृथिवी नो भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथाः ॐभूम्यै स्वाहा इदं-भूम्यै ॥ ३ ॥

ॐइदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ स-मूढमस्यपा᳚ꣳसुरे स्वाहा ॥ ॐविष्णवे स्वाहा इदं विष्णवे ॥ ४ ॥

ॐइन्द्र आसां नेता बृहस्पतिर्दक्षिणायज्ञः पुर एतु सोमः ॥ देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ ५ ॥ ॐइन्द्राय स्वाहा इदमिन्द्राय ॥

रोषि जीवनप्रदानत्वात् सोऽचिलोपे चेत्पादपूरणमिति स इत्यस्य विसर्गलोपेऽसन्धिः, किञ्च गर्भे मेघमध्ये भूमध्ये वा स्थितः सन् पुनःपुनर्जायसे ॥ २ ॥

टी० व्याख्याता ॥ ३ ॥

टी० व्याख्याता ॥ ४ ॥

टी० व्याख्याता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अदित्यै रास्नासि विष्णोर्वेष्योऽस्यूर्जे त्वाऽदब्धेन चक्षुषावपश्यामि। अग्नेर्जिह्वासि सुहूर्देवेभ्योधाम्ने धाम्ने यजुषे यजुषे॥ ॐइन्द्राण्यै स्वाहा इदमिन्द्राण्यै॥ ६॥

टी० अदित्यै रास्नासीति -परमेष्ठीप्रजापतिदृष्टमदिति देवताकं यजुः हेइन्द्राणि त्वं अदित्यै अदित्या देवमातुः षष्ठ्यर्थे चतुर्थी रास्ना काश्चिगुणवत्प्रियभूता स्नुषा असि भवसि तथा विष्णो र्लोकत्रयव्यापकस्य इन्द्रस्य वेष्योऽसि वेष्या उ असीतिपदत्रयम् उ चार्थे वेष्या विष्लृव्याप्तौ घञ् वेषः अलङ्काररचनादिकृतशोभा तेन शोभते इति वेष्या कर्मवेषाद्यत् टाप् शोभनवस्त्राभरणादियोग्यभूता पत्नी चासीत्यर्थः आकल्पवेषोनेपथ्यं प्रतिकर्मप्रसाधनमित्यमरोक्तेः यद्वा विष्णोः परमेश्वरस्य गुणकीर्त्तनादौ वेष्या व्यापकयोग्यभूतासि यद्वा विष्णुशब्देन यज्ञ उच्यते विष्णोर्यज्ञस्य वेष्या व्यापकयोग्यभूतासि अतः ऊर्जे अन्नार्थं त्वा त्वां पूजयामीति शेषः हेइन्द्राणि अदब्धेन अनुपहिंसितेन निर्दोषभूतेन चक्षुषा त्वामवपश्यामि अर्वाचीनं यथातथाधोमुखः सन् पश्यामि हेइन्द्राणि देवेभ्योऽर्थाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐप्रजापते न त्वदेतान्योविश्वा रुपाणि परि ता वभूव ॥ यत्कामास्ते जुहुमस्तन्नोअस्तु वय ꣳ स्याम पतयोरयीणाम् ॥ ॐप्रजापतये स्वाहा इदं प्रजापतये ॥ ७ ॥

ॐनमोऽस्तुसर्पेभ्योये के च पृथिवीमनु ॥ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्योनमः ॥ ॐसर्पेभ्यः स्वाहा इदं सर्पेभ्यः ॥ ८ ॥

त्वं अग्नेर्जिव्हा ज्वालारूपभूतासि कीदृशी ज्वाला सुहूः सुष्ठु हूयन्ते देवा आहूयन्तेऽनया सा सुहूर्जिव्हा ज्वालां दृष्ट्वा आयान्तीत्यर्थः । अतोमे मम धाम्ने धाम्ने भव तथा यजुषे यजुषे च भव धाम स्थानम् इज्यते फलेन युज्यते इति यजुः शब्दोयागवाची धाम्ने धाम्ने तत्तद्या-गफलभोगस्थानसिद्ध्यर्थं भव यजुषे यजुषे तत्तद्यागसिद्धये योग्या भवेत्यर्थ ॥ ६ ॥

टी० व्याख्याता ॥ ७ ॥

टी०नमोऽस्तु सर्पेभ्य इति देवदृष्टा सर्पदेवत्यानुष्टुप् ये के च ये केचित् सर्पन्ति प्रसर्पन्ति मार्गमिति सर्पाःपृथिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ॥ स बुध्न्या उपमा अस्य विष्ठा सतश्च योनिमसतश्चः विवः ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥ ६ ॥

मनुगताः तेभ्यः सर्पेभ्योनमोऽस्तु नमस्कारोभवतु अन्तरिक्षे लोके ये वर्तमानाः सर्पा ये च दिवि द्युलोके ये वर्तमानाः सर्पाःतेभ्यः सर्पेभ्योनमोऽस्तु ॥ ८ ॥

टी० ब्रह्मज्ञानमिति त्रिष्टुप् पुरस्तात्कल्पादौ जज्ञानं विष्णोर्नाभिकमले जायमानम् जनेःशानचि शपःश्लौसति जज्ञानमितिरुपम् ब्रह्म ब्रह्मा वेनः मेधावी सन् सुरुचः सुष्ट रोचन्ते शोभन्ते तान् सुरोचमानान् लोकान् व्यावः विवृतानकरोत् लोकसृष्टिमकरोदित्यर्थः किंकृत्वा सीमतः ल्यप्लोपे पञ्चमी पूर्वसृष्टिमर्यादामनतिक्रम्य तथाच श्रुतिः धाता यथा पूर्वमकल्पयन्दिवञ्च पृथिवीञ्चान्तरिक्षमथोस्व इति कीदृशं ब्रह्म प्रथमं सर्वेभ्योदेवमनुष्यादिभ्यः प्रथमभूतम् स ब्रह्मा बुध्न्या बुध्नमन्तरिक्षं तत्र भवा दिशः विवः विवृता अकरोत् सतोविद्यमानस्य मूर्त्तस्य घटपटादेर्योनिं स्थानम् असतोऽमूर्त्तस्य वाय्वादेश्च योनिं प्रभवम् विवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रत्यधिदेवताः ॥ अथ दशदिक्पालाः ॥
ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳ शूरमिन्द्रम्‌ ह्वयामि शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नोमघवा धात्विन्द्रः ॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥ १ ॥

विवृतमकरोत् वृणोतेः शपि लुप्ते लङि गुणे च वः इति रूपम् अडभाव आर्षः वहुलं छन्दस्यमाङ्योगेऽपीति वचनात् कीदृशीर्बुध्न्याः उपमाः उप समीपे मान्ति भूतानि यासु ता उपमाः सावकाशा इत्यर्थः अत एवास्य जगतो विष्ठाः विविधस्थानभूताः विविधं तिष्ठन्ति यासु ताः अम्बाम्बगोभूमीत्यादिना षत्वम् ब्रह्मा एव लोकान् दिशोभूतान्यसृजदित्यर्थः ॥ ६ ॥

टी० त्रातारमिन्द्रमिति गर्गदृष्टा इन्द्रदेवत्या त्रिष्टुप् त्रातारं रक्षितारमिन्द्रम् अवितारं प्रीणयीतारमिन्द्रम् हवे हवे आह्वाने आह्वाने यज्ञे यज्ञे च सुहवं सुखेन हूयते आहूयते इति सुहवस्तम् शूरं विक्रान्तम् शक्रं शक्नोतीति शक्रस्तम् समर्थम् पुरुहूतं पुरुभिर्बहुभिर्हूयते इति पुरुहूतस्तम् बहुभिराहूतम् इदृशमिन्द्रं ह्वयामि आह्वयामि मघवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐअग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे ॥
देवाँ२ आसादयादिह ॥ ॐअग्नये स्वाहा
इदमग्नये ॥ २ ॥

ॐयमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे
देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृ-
शस्पाहि अर्चिरसि शोचिरसि तपोऽसि ॥
ॐयमाय स्वाहा इदं यमाय ॥ ३ ॥

मघं धनं यस्यास्तीति मघवा छन्दसीवनिपौ वक्तव्याविति वनिप् धनवानिन्द्र आहूतः सन् नोऽस्माकं स्वस्ति अविनाशं धातु दधातु करोतु विकरणव्यत्ययः इन्द्रशब्दावृत्तिः आदरे भूयांसमर्थं मन्यन्ते इति यास्कः ॥ १ ॥

टी० व्याख्याता ॥ २ ॥

टी० व्याख्याता ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्वि-तस्करस्य ॥ अन्यमस्मदिच्छसा त इत्यानमो-देवि निऋते तुभ्यमस्तु ॥ ॐ निऋतये स्वाहा इदं निऋतये ॥ ४ ॥

टी० असुन्वन्तमिति वत्सप्रीदृष्टा निऋतिदेवत्या त्रिष्टुप् । हेनिऋते असुन्वन्तं सोमयागम कुर्वाणम् अय-जमानमन्यैर्हविर्यज्ञैर्यजनमकुर्वाणञ्च त्वमिच्छ प्रतिगच्छ तं गृहाणेत्यर्थः किञ्च स्तेनोगुप्तचोरः तस्करः प्रकटचोरः तयोरित्यां गतिमन्विहि अनुगच्छ पृष्टं ततोगत्वा तावपि-गृहाणेत्यर्थः सर्वथा सोमं सुन्वद्भ्योहविर्यज्ञैर्यजद्भ्योऽस्मदन्य-मिच्छ नत्वस्मानिच्छ सा दुष्टशिक्षा ते तवेत्यागतिश्चयर्ह हेनिऋते देवि एवंभूतायै तुभ्यं नमोऽस्तु ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐतत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः ॥ अहेडमानोवरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥ ॐवरुणाय स्वाहा इदं वरुणाय ॥ ५ ॥

ॐवायो ये ते सहस्रिणोरथासस्तेभिरागहि ॥ नियुत्वान्सोमपीतये ॥ ॐवायवे स्वाहा इदं वायवे ॥ ६ ॥

सोसोधेनुꣳसोमोअर्वन्तमाशुꣳसोमोवीरं कर्मण्यं ददाति ॥ सादन्यं विदथ्यꣳसभेयं पितृश्रवणं योददाशदस्मै ॥ ॐसोमाय स्वाहा इदं सोमाय ॥ ७ ॥

टी० व्याख्याता ॥ ५ ॥

टी० व्याख्याता ॥ ६ ॥

टी० व्याख्याता ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नोयथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ॐ ईशानाय स्वाहा इदमीशानाय ॥ ८ ॥

टी० तमीशानमिति गोतमदृष्टा ईशानदेवत्या जगती वयं तं प्रसिद्धमीशानं रुद्रं हूमहे आह्वायामः कीदृशं तम् जगतोजङ्गमस्य तस्थुषः स्थावरस्य च भूतजातस्य पतिं पालकम् धियञ्जिन्वं धियं बुद्धिं जिन्वति प्रीणातीति धियञ्जिन्वस्तम् अलुक् बुद्धिसंतोषकारकम् जिन्वतिः प्रीणनार्थः किमर्थम् हूमहे अवसे अवितुं तर्पयितुं तुमर्थे असेप्रत्ययःहेरुद्रयथा यथात्वत् पूषा पुष्णातीति पूषा भक्तानां धनादिदानेन पोषणकर्ता त्वं नोऽस्माकं वृधे वृद्ध्यै स्वस्तये कल्याणाय च असत् भवतु कीदृशः पूषा वेदसां धनानां ज्ञानानां वा रक्षिता रक्षकः पातीति पायुः पुत्रादीनां पालकः अदब्धः अनुपहिंसितः यद्वा यथा येन प्रकारेण पूषा नोऽस्माकं वृधे स्वस्तये च असत् भवतु तथा हूमहे इत्यर्थः अन्यत्पूर्ववत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥ ९ ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षःसहस्रपात् ॥ स भूमिꣳसर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ॐ अनन्ताय स्वाहा इदमनन्ताय ॥ १० ॥

टी॰ व्याख्याता ॥ ९ ॥

टी॰ सहस्रशीर्षा सहस्रशब्दोबहुत्ववाची संख्यावाचकत्वे सहस्राक्ष इति विरोधः स्यात् नेत्रसहस्रद्वयेन वा भाव्यम् ततः सहस्रमसंख्यानि शीर्षाणि शिरांसि यस्य सः शीर्षं छन्दसीति शिरःशब्दस्य शीर्षन्नादेशः एवमग्रेऽपि सहस्राक्षः सहस्रमक्षीणि यस्य सः सहस्रपात् सहस्रं पादा यस्य संख्यासुपूर्वस्येति पादस्यान्त्यलोपः सः शेषपुरुषः भूमिं ब्रह्माण्डलोकरुपाम् सर्वतः तिर्यगूर्ध्वमधश्च स्पृत्वा व्याप्य स्पृणोतिर्व्याप्तिकर्मा दशाङ्गुलपरिमितं देशमत्यतिष्ठत् अतिक्रम्यावस्थितः दशाङ्गुलमित्युपलक्षणम् ब्रह्माण्डाद्बहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐसुगा वोदेवाः सदना अकर्म य आजग्मेद ꣳसवनं जुषाणा ॥ भरमाणा वहमाना हवीꣳ ष्यस्मे धत्त वसवोवसूनि स्वाहा ॥ ॐध्रुवाद्यष्टवसुभ्यः स्वाहा इदं ध्रुवाद्यष्टवसुभ्यः॥१॥

रपि सर्वतोव्याप्यावस्थित इत्यर्थः एकस्मिन्नेव शीर्षण्यि ध्रियमाणं ब्रह्माण्डं सिद्धार्थ इवोपलभ्यमानत्वात् ॥१०॥

टी० सुगा व इति अत्रिदृष्टा ध्रुवाद्यष्टवसुदेवत्या त्रिष्टुप् । तुर्यपादोदशार्णः । हेवसवोदेवाः हेध्रुवाद्यष्टवसवो-देवाः । ये यूयमिदं यज्ञं जुषाणाः सेवमानाः सन्तः आजग्म आगताः गमेर्लिटिमध्यमबहुवचनम् तेषां वोयुष्माकं सदनानि स्थानानि सुगा सुगानि सुखेन गम्यते येषु तानि सुगानि सुगमनीयानि वयमकर्म अकार्ष्म कृतवन्तः सुदु-रोरधिकरणे इति सुउपसर्गे गमेर्डप्रत्यये सुगेतिरूपम् । विभ-क्तेराकारः करोतेश्च्लिलोपे लुङि उत्तमबहुवचने अकर्मेति रूपम् किञ्च यूयम् अस्मे अस्मासु सुपां सुलुगिति सप्तम्याः शेआदेशः । वसूनि धनानि धत्त स्थापयत । किंभूता यूयम् यज्ञसमाप्तौ हवींषि भरमाणा ये रथिन स्ते तु रथेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वादशादित्याः ॥ ॐयज्ञोदेवानां प्रत्येति सुम्नमादित्यासोभवता मृड़यन्तः॥ आ वोर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत ॥ ॐधात्रादिद्वादशादित्येभ्यः स्वाहा इदं धात्रादिद्वादशादित्येभ्यः ॥ २ ॥

विभ्रतः रथहीनाः वहमानाः स्कन्धेषु हवींषि वहन्तः यद्वा भरमाणाः पुष्णन्तः वहमानाः । रथादिभिर्नयन्तः तेभ्यो-युष्मभ्यं स्वाहा सुहुतमस्तु ध्रुवोऽध्वरस्तथा सोम आपश्चैवा-निलोऽनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः१

टी० यज्ञोदेवानामिति कुत्सदृष्टा द्वादशादित्यदेवत्या त्रिष्टुप् यज्ञोदेवानां धात्रादिद्वादशात्यानाम् सुम्नं सुखं कर्त्तुम् प्रत्येति प्रत्यागच्छति अतोहेआदित्यासः आदि-त्याः हेधात्रादिद्वादशादित्याः आज्जसेरसुगित्यसुक् यूयम् मृडयन्तः सुखकर्तारोऽस्माकं भवता भवत अन्येषामपिदृ-श्यते इति संहितायां दीर्घः किञ्च वोयुष्माकं यासुमतिः शोभनबुद्धिर्भक्तानुग्रहपरा सा अर्वाची असमदभिमुखी आववृत्यात् आवर्त्तताम् बहुलं छन्दसीति वर्ततेलिङि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ य एतावन्तश्च भूया᳖ंसश्च दिशोरुद्रावितस्थिरे ॥ तेषा᳖ंसहस्रयोजनेऽवधन्वानि तन्मसि ॥ वीरभद्राद्येकादशरुद्रेभ्यः स्वाहा इदं ॐवीरभद्राद्यकादशरुद्रेभ्यः ॥ ३ ॥

जुहोत्यादित्वाच्छपः श्लोर्द्वित्वश्चकिश्च अंहोश्चित अंहुः पापकारी चित् अप्यर्थे अंहोर्हननशीलस्य पापिनोऽपिया सुमतिर्वरिवोवित्तरा वरिवोधनं विन्दति लभते इति वरिवोवित् अत्यन्तं वरिवोवित् वरिवोवित्तरा पापिनोयासुमतिर्धनलब्ध्री असत् सा सुमतिरस्मदभिमुखी आववृत्यादिति संवन्धः ॥ धातार्यमा च मित्रश्च वरुणोंशोभगस्तथा ॥ इन्द्रोविवस्वान्पूषा च पर्जन्योदशमः स्मृताः ॥ ततः त्वष्टा ततोविष्णुरजघन्योऽजघन्यजः ॥ इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ॥ २ ॥

टी० य एतावन्तश्चेति परमेष्ठिदृष्टा वीरभद्राद्येकादशरुद्रदेवत्यानुष्टुप् ये रुद्रा भूयांसश्च अतिशयेन वहवोभूयांसः अतिवहवः असंख्याताश्चापि एतावन्तः एतत्प्रमाणं येषान्ते इति एतावन्तोवीरभद्राद्येकादशरुद्रप्रमाणभूताश्चेत्र सन्तः दिशोदश वितस्थिरे आश्रिताः दशदिशोव्याप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ॐ गौर्य्यादिषोडशमातृभ्यः स्वाहा इदं गौर्य्यादिषोडशमातृभ्यः ॥ ४ ॥

स्थिताः तेषां वीरभद्राद्येकादशरुद्राणाम् धन्वानि धनूंषि सहस्रयोजने सहस्रं योजनानि यस्मिंस्तादृशे पथि सहस्रयोजनव्याहिते मार्गे वयमतन्मसि अवतन्मः अवतारयामः इदन्तमसि ॥ वीरभद्रश्च शंभूश्च गिरिशश्च महायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकीचापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः स्थाणुर्भवश्च भगवान्रुद्रा एकादश स्मृताः ॥ ३ ॥

उ० गौरीर्मिमायेति उचथपुत्रदीर्घतमोदृष्टा वाग्रूपा गौरीदेवत्या जगती यस्या द्वादशाक्षराश्चत्वारः पादा भवन्ति सा जगती ॥ गौरीः गुरते उद्युङ्क्ते मनोऽस्मिन्निति गौर गुरी उद्यमने ऋजेन्द्र इति रन् निपातनाद्वृद्धिः रेफलोपश्च यद्वा गवते इति गौरः गुङ् अव्यक्ते शब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि इति हैमः गौरो-वर्णोऽस्त्यस्या इति गौरीः यद्यपि षिद्गौरादिभ्यश्चेति ङीषि प्राप्तेऽपि छन्दसीवनिपौ वक्तव्याविति वार्तिकेन मत्वर्थीये ईप्रत्यये कृते सति सुलोपाभावः सुमङ्गलीरिति वत्साधुः गौरीत्वसंजातरजः कन्या शंकरभार्ययोरिति कोषान्तरात् शंकरभार्या गौरी अत्र वाग्रूपेण गौरीस्तूयते या वाग्रूपा गौरी मिमाय मयति अपशब्दमज्ञानं वा हिनस्ति नाशयति सुशब्दापशब्दसमूहात्परिशोध्य सुशब्दं संपाद्यैवापशब्दं नाशयतीत्यर्थः न म्लेच्छितवै नापभाषितवै म्लेच्छोहवा एष यदपशब्द इत्युक्तं भाष्ये मीञ् हिंसायाम् छन्दसि लुङ्लङ्लिट इति लङर्थे लिट् भ्वादिः सा गौरी शब्दप्रवाहरुपवती सती सलिलानि तक्षति तक्ष गतौ सलिकलीतीलच्‌ सलिलानीव सलिलानि सुप्तिङन्तानिपदानि तक्षति तनूकरोति असाधुभ्योविविच्य साधूनि करोतीत्यर्थः तक्ष तनूकरणे भ्वादिः तनूकरणे तक्ष इति शब्विषये श्नुविकल्पविधानात् श्नोरभावपक्षे रूपम् कीदृशी सा गौरी एकपदी नामरूपेण द्विपदी नामाख्यातरुपेण उपलक्षणत्वाम् त्रिपद्यपि त्रिपदी नामाख्यातोपसर्गरुपेण चतुष्पदी नामाख्यातोपसर्गनिपातरुपेण अष्टापदी नामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ख्यातोपसर्गनिपातद्रव्यगुणक्रियाजाति रुपेण नवपदी नामाख्यातोपसर्गनिपातद्रव्यगुणक्रियाजातिसंज्ञाशब्दरुपेण यद्वा एकपदी ऋग्रूपेण द्विपदी ऋग्यजूरुपेण त्रिपदी ऋग्यजुःसामरुपेण चतुष्पदी ऋग्यजुःसामाथर्वरुपेण अष्टापदी ऋग्यजुःसामाथर्वपरापश्यन्तीमध्यमावैखरीरुपेण नवपदी ऋग्यजुःसामाथर्वपरापश्यन्तीमध्यमावैखरीसमस्तशब्द रुपेण तत्र नाम पञ्चप्रकारं पठन्ति धातुजं धातुजाज्जातं समर्थार्थजमेवच ॥ वाक्यजं व्यतिकीर्णञ्च निर्वाच्यं पञ्चधा पदम् ॥ तत्र धातुजं वन्दारुः पचमानः ॥ धातुजाज्जातं तद्धितपदम् आग्नेयः याजमानम् दैव्याय ॥ समर्थार्थजः समासः अव्ययीभावस्तत्पुरुषोद्वन्द्वोबहुव्रीहिरिति उपरिनाभि वहिर्ष्दिखण्डम् प्रजापतिः पशुपतिः अग्नीषोमौ इन्द्राग्नी कृष्णग्नीवः शितिकण्ठः यथासंख्यं द्वे द्वे उदाहरणे॥ वाक्यजम् क्रयस्य रुपं सोमस्य लाजा इत्यत्र सोमस्य क्रयस्य रुपं जाजा इत्येवं प्राप्ते रुपशब्देन व्यवधानं व्यत्ययश्च ॥ व्यतिकीर्णम् अन्यत्र प्रसिद्धं यत्पदत्वेन तत्प्रतिरूपका ये वर्णास्तैः सहोच्चार्यते यत्तत् पार्श्वतः श्रोणितः शितामत इत्यत्र शतामत इत्यादिनाम्नोऽर्थोज्ञेयः ॥ आख्यातं भावप्रधानम् भावोनाम क्रियायाः फलम् तद्यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओदनं पचति देवदत्त इत्यत्र देवदत्ताश्रया ओदनाख्यस्य गुणभूता पाकक्रिया अथवा भावोधात्वर्थः तत्र प्रधानगुणभूतानि षट्कारकाणि ॥ अथ द्वाविंशतिरुपसर्गाः क्रियाविशेषकराः प्रपरा इत्यादयः ॥ अथ निपाताः त्रिविधाः उपमार्थीयाः कर्मोपसंग्रहार्थीयाः पादपूरणाः ॥ तत्र उपमार्थीयाः सादृश्यवचनाः इव न इत्यादयः ॥ कर्मोपसंग्रहार्थीयाः असत्ववचनाः च वा ह अह इत्यादयः ॥ पादपूरणाः पादमेवपूरयन्ति नत्वर्थान्तरं वदन्ति अनर्थान्तरवचना इत्यर्थः ई कं इत्यादयः ॥ द्रव्यं गुणं क्रियां जातिमाहुः शब्दाश्चतुर्विधाः ॥ यदृच्छया प्रयुक्ताः स्युः संज्ञाशब्दाश्च पञ्चमा इति ॥ नियतपादाक्षरावसाना ऋक् अनियतपादाक्षरावसानं यजुः गीतिप्रधानं साम एतत्त्रयविलक्षणमथर्व ॥ वैखरी शब्दनिष्पत्तिर्मध्यमा स्मृतिगोचरा ॥ द्योतितार्था च पश्यन्ती सूक्ष्माचाप्यनपायिनी ॥ शब्दानां निष्पत्तिर्यस्याः सा घटाद्यर्थरुपा वाक् वैखरीत्युच्यते ॥ स्मृतिगोचरा स्मरणग्राह्या वाक् मध्यमोच्यते ॥ द्योतितोऽर्थोयया सा ज्ञानरुपा वाक् पश्यन्तीत्युच्यते ॥ अनपायिनी सूक्ष्मा वाक् ब्रह्मरुपा परेत्युच्यते ॥ पादोन्यदरस्यामिति ङीप् अष्टापदीत्यत्र छन्दसिचेति आत्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बभूवुषी सृष्टेरग्रे भूतवती भवतेर्लिटि क्वसुः उगितश्चेति ङीप् ततोवसोः संप्रसारणमिति संप्रसारणे कृते पूर्वरुपत्वे षत्वे बभूवुषीति रुपम् । सहस्राक्षरा सहस्रशब्दोऽनन्तवाची नानादेशविशेषभाषाभेदेनानन्तवर्णरुपा यद्वा सहस्रमक्षीण्यस्य स सहस्राक्ष इन्द्रस्तं राति व्याकृतार्थमादत्ते स्वीकरोतीति सहस्राक्षरा बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इति षच्प्रत्ययः ततः सहस्राक्षशब्दपूर्वात् रा आदाने इति धातोः आतोऽनुपसर्गे इति कः टाप् इन्द्रं राति व्याकृतार्थं गता वाक् श्रुत्यामुद्घुष्यते वाग् वै पराच्यव्याकृता आवदत् तां देवा इन्द्रमब्रुवन् इमां नोवाचं व्याकुर्विति सोऽब्रवीत् वरं वृणै इत्यादि तामिन्द्रोमध्यतोपक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुच्यते इति यद्वा सहोबले ज्योतिषि चेति मेदिनीकोषात् सहोज्योतिर्विद्यन्ते येषान्ते सहस्राः अग्निसूर्यचन्द्रास्ते अक्षीणि यस्य स सहस्राक्षः शिवस्तस्मिन् रमते इति सहस्राक्षरा सहस्शब्दान्मत्वर्थीयोरप्रत्ययः सहस्राक्षशब्दात् रमते अन्येष्वपीतिडः टाप् अथवा सहस्राक्षे परमपुरुषे रमते इति सहस्राक्षरा सहस्राक्षरमन्त्ररुपा वा परमे व्योमन् परमे व्योम्नि लोकेषु उच्चरणरुपेण स्थिता इति शेषः इमे वै लोकाः परमं व्योम इति श्रुतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुपांसुलुगिति ङेर्लोपे न ङिसंबुद्धयोरिति नलोपाभावः यद्वा विविधानां कण्ठताल्वादिस्थानभूतानामक्षराणां ओम अवनं रक्षणस्थानमाधारादिचक्रं तस्मिन्स्थिता । विपूर्वा-दवतेर्मनिन् ज्वरत्वरेत्यूठे सवर्णदीर्घः सार्वधातुकेतिगुणः यद्वा व्योमशब्दो नामैकदेशेन नामग्रहणमितिन्यायात व्योमकेशवाचकः परमे देवेभ्य उत्कृष्टे व्योमन् व्योम्नि व्योमकेशे महादेवे स्थिता यद्वा व्योमन् व्योम्नि व्योम-तुल्ये आकाशतुल्ये परमे परा मा माया यस्मात्तत् परमं ब्रह्म तस्मिन्निर्मायि ब्रह्मणि तद्रूपेण स्थिता खं ब्रह्म इति श्रुतेः ॥ गौरी पद्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मातरोलोकमातरः ॥ धृतिस्तुष्टिस्त-था पुष्टिरात्मनः कुलमातरः ॥ ४ ॥ इति गौर्यादिषोड-शमातरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथावाहादिसप्तमरुतः ॥ ॐमरुतोयस्य हि त्तये पाथा दिवोविमहसः ॥ स सुगोपातमो-जनः॥ॐआवाहादिसप्तमरुद्भ्यः स्वाहा इदमा-वाहादिसप्तमरुद्भ्यः ॥ ५ ॥

टी० मरुतोयस्येति गोतमदृष्टा आवाहादिसप्तमरुद्देव-त्या गायत्री हेदिवोविमहसः विशिष्ट महोयेषान्ते द्युलोक-संवधिना विशिष्टेन महसा युक्ताः यद्वा विशिष्टं महयन्ति पूजयन्ति ते विमहसः द्युलोकस्य पूजयितारोहेआवाहादि-सप्तमरुतः । यस्य यजमानस्य त्तये यज्ञगृहे त्तयोनिवासे इत्याद्युदात्तः । यूयं पाथा पाथ सोमपानं कुरुथ पा पाने शपोलुक्पिवादेशाभावः छान्दसः । द्व्यचोऽतस्तिङइति संहितायां दीर्घः हि निश्चितं स जनोयजमानाख्यः गोपा-यतीति गोपा रक्षकः अत्यन्तं शोभनो गोपा यस्य स सु-गोपातमः युष्मद्गुप्तानां भयं नास्तीत्यर्थ- ॥ आवहः प्र-वहश्चैव उद्वहः संवहस्तथा ॥ विवहः परावहश्चैव तथा परि-वहोऽनिलः ॥ ५ ॥ इत्यावाहादिसप्तमरुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ विनायकादिषट् ॥ ॐगणानां त्वा गण-
पतिꣳहवामहे प्रियाणां त्वा प्रियपतिꣳहवामहे
निधीनां त्वा निधिपतिꣳहवामहेवसोमम ॥
आहमजानि गर्भधमात्वमजासिगर्भधम् ॥
ॐविनायकाय स्वाहा इदं विनायकाय ॥१॥
ॐब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो
वेन आवः ॥ स बुध्न्या उपमा अस्य विष्ठाः
शतश्च योनिमसतश्च विवः ॥ ॐब्रह्मणे
स्वाहा इदं ब्रह्मणे ॥ २ ॥
ॐइदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥
समूढमस्यपाꣳसुरे स्वाहा ॥ ॐविष्णवे स्वाहा
इदं विष्णवे ॥ ३ ॥

टी० व्याख्याता ॥ १ ॥
टी० व्याख्याता ॥ २ ॥
टी० व्याख्याता ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐमा नस्तोके तनये मा न आयुषि मा नो-गोषु मा नोऽअश्वेषु रीरिषः ॥ मा नोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वा हवामहे॥ ॐरुद्राय स्वाहा इदं रुद्राय अत्र प्रणीतोदकस्पर्शः ॥ ४ ॥

टी० मानस्तोक इति रुणद्धि एनमिति वा रोदित्यनेन वा रौत्यनेन वा आवरणं अज्ञानं विपर्ययः शोकोदुःखं वा रुत् तां द्रावयतीति रुद्रः। यद्वा रोदयति सर्वमन्तकाले इति रुद्रः यद्वा रुत्संसाराख्यं दुखं तत् द्रापयत्यपगमयतीति रुद्रः यद्वा रुतःशब्दरूपा उपनिषदः ताभिर्द्रूयते गम्यते इति रुद्रः। यद्वा रुत् शब्दात्मिका वाणी तत्प्रतिपाद्यात्मविद्या वा तामुपासकेभ्योराति ददातीति रुद्रः। यद्वा रुणद्धि आवृणोतीति रुत् अन्धकारादिः तं दृणाति विदारयतीति रुद्रः। यद्वा रुगतौ ये गत्यर्था धातवस्तेज्ञानार्थाः रवणं रुत ज्ञानं भावे क्विप् तुगागमः रुत् ज्ञानं राति ददातीति रुद्रः। यद्वा कदाचिद्देवासुरसंग्रामे अग्न्या त्मकोरुद्रो देवैर्निक्षिप्तं धनमपहृत्य निरगात् असुरान् जित्वा देवा एनमन्विष्य दृष्ट्वा धनपहरन् तदानीमरुदत् तस्माद्रुद्र इत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐअग्निरस्मिजन्मना जातवेदा घृतं मे चक्षु
रमृतं म आसन् ॥ अर्कस्त्रिधातूरजसोविमा-
नोऽजस्रोघर्मोहविरस्मि नाम ॥ ॐअर्काय
स्वाहा इदमर्काय ॥ ५ ॥

ख्यायते तथा च तैत्तिरीयकम् सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम् इति ॥ तस्य संबुद्धौ हेरुद्र अन्यत्पूर्वं व्याख्यातम् ॥ ४ ॥

टी० अग्निरस्मीति देवश्रवोदृष्टा अर्कदेवत्या अर्काद्वैतवादिनी त्रिष्टुप्। अर्कदेवतात्वाद् यजमान आत्मानमर्कत्वेन ध्यायति जन्मनाउत्पत्त्यैवाहमग्निः सर्वत्र सर्वदा गन्ता अर्करुपोऽस्मि नाम विभक्तिलोपः। नाम्ना हविः पुरोडाशादिकमप्यहमस्मि। कीदृशोऽहम् जातं जातं विन्दते इति जातवेदाः उत्पन्नस्य सर्वस्य स्वामीत्यर्थः अर्कः अर्चनीयः त्रिधातुः त्रयोधातवः ऋग्यजुःसामलक्षणा यस्य स रजसोविमानः रजः उदकं तस्य निर्माता विमिमीते इति विमानः नन्द्यादित्वात्कर्तरि ल्युठ् अजस्रः न जसति न क्षीयते इत्यजस्रःअनुपक्षीणः। जसु उपक्षये नेमिकंपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ॑वनस्पते वीड्वङ्गोहि भूया अस्मत्सखा प्रतरणः सुवीरः ॥ गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ॐ॑वनस्पतये स्वाहा इदं वनस्पतये ॥ ६ ॥

इत्यादिना रप्रत्ययः। घर्मः घृ क्षरणदीप्त्योः जिघर्तीति घर्मः । औणादिकोमप्रत्ययः दीप्तः क्षरणोमेघरुपोवा आदित्याज्जायते वृष्टिरिति श्रुतेः । एतादृशोऽर्कोऽहं यतस्ततोमे मम अर्कात्मनः चक्षुर्मण्डलम् घृतं दीप्तमस्ति यद्वा घृतं मे मम चक्षुर्नेत्रं घृतहोमिनं पश्यामीतिभावः । अमृतमविनाशि ज्योतिर्मे मम आसन् आसनि आस्ये मुखे वर्त्तते । यद्वा अमृतं हविर्मे मम मुखे पद्दन्न इत्यादिना आस्यशब्दस्यासन्नादेशः सुपां सुलुगिति सप्तम्या लुक् मन्मुखे हविर्जुह्वन्तममृतं करोमीति भावः एवमात्मन्यर्कद्वैतं संपाद्यम् ५

टी० वनस्पते इति भरद्वाजसुतपायुदृष्टा वनस्पतिदेवत्या त्रिष्टुप् हेवनस्पते पारस्करादित्वात्सुट् त्वं वीड्वङ्गः दृढाङ्गोहि निश्चयेन भूयाः भव वीड्वनि दृढानि अङ्गानि यस्य स वीड्वङ्गः वीडुशब्दोदृढवचनः । कीदृशः । अस्मत्सखा अस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्रभूतः राजाहः सखिभ्यष्टच् इति प्राप्तस्य टच्प्रत्ययस्य सर्वे विधयश्छन्दसि विकल्पन्ते इति वचनादभावः प्रतरणः प्रतरन्त्यापदोऽनेनेति प्रतरणः । करणाधिकरणयोश्चेति ल्युट् सुवीरः शोभना वीराः पुत्रादयो येनेति सुवीरः किञ्च हे वनस्पते यतः त्वं गोभिः जलैः किरणैर्वा सन्नद्धः संबद्धोऽसि शीनोष्णैः संबद्धोऽसीत्यर्थः अतो वीडयस्व आत्मानं स्तंभय । गौर्नादित्ये वलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि ॥ नृस्त्रियोः स्वर्गवज्रांशुरश्मिदृग्बाणलोमसु इति कोषः अथवा गोभिः इन्द्रियैः सन्नद्धः संबद्धोऽसि । इन्द्रियवृत्तयो वृक्षाणामपि सूक्ष्माः सन्त्येव चैतन्यमप्यस्ति । तथा हि महाभारते मोक्षधर्मेषु भृगुभरद्वाजसंवादे स्मर्यते । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥ तस्माच्छृण्वन्ति पादपाः । तस्मात्पश्यन्ति पादपाः तस्माज्जिघ्रन्ति पादपा इत्यादिप्रसिद्धाः तरुषु प्रभूता तु स्पर्शनेन्द्रियवृत्तिरेव । किञ्च ते तव आस्थाता संस्थाता गृही जेत्वानि जेतव्यानि धनानि जयतु बाहुलकात्त्वन्प्रत्ययः वनस्पतिर्ना द्रुमात्रे विना पुष्पं फलिद्रुमे इति कोषान्तरात् अत्र वनस्पतिशब्दः समष्टिव्यष्टिषड्विधवृक्षरूपोज्ञेयः वृक्षाणां षड्विधत्वमुक्तं श्रीमद्भागवते तृतीयस्कन्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनस्पत्यौषधिलता त्वक्सारा वीरुधोद्रुमाः। उत्स्रोतसस्तमः प्राया अन्तःस्पर्शा विशेषिण इति ये पुष्पं विना फलन्ति ते वनस्पतय उदुंवरप्रमृतयः । ओषधयः फलपाकान्ताः यवाद्याः । लता आरोहणापेक्षाः कूष्माण्डप्रभृतयः । त्वक्साराः त्वचि सारोयेषान्ते त्वक्सारा वेणवादयः । वीरुधः काठिन्येन स्थिता आरोहणानपेक्षाः कुशकाशादयः । ये पुष्पैः फलन्ति ते द्रुमा आम्रादयः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र विशेषोद्देश्याभिमतं कर्म कृत्वा तत्पश्चादेतदुत्तरं कर्म कुर्वन्ति ॥

अथ चतुःस्वस्त्यादयः। ॐ स्वस्ति न इन्द्रोवृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ ॐ चतुःस्वस्तिभ्यः स्वाहा इदं चतुःस्वस्तिभ्यः ॥ १ ॥

टी० श्रीवाग्वादिन्यैनमः ॥ स्वस्ति न इन्द्रः इति । स्वस्ति नः इन्द्रः वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नः तार्क्ष्यः अरिष्टनेमिः स्वस्ति नः बृहस्पतिः दधातु ॥ विराट्स्थाना आद्यौ पादौ नवार्णौ तृतीयोदशकः तुर्योऽयूहेनैकादशकः ॥ नवकौ वैराजस्त्रैष्टुभश्चेतिवचनात् । इन्द्रः स्वस्ति आशीर्वादं पुण्यं कल्याणं मङ्गलं वा नोऽस्मभ्यम् दधातु ददात्वित्यर्थः । स्वस्त्याशीः क्षेमपुण्यादाविल्यमरः । कथंभूत इन्द्रः वृद्धश्रवाः वृद्धेभ्यः शृणोतीति वृद्धश्रवाः श्रुश्रवणे असुन् । अथवा वृद्धे श्रवसी यस्य स वृद्धश्रवाः वृद्धं श्रेष्ठं श्रवोधनं यशोवा यस्य स वृद्धश्रवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्वा वृद्धेषु पण्डितेषु श्रवोयस्येतिवा वृद्धश्रवाः । तथा पूषा पुष्णाति पूषति वा पूषा पूष वृद्धौ पुष पुष्टौ वा श्वन्नुक्षन्निति निपातितः । स्वस्ति नोऽस्मभ्यम् दधातु । कथंभूतः पूषा विश्ववेदाः विश्वं वेत्तीति विश्ववेदाः विश्वं वेदोधनं यस्मादितिवा विश्ववेदाः । तार्च्यौरथः तार्क्ष्यस्य-कश्यपस्यापत्यं पुमानिति तार्च्योंगरुडोवा ऋष्यण् गर्गादित्वाद्यञ्वा । कथंभूतः तार्च्यः । अरिष्टनेमिः अरिष्टा अनुपहिंसिता नेमिश्चक्रधारा पक्षोवा यस्य स अरिष्टनेमिः। बृहस्पतिः बृहतां वाचां पतिः बृहस्पतिर्देवगुरुः । तद्वृहतो-रिति सुट्तलोपौ । स्वस्ति नोऽस्मभ्यम् दधातु ॥ चतुः स्वस्तिभ्यः । चतुर्षु वेदेषु सुष्ठु असन्ति दीप्यन्तीति चतुः स्वस्तयोऽष्टसिद्धयः अथवा चतुर्षु दिक्षु यानि मङ्गलानि स्वसन्ति दीप्यन्ति तानि मङ्गलानि चतुःस्वस्तय इत्युच्यन्ते अस दीप्तौ क्तिन् बाहुलकात्तिर्वा ।। यद्वा अस्यां कण्डिकायां चत्वारोदेवाः स्वस्तिरुपेण वर्त्तन्ते अथवा अस्यामेव-कण्डिकायां चत्वारि स्वस्तिपदानि वर्त्तन्ते तेभ्य स्वाहा सुहुतमस्तु ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ पयः पृथिव्यां पय ओषधीषु पयोदीव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १ ॥

टी० पयः पृथिव्यामिति हेहविः त्वं पृथिव्यां पयोरसं धाः धेहि स्थापय । दधातेर्लुङि मध्यमैकवचने रुपम् । बहुलं छन्दस्यमाङ्योगेऽपि इत्यऽभावः । ओषधीषु च पयोधाः दिवि स्वर्गे च पयोधाः। किञ्च मह्यं मदर्थे प्रदिशः दिशोविदिशश्च पयस्वतीःपयस्वत्योरसयुताः सन्तु आहुतिपरिणामेन पृथिव्यादयोममाभीष्टदा भवन्त्वित्यर्थः ॥ पय पञ्चभ्यः । पृथिव्याकाशसूर्यमेघसमुद्रेभ्योनिष्पन्नानां पयसां पञ्च तेभ्यः । अथवा अस्यां कण्डिकायां पञ्च पयःपदानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयःपञ्चभ्यः स्वाहा इदं पयः पञ्चभ्यः ॥ ॐ-
विष्णोरराटमसि विष्णोः श्नप्त्रे स्थोविष्णोः
स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे
त्वा ॥ ३ ॥

ॐअग्निर्देवता वातोदेवता सूर्योदेवता चन्द्र-
मादेवता वसवोदेवता रुद्रादेवतादित्या देवता
मरुतोदेवता विश्वेदेवादेवता बृहस्पतिर्देवते-
न्द्रोदेवता वरुणोदेवता ॥ द्वादशदेवेभ्यः
स्वाहा इदं द्वादशदेवेभ्यः ॥ ४ ॥

टी० विष्णोरराटमिति पूर्वं व्याख्याता । षड्विष्णु-
भ्यः षट्ऐश्वर्याणि शास्त्राणि ऋतुन्वा वेविषति व्याप्नुव-
न्तीति षड्विष्णवः बहुवचनं पूजार्थे अथवा अस्यां कण्डि-
कायां षड्विष्णुपदानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु॥३॥

टी० अग्निर्देवतेतिअङ्गति गच्छतीति अग्निः अगि
गतौ अंगेर्नलोपश्चेति निर्नलोपश्च । वाति गच्छतीति वातो
वायुः । हसिमृग्निणिति तन् । सरति गच्छति आकाशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सूर्यः अथवा सुवति प्रेरयति कर्मणि लोकानिति सूर्यः सृगतौ षूप्रेरणे राजसूयसूर्येति निपातितः।चन्द्रं कर्पूरं सादृश्येन माति तुलयतीति चन्द्रमाः।अथवा चन्द्रं आल्हादं मिमीते निर्मिमीते इति चन्द्रमा चन्द्रेमोडिच्चेत्यसुन्। वसन्तीति बसवः। वस निवासे शृस्वृस्निहित्रप्यसिवसिहनीति उः- रोदयन्ति असुरानिति रुद्राः रुदिर् अश्रु विमोचने रोदेर्णि लुक्चिति रक् णेश्च लुक् अदितेरपत्यानीति आदित्याः दित्यादित्येति एयः। म्रियन्ते एभिरिति मरुतः मृङ् प्राणत्यागे मृग्नोरुति। विशन्ति कर्मसु इतिविश्वे विश प्रवेशने अशूपुषिलटिकणिस्वटिविशिभ्यः क्वन्। सर्वनामसंज्ञोऽयम् बृहतां पति बृहस्पतिः। इन्दति ऐश्वर्यवान्भवतीति इन्द्रः। ऋजेन्द्रेत्यादिना रन् म्रियते वृणोति वा वरुणः। वृञ् वरणे कृवृदारिभ्य उनन्। आदित्या द्वादश प्रोक्ता विश्वे देवा दश स्मृता। वसवश्चाष्टसंख्याता रुद्राश्चैकादश स्मृताः वाताः पञ्चाशदूनकाः॥ द्वादशदेवेभ्यः। अस्यां कणिटकायां द्वादशदेवतानामानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु॥ ४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ प्रातरग्निं प्रातरिन्द्रꣳहवामहे प्रातर्मित्रावरुणा प्रातरश्विना प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातःसोममुत रुद्रꣳहुवेम ॥ षट्प्रातर्भ्यः स्वाहा इदं षट्प्रातर्भ्यः ॥ ५ ॥

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पत-

---

टी० प्रातरग्निमिति जगती प्रातःशब्दोवीप्सावचनः वयम् प्रातःप्रातः पुनःपुनः एतान्देवान् हवामहे आव्हयाम इति प्रत्येकं संबध्यते कान अग्निं इन्द्रं मित्रावरुणौ अश्विनौ भगं पूषणं ब्रह्मणस्पतिं सोमं उत अपि च रुद्रं हुवेम आव्हयाम हवामहे हुवेम । यतेः संप्रसारणे रूपद्वयम् ॥ षट्प्रातर्भ्यः अस्यां षट् प्रातःपदानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु ॥ ६

टी० द्यौः शान्तिरिति एकाधिका शक्करि द्यौः द्युलोकरुपा या शान्तिः अन्तरिक्षरुपाया शान्तिः पृथिवी भूलोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सा मा शान्तिरेधि ॥ द्वादशशान्तिभ्यः स्वाहा इदं द्वादशशान्तिभ्यः ॥ ५ ॥

रूपा या शान्तिः आपोजलरूपा या शान्तिः ओषधयः ओषधिरूपा या शान्तिः वनस्पतयः वृक्षरूपा या शान्तिः विश्वेदेवाः सर्वदेवरूपा या शान्तिः ब्रह्म त्रयीलक्षणं परं वा तद्रूपा या शान्तिः सर्वं सर्वजगद्रूपा या शान्तिः शान्तिरेवशान्तिर्या स्वरूपतः शान्तिः सा मां प्रति एधि अस्तु पुरुषव्यत्ययः आहुतिपरिणामेन सर्वं शान्तिरूपं मां प्रत्यस्त्वित्यर्थः यद्वा द्यौरित्यादिषु विभक्तिव्यत्ययः सप्तम्यर्थेप्रथमा द्यव्यन्तरिक्षे पृथिव्यामप्स्वोषधीषु विश्वेदेवेषु ब्रह्मणि सर्वस्मिंश्च या शान्तिः सा मां प्रत्यस्त्वित्यर्थः ॥ द्वादशशान्तिभ्यः अस्यां कण्डिकायां द्वादशशान्तिपदानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा अप्रतिधृष्याय त्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा ७

टी० समुद्रायत्वेति षड्वातनामानि हेहविः वाताय त्वा त्वां स्वाहा जुहोमि कीदृशाय वाताय समुद्राय समुद्द्रवन्ति उद्भवन्ति सर्वाणि भूतानि यस्मात्स समुद्रस्तस्मै अयं वै समुद्रोयोऽयं पवते एतस्माद्वै समुद्रात्सर्वेदेवाः सर्वाणि भूतानि समुद्द्रवन्ति तस्मा एवैनं जुहोमि इति श्रुतेः सरिराय सह ईरते यच्छन्ति सर्वभूतानि सिद्धार्थानि यस्मात्स सरिरस्तस्मै वाताय हेहविः त्वां जुहोमि अयं वै सरिरोयोऽयं पवत एतस्माद्वै सरिरात्सर्वेदेवाः सर्वाणि भूतानि सहेरते इति श्रुतेः अनाधृष्याय न आधर्षितुं पराभवितुं शक्योऽनाधृष्यः तस्मै अप्रतिधृष्याय न प्रधर्षितुं प्रतियोद्धुं शक्योऽप्रतिधृष्यस्तस्मै वातायेत्युक्तम् अयं वा अनाधृष्योऽप्रतिधृष्योऽयं पवते इति श्रुतेः अवस्यवे अवोरक्षणमिच्छति अवस्यति अवस्यतीत्यवस्युः सुपआत्मनः क्यच् क्याच्छन्दसि इत्युप्रत्ययः अवनशीलाय अशिमिदाय क्लेशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षड्वातेभ्यः स्वाहा इदं षड्वातेभ्यः ॥ ॐ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयोजगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयोविराट्छन्दः पञ्चाविर्वयोगायत्रीछन्दास्त्रिवत्सोवय उष्णिक्छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दोलोकं ता इन्द्रम् ॥ अनडुद्भ्यः स्वाहा इदं अनडुद्भ्यः॥८॥

स्मकं कर्म शिमि तन्नददातीत्यशिमिदस्तस्मै क्लेशनिवर्त्तकाय वाताय अयं वा अवस्युरशिमिदोयोऽयं पवते इति श्रुतेः ॥ षड्वातेभ्यः अस्यां कण्डिकायांष ड्वातनामानि वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु ॥ ७ ॥

टी० अनड्वान्वय इति अनः शकटं वहतीत्यनड्वान्बलीवर्दः अनसि वहेड्किप् अनसोउश्च यस्या अष्टाक्षराः पञ्चपादाः सा पङ्क्तिछन्दोभूत्वा वयः बाल्यादिवयोहेतुभूतमन्नं हव्यमिति यावत् अन्नं वै वय इति श्रुतेः गृह्णातु इति शेषः धेनुः नवप्रसूता सवत्सागौः यस्या द्वादशाक्षराः चत्वारः पादाः सा जगती जगतीछदोभूत्वा वयोगृह्णातु षण्मासात्मकः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालोऽविः तिस्रोऽवयोयस्य त्र्यविः अष्टादशमासः पशुः यस्या एकादशाक्षराः चत्वारः पादा. सा त्रिष्टुप् त्रिष्टुप्छन्दोभूत्वा वयोगृह्णातु दोऽवखण्डने क्तिन्प्रत्ययः दितिं खण्डनमर्हतीति दित्यं धान्यं वहतीति दित्यवाट् यद्वा द्विवर्षः पशुर्दित्यवाट् यस्या दशाक्षराश्चतुष्पादा विराट्छन्दोभूत्वा वयो गृह्णातु पञ्चाविः पञ्चावयोयस्यसः सार्धद्विवर्षः पशुः यस्या अष्टाक्षराःत्रयः पादा सा गायत्री गायत्री छन्दोभूत्वा वयोगृह्णातु त्रिवत्सः त्रयोवत्सा वत्सरा यस्य सः त्रिवत्सः पशुः यस्या चत्वारः पादाः सप्ताक्षराः सोष्णिक् उष्णिक्छन्दोभूत्वावयोगृह्णातु तुर्यवाट् तुर्यं चतुर्थं वर्षं वहतीति तुर्यवाट् चतुर्वर्षः पशुः यस्या अष्टाक्षराश्चत्वारः पादाः सानुष्टुप् अनुष्टुप्छन्दोभूत्वा वयोगृह्णातु यद्वा वय इति तृतीयाविभक्तेर्लुक् वयसा बाल्यादिवयसा हविर्गृह्णातु इति शेषः अन्यत्समानम् ।। अनड्भ्यः अनितिं चित्करोतीति अनः अन प्राणने असुन् अनः शकटं वहन्तीति अनड्वाहोभारवहनसमर्था बलीवर्दाः तेभ्योऽनड्भ्यः स्वाहा सुहुतमस्तु अनडुद्धयोहविर्दानेन सर्वदुःखशान्तिर्भवति तथा च मन्त्रवर्णः अनड्वाहमन्वारभामहे सौरभेयꣳस्वस्तये स न इन्द्र इव देवेभ्योवह्निः संतारणोभव अस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महीधरव्याख्या वयं यमनड्वाहमन्वारभामहे स्पृशामः ।
किंभूतम् सौरभेयं सुरभ्या अपत्यम् स्त्रीभ्योढक् इति ढक्
किमर्थं स्वस्तये अविनाशाय हेऽनड्वन् स त्वं नोऽस्माकं
संतरण[१] तारकोदुःखनाशकोभव किञ्च त्वं बर्हिर्देवानां
वोढा तत्र दृष्टान्तः देवेभ्य इन्द्र इव इन्द्रोयथा देवार्थं
तारकोभवति ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम तत्वा भग सर्व इज्जोहवीति स नोभग पुरएता भवेह ॥ पञ्चभगेभ्यः स्वाहा इदं पञ्चभगेभ्यः ॥ ६ ॥

टी॰ भगएवेति हेदेवाः भग एव भगदेव एव भगवान् धनवान् अस्तु किमन्यैरदातृभिर्धनिभिर्देवैरिति भावः तेन भगदेवदत्तेन धनेन वयं भगवन्तोधनवन्तः स्याम भवेम एवंदेवानुक्त्वाथ भगदेवमाह । हेभग हेभगदेव सर्व इव सर्व एव जनः तं प्रसिद्ध त्वा त्वां जोहवीति अत्यन्तमाव्हयति इष्टसिद्ध्यै हेभग हेभगदेव स त्वमिह नोऽस्माकं कर्मणि पुरएता पुरोग्रे एतीति पुरएता अग्रयायी भव अग्रेसरोभूत्वा सर्वकार्याणि साधयेत्यर्थः ॥ पञ्चभगेभ्यः पचिविस्तारे अच् पञ्चभगेभ्योविस्तीर्णषडैश्वर्येभ्यः स्वाहा सुहुतमस्तु ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्डणां भग इतीङ्गना इति विष्णुधर्मोक्तेः । यद्वा अस्यां कण्डिकायां पञ्चभगपदानि वर्त्तन्ते तेभ्योः पञ्चभगेभ्यः स्वाहा ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महीधरव्याख्या वयं यमनड्वाहमन्वारभामहे स्पृशामः । किंभूतम् सौरभेयं सुरभ्या अपत्यम् स्त्रीभ्योढक् इति ढक् किमर्थं स्वस्तये अविनाशाय हेऽनड्वन् स त्वं नोऽस्माकं संतरणः तारकोदुःखनाशकोभव किञ्च त्वं वह्निर्देवानां वोढ़ा तत्र दृष्टान्तः देवेभ्य इन्द्र इव इन्द्रोयथा देवार्थं तारकोभवति ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम तत्वा भग सर्व इज्जोहवीति स नोभग पुरएता भवेह ॥ पञ्चभगेभ्यः स्वाहा इदं पञ्चभगेभ्यः ॥ ६ ॥

टी॰ भगएवेति हेदेवाः भग एव भगदेव एव भगवान् धनवान् अस्तु किमन्यैरदातृभिर्धनिभिर्देवैरिति भावः तेन भगदेवदत्तेन धनेन वयं भगवन्तोधनवन्तः स्याम भवेम एवंदेवानुक्त्वाथ भगदेवमाह । हेभग हेभगदेव सर्व इव सर्व एव जनः तं प्रसिद्धं त्वा त्वां जोहवीति अत्यन्तमाव्हयति इष्टसिद्ध्यै हेभग हेभगदेव स त्वमिह नोऽस्माकं कर्मणि पुरएता पुरोग्रे एतीति पुरएता अग्रयायी भव अग्येसरोभूत्वा सर्वकार्याणि साधयेत्यर्थः ॥ पञ्चभगेभ्यः पचिविस्तारे अच् पञ्चभगेभ्योविस्तीर्णषड़ैश्वर्येभ्यः स्वाहा सुहुतमस्तु ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्डणां भग इतीङ्गना इति विष्णुधर्मोक्तेः । यद्वा अस्यां कण्डिकायां पञ्चभगपदानि वर्त्तन्ते तेभ्योः पञ्चभगेभ्यः स्वाहा ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐप्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ पञ्चेन्द्रियभ्ये; स्वाहा इदं पञ्चेन्द्रिभ्य; ॥ १६ ॥

टी॰ प्राणायेति । हृदि वर्त्तमानोवायुः प्राणः गुदे वर्त्तमानोवायुः अपानः सवशरीरगतोवायुर्व्यानः नेत्रगोले वर्त्तमानमिन्द्रियं चक्षुः कर्णविवरे वर्त्तमानमिन्द्रियं श्रोत्रम् मुखविवरे उच्चारणार्थं वर्त्तमानमिन्द्रियं वाक् हृदयकमले संकल्पविकल्पार्थं अन्तःकरणरुपेण वर्त्तमानमिन्द्रियं मनः ईदृशेभ्य इन्द्रियेभ्यः स्वाहा सुहुतमस्तु ॥ पञ्चेन्द्रियेभ्यः सर्वप्राणिषु विस्तीर्णेन्द्रियेभ्यः स्वाहा सुहुतमस्तु यद्वा अस्यां कण्डिकायां पञ्चेन्द्रियपदानि वर्त्तन्ते तेभ्यः पञ्चेन्द्रियेभ्यः स्वाहा ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थोवरुणस्य ऋतसदन्यसि वरुणस्य ऋतदनमसि वरुणस्य ऋतसदनमासीद ॥ पञ्चवरुणेभ्यः स्वाहा इदं पञ्चवरुणेभ्यः ॥११॥

टी० वरुणस्योत्तम्भनमिति पञ्चयजूंषि वारुणानि हेहविः त्वं वरुणस्य वरुणदेवस्य उत्तम्भनं उन्नमनभूतं असि भवसि वरुणोहविर्दृष्ट्वा भक्षणार्थं उत्थितोभवतीति भावः। हेहविःपूजे युवां वरुणस्य स्कम्भसर्जनी स्कम्भसर्जनीतुल्ये स्थः भवथः यथा शकटयुगे वद्धयोर्वलीवर्दयोर्गलवहिर्भागे काष्ठनिर्मिते शम्ये स्थाप्येते ताभ्यां वृषयोरितस्ततोगमनं निवार्यते ततः ते स्कम्भसर्जनीशब्देनोच्येते। तथा हविःपूजाभ्यामपि यजमानेषु वरस्यादानपर्यन्तं वरुणोऽनिवार्यते हविःपूजाभ्यां वशीकृतोवरुणोयजमानाय वरं ददातीति भावः स्कम्भ रोधने सर्ज अर्जने स्कम्भनं स्कम्भोरोधः स सर्ज्यते क्रियते याभ्यान्ते स्कम्भसर्जन्यौ विभक्तेः पूर्वसवर्णदीर्घः। यज्ञसमीपे उपवेशनार्थं वरुणायोदुंबरवेत्रादिनिर्मितव्रतिकासनभूतामासन्दीं दद्यात् । हेआ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुप् सूचीभिः शम्यन्तु त्वा ॥
गायत्र्यै स्वाहा इदं गायत्र्यै ॥१२॥

सन्दि त्वं वरुणस्य संवन्धिनी ऋतसदन्यसि ऋताय यज्ञाय सद्यते उपविश्यते यस्यां सा ऋतसदनी करणाधिकरणयोरिति ल्युप्रत्ययः । ऋतं यज्ञस्तन्निष्पत्त्यर्थं उपवेशनस्थानभूतासीत्यर्थः । कृष्णाजिनमस्यामास्तीर्यते । हेकृष्णाजिन त्वं वरुणदेवस्य ऋतसदनं यज्ञार्थमुपवेशनस्थानमसि । तस्मिन्वरुणं स्थापयेत् हेवरुण त्वं वरुणस्य आत्मनः ऋतसदनं यज्ञार्थमुपवेशनस्थानभूतमासन्दीसंस्थितं कृष्णाजिनमासीद यजमानस्येष्टसिद्ध्यर्थं सुखेनोपविश ॥ पञ्चवरुणेभ्यः । जलेषु व्यापकवरुणदेवेभ्यः स्वाहा सुहुतमस्तु अथवा अस्यां कण्डिकायां पञ्चवरुणपदानि वर्त्तन्ते तेभ्यः पञ्चवरुणेभ्यः स्वाहा ॥ ११ ॥

टी० गायत्रीत्रिष्टुबिति । यस्या अष्टाक्षराः त्रयः पादाः सा गायत्री । यस्या एकादशाक्षराश्चत्वारः । पादाः सा त्रिष्टुप् । यस्या द्वादशाक्षराश्चत्वारः पादाः सा जगती यस्या अष्टाक्षराश्चत्वारः पादाः सानुष्टुप् यस्या अष्टाक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ उपयामगृहीतोऽसि सावित्रोऽसि चनोधा-श्चनोधा असि चनोमयि धेहि जिन्वयज्ञं जि-न्वयज्ञपतिं भगाय देवाय त्वा सवित्रे ॐ सा-वित्र्यैस्वाहा इदं सावित्र्यै ॥ १२॥

राः पञ्चपादाः सापङ्क्तिः । यस्या नवाक्षराश्चत्वार पादाः सा बृहती यस्याः सप्ताक्षराश्चत्वारः पादाः सोष्णिक् । यस्या प्रथमपादोऽष्टाक्षरोद्वितीयपादोद्वादशाक्षरस्तृतीयपा-दोऽष्टाक्षरः सा ककुप् । हेयजमान गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह बृहती उष्णिहा सह ककुप् एतानि छन्दांसि सूचीभिः सूचकभूतै हविरादिपदार्थैः त्वा त्वां शम्यन्तु सुखं कुर्वन्तु ॥ विभूतिवर्णने गायत्रीछन्दोऽधि-ष्ठात्री गायत्री ॥ गायत्र्यै गायन्तं भजन्तं यजमानं त्रायते इति गायत्री अथवा प्राणो वैगया इति श्रुतिवचनात् गया एव गायाः प्राणास्तान् त्रायते इति गायत्री तस्यै गायत्र्यै स्वाहा सुहुतमस्तु ॥ १२ ॥

टी० उपयामगृहीतोऽसीति। अत्र सावित्र्या विग्रहपरत्वेन व्याख्यायते । हेसावित्रीविग्रह त्वं सत्यव्रता राज्ञा उपया-मेन पाणिपीडनविधिना गृहीतः भार्यात्वेन स्वीकृतः असि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवसि विवाहोपयमौ समौ तथा परिणयोद्वाहोपयामाः पाणिपीडनम् इत्यमरः । सावित्र्याख्यातं देवीभागवते नवमस्कन्धे पष्टम् । त्वं सावित्र्या अयं विग्रहोऽसिः यद्वा सवितुस्तत्सवितु रितिमन्त्रस्य पादावयवभूतोऽसि । तथा च श्रुतिः गोपथब्राह्मणे । तत्सवितुर्वरेण्यमिमि सावित्र्याः प्रथमः पादः पृथिव्यर्चं समदधादृचाग्निमग्निनाश्रिय-मित्यादिना । तथा भर्गोदेवस्य धीमहीति सावित्र्या द्वितीयः मादोऽन्तरिक्षेण यजुः समदधादित्यादिपूर्ववत् । तथा धियोयोनः प्रचोदयात् इति सावित्र्यास्तृतीयः पादोदिवा साम समदधात्साम्नादित्यमित्यादिपूर्ववत् । अनया च श्रुत्या सावित्रीपादत्रयाद्वेदत्रयलोकत्रयाग्न्यादितेजस्त्रयपूर्वक-सर्वब्रह्माण्डसृष्टिः सावित्रीत एवोक्ता तथा सर्ववेदेषु पुराणेषु च यद्वा सावित्रोऽसि सवितृदेवत्योऽसि यद्वा अत्र सावित्रशब्देन सावित्री गृह्यते । तत्र प्रमाणम् । व्यत्ययो-बहुलमिति ३।१।८५ पुनर्महर्षिपतञ्जलिनाप्युक्तम् । प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति नकश्चित्प्राधान्येन विभक्तिमाश्रयन्ति यां यां विभक्तिमाश्रयतुर्बुद्धिरूपा जायते सा सा आश्रयितव्या १।१।४४ अनेनार्थप्राधान्यं भवति न विभक्तिरिति बोद्धव्यम् । व्यत्ययोभवति स्वादीनामिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन विकरणव्यत्ययः सुपां व्यत्ययः लिङ्गव्यत्ययः पुरुषव्यत्ययः कालव्यत्ययः आत्मनेपदव्यत्ययः परस्मैपद-व्यत्ययः स्वरव्यत्ययः कर्तृव्यत्ययः यङ्व्यत्ययश्चेति महाभाष्ये । चनोधाश्चनोधा असि चन इत्यन्ननाम चनोऽन्नं धत्ते इति चनोधा अन्नस्य धारयिता । अभ्यासेभूयांसमर्थं मन्यन्ते इति यास्कोक्तेः । यतस्त्वमत्यन्त चनोधा असि । अतश्चनोऽन्नं मयि धेहि स्थापय । किञ्च यज्ञं जिन्व प्रीणय जिन्वतिः प्रीतिकर्मा यज्ञपतिं यजमानं च जिन्व तर्पय भगाय ऐश्वर्यादिगुणयुक्ताय सवित्रे सर्वप्राणिकर्त्रे देवाय तल्लोकप्राप्तये इत्यर्थः । त्वां जुहोमीति शेषः । भगमस्यास्तीति भगः अर्शआदित्वादच् ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ! ज्ञानवैराग्ययोश्चैवषण्णां भग इतीरणा इति ॥ सवितृदेवत्या सावित्री तस्यै सावित्र्यै स्वाहा सुहुतमस्तु ॥१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐसरस्वती योन्यां गर्भन्तरश्विभ्यां पत्नी सुकृतं विभर्त्ति। अपाᳬरसेन वरुणो न साम्नेन्द्रᳬ श्रियै जनयन्नप्सु राजा॥ॐसरस्वत्यै स्वाहा इदं सरस्वत्यै॥ १४ ॥

टी० सरस्वतीति। सरः शब्दप्रवाहोयस्यास्तीति सरस्वती अश्विभ्यां पत्नी अश्विनोः पत्नी भूत्वा योन्यामन्तर्ज्ञानकारणत्वात्सर्वशास्त्रमध्ये इन्द्रं ऐश्वर्ययुक्तं गर्भं गीर्यतेस्तूयते सूरिभिरिति गर्भस्तं स्तुतियोग्यं शब्दग्रामम्। गृणातेः अर्त्तिगृभ्यां भन् इति भन्प्रत्ययः। सुकृतं शोभनेन प्रकृतिप्रत्ययविचारेण कृतं संस्कृतं यथातथा बिभर्त्ति अप्सुराजा अपामीश्वरोवरुणः नश्चार्थे मित्रश्च अपां जलानां रसेन साम्ना उदकरसभूतेन सान्त्ववचनेन इन्द्रं पूर्वोक्तलक्षणं शब्दग्रामं श्रियै शोभायै परमात्मनः सकाशात् जनयन् सन् बिभर्त्तीत्यनुषङ्गः। तथाचोक्तम् या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं वर्णानित्यादि। अर्थश्च। या सा सरस्वती मित्रावरुणसदनादग्निसोमस्थानादुच्चरन्ती उद्भवन्ती मित्रोऽग्निर्वरुणः सोमस्तयोः सदनमावासस्थानं परमात्मा यतः श्वासश्च शीतोष्णत्वं तस्मादुच्चरन्ती त्रिषष्टिं वर्णान् जनयति इति॥ सरस्वत्यै स्वाहा सुहुतमस्तु ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ गृहा मा विभित मा वेपध्वमूर्ज विभ्रत ए-मसि । ऊर्ज विभ्रद्वः सुमनाः सुमेधा गृहानै-मि मनसा मोदमानः ॥ गृहमात्रे स्वाहा इदं गृहमात्रे ॥ १५ ॥

टी० गृहामेति । त्रिष्टुब्विराड्रूपा । यस्या एकादशा-र्णास्त्रयः पादा एकोऽष्टार्णः सा विराड्रूपा अत्र प्रथमोदशा-र्णस्तेनैकोना । हेगृहाः यूयं मा विभीत पालकोयजमानो-गत इति भयं मा कुरुत मा च वेपध्वम् कोऽपिशत्रुरागत्य विनाशयिष्यतीति बुद्ध्या कम्पं माकार्ष्ट टुवेपृ कंपने यतो-वयमूर्जं विभ्रतोधारयमाणात्नक्षीणानेव युष्मान् एमसि आ इमः आगताः स्मः । यथा यूयमूर्जं विभ्रतः । तथा-हमपि ऊर्ज विभ्रत् धारयन् सुमनाः शोभनमनस्कः सुमेधाः शोभनधारणाप्रज्ञोपेतः । मनसा दुःखरहितेनः हृष्यन् । गृहानैमि आगच्छामि एमः एमीत्यात्मनि विकल्पेन बहु-वचनम् । अस्मदोद्वयोश्चेत्युक्तेः ॥ गृहस्य माता गृहमाता तस्यै यद्वा गृहे मान्यते पूज्यते जनैरिति गृहमाता तस्यै अथवा गृहे माति पूज्यत्वेन समाविशतीति गृहमाता तस्यै गृहमात्रे स्वाहा सुहुतमस्तु । नग्नृनेष्ट्रिति साधुः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अन्नपतेऽन्नस्य नोदेह्यनमीवस्य शुष्मिणः प्रप्रदातारन्तारिषऽऊर्जं नोधेहि द्विपदे चतुष्पदे ॥ अन्नपूर्णायै स्वाहा इदं अन्नपूर्णायै १६

टी० अन्नपते इति अत्र अन्नपूर्णादेहपरत्वेन व्याख्यायते । उपरिष्टाद्बृहती । अष्टार्णत्रिपादाश्चतुर्थो द्वादशार्णः । हेअन्नपते अन्नस्य पालक अन्नपूर्णाविग्रह यद्वा अनस्य पतिः पालयित्री अन्नपतिः अन्नपूर्णादेवी तत्संबोधने हेअन्नपते हेअन्नपूर्णे । विभाषासपूर्वस्येति पतिशब्दान्तस्य विकल्पेन नकाराभावः । त्वं नोऽस्मभ्यमन्नस्य देहि कर्मणि षष्टी । अन्नं प्रयच्छ यद्वा अन्नस्य स्वमंशं देहि कीदृशस्यान्नस्य अनमीवस्य नास्ति अमीवा व्याधिर्येन तदनमीवं तस्य । शुष्मिणः शुष्ममिति वलनाम शुष्मं वलं विद्यते यस्मात्तत् । शुष्मि तस्य रोगनाशकं वलहेत्वन्नं प्रयच्छेत्यर्थः किञ्च दातारं प्रप्रतारिषः । अन्नस्य दातारं प्रकर्षेण वर्धय । प्रसमुपोदःपादपूरणे इति पादपूर्त्यै प्रोपसर्गस्य द्वित्वम् । अतिशयार्थं वोपसर्गाभ्यासः । अभ्यासेभूयांसमर्थं मन्यन्ते इति यास्कोक्तेः । तृ सवन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरणयोः । लेटोमध्यमैकवचनम् । सिब्बहुलं लेटि इति सिप्प्रत्ययः । आर्धधातुकस्येतीट् । छन्दसि धातोर्वृद्धिः । लेटोऽड़ाटौ इत्यडागमः । इतश्चलोपइति लेट इकारलोपे रुत्वविसर्गौ तारिष इतिरुपम् । किञ्च नोऽस्माकं द्विपदे मनुष्ये पुत्रादौ चतुष्पदे गवादौ च ऊर्जमन्नं धेहि धारय यद्वा द्वौपादौ यस्य स द्विपात् तस्मै द्विपदे । चत्वारः पादा यस्य स चतुष्पात्तस्मै । पादःपत् पादस्य लोपोऽहः स्त्यादिभ्य इति अन्तलोपे पदादेशः द्विपदे मनुष्याय चतुष्पदे गवादये अन्नं धेहि देहि । जातावेकवचनम् सर्वेभ्योनरपशुभ्योऽन्नं देहीत्यर्थः ॥ अन्नैःपूर्णा अन्नपूर्णा तस्यै अथवा अन्नानिपूरयति यजमानेभ्य इति अन्नपूर्णातस्यै अन्नपूर्णायै स्वाहा सुहुतमस्तु । पुरी आप्यायने वादान्तेति साधुः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ श्रीश्चतेलक्ष्मी श्च पत्न्यावहोरात्रेपार्श्वेनक्षत्रा-
णिरूपमश्विनौव्यात्तम् । इष्णन्निषाणाम्मुम-
इषाण सर्वलोकम्मइषाण ॥ ॐ महालक्ष्म्यै
स्वाहा ॥ १७ इदं महालक्ष्म्यै ॥

टी० श्रीश्चते लक्ष्मीरिति । हेमहालक्ष्मि । पूर्वं व्याख्या
ता । महालक्ष्मै ! महतीचासौलक्ष्मीः । महालक्ष्मीस्तस्यै
अथवा महद्भिर्लक्ष्यते दृश्यते इति महालक्ष्मी स्तस्यै
महालक्ष्म्यै स्वाहा सुहुतमस्तु । लक्ष दर्शनाङ्कनयोः लक्षे
र्मुट्चेति ईप्रत्ययस्तस्य मुट् । लक्ष्मीः पद्मा विभूतिश्च कृ-
दिकारात् इतिङीपि लक्ष्मी इत्यपिभवति । लक्ष्मी
संपत्तिशोभयोः । ऋद्धचौपधौ च पद्मायाम् इति
मेदिनी ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ देवीर्द्वार इन्द्रꣳ सघातवीड्वीर्यामन्नवर्धयन् । आ वत्सेन तरुणेन कुमारेण च मीवतापार्वण ꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ ॐ महारिष्टविना।विनाशिन्यै स्वाह इदं महारिष्टविनाशिन्यै ॥ १८ ॥

ॐ अम्बे अम्बिके ऽम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पिलवासिनीम् ॥ ॐ चण्ड्यै स्वाहा इदं चण्ड्यै ॥ १९ ॥

टी० देवीर्द्वार इति । एकाधिका शक्वरी । प्रैषरूपा द्वारः भुक्तिमुक्तिनां द्वारभूता देवीर्देव्योमहारिष्टविनाशिनी प्रभृतयः पूर्वसवर्णदीर्घः अन्यत्पूर्वं व्याख्याता यजमानानां महारिष्टं विनाशयतीति महारिष्टविनाशिनी तस्यै स्वाहा सुहुतमस्तु ॥ १८ ॥

टी० चण्डति प्रचण्डति दैत्यादीनिति चण्डी तस्यै स्वाहा सुहुतमस्तु । चडि कोपे पचाद्यच् चन्द्रादिभ्यश्चेति ङीष् चण्डी कात्यायनीदेव्यो हिंसाकोपनयोपितोरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ द्यौरासीत्पूर्वचित्तिरश्वआसीद्बृहद्वयः अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ द्यौराल्यै स्वाहा इदं द्यौराल्यै ॥ २० ॥

कोपः । दैत्यादीनिति कोपनशीला चण्डी । प्रसादोनिष्फलोयस्य कोपोऽपिच निरर्थकः । न तं भर्त्तारमिच्छन्ति षण्ढं पतिमिवस्त्रियः । इत्यादिमहाभयजनकत्वेनैव कोपस्य साफल्योक्तेः तादृश एव कोपे चण्डिधातोर्मुख्यवृत्या प्रवृत्तेः ॥ १९ ॥

टी० द्यौरासीदिति । अत्र पूर्वचित्तिपरत्वेन व्याख्यायते । पूर्वं आग्निध्रेन राज्ञा रुपातिशयेन भार्यार्थं चिन्त्यते इति पूर्वचित्तिः यद्वा रुपातिशयात्पूर्वमेव पुंसां चित्तमुपैतीति पूर्वचित्तिः द्यौः द्योतते सर्वाप्सरसां मध्ये रुपातिशयेन प्रकाशते इति द्यौः आसीत् द्युत दीप्तौ बाहुलकात् डोप्रत्ययः । यद्वा तपस्यन्तं आग्निध्रं राजानं प्रतिमोहनार्थं द्यौति अभिगच्छतीति द्यौः आसीत् । द्यु अभिगमने विच् कदाचिदाग्निध्रोराजा पुत्रकामनार्थं मन्दराचलद्रोण्यां भगवन्तमाराधयामास तदुपलभ्य ब्रह्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदसि गायन्तीं पूर्वचित्तिसंज्ञकामप्सरसं यज्ञभागं दत्त्वा संभोगार्थं प्रस्थापयामास रूपातिशयं कृत्वा आयान्तीं तां दृष्ट्वा मोहं प्राप्य भार्यात्वेन स्वीकृतवान् । इति पौराणिकी कथात्रानुसन्धेया अथवा सर्वाप्सरसामग्रे रूपातिशयेन द्योति अभितोगच्छतीति द्यौः आसीत् अश्वः अश्नुते सर्वसौन्दर्यरूपं व्याप्नोतीति अश्वोऽस्यादेहः बृहद्वयः श्रेष्ठरूपः आसीत । अशूयूपिलटीति क्वन् इति क्वन्प्रत्ययः । अविः अवति बोद्धव्यं वस्तु प्रकाशते इति अविरस्या बुद्धिः पिलिप्पिला यजमानेषु दयार्द्रभावा आसीत् । अत्र रक्षणादौ इन्प्रत्ययः । रात्रिः राति सुखं ददातीति रात्रिरस्याः कान्तिः राशदिभ्यां त्रिप् । पिशंगिला पिशमिति रूपनाम पिशं सर्वकान्तिरूपं गिलतीति पिशङ्गिला आसीत् । अस्याः कान्तिः सर्वकान्तिरूपाणामन्तर्भूतत्वात् । श्रीमद्भागवते एकादशस्कन्धे विभूतिवर्णने अस्याः श्रेष्ठत्वमुक्तम् । यद्वा पूर्वैर्महर्षिभिः पाषाणेष्टकादिभिश्चेतव्या इति पूर्वचित्तिः तत्र स्थापिता इति यावत् काचित् मार्गदेवी । द्यौरा आसीत् । द्योतन्ते देवा यस्यामिति द्यौः द्युत दीप्तौ बाहुलकात् डौप्रत्ययः । द्यावं स्वर्गं राति यजमानेभ्योददातीति द्यौरा आसीत् । आतोऽनुपसर्गे कः इति कः टाप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्या वाहनभूतोऽश्वः वृहद्वयः स्थूलदेह आसीत् । अत्र- तीति अविनिंश्रासभूताभूमिः पिलिपिला आच्छादनादि विना वृष्ट्या क्लिन्ना आसीत् । पिशंगिला पिशं जनैर्दत्तं पत्रादिरूपं गिलतीति पिशङ्गिला मार्गदेवी रात्रिः यज- मानेषु सुखदात्री आसीत् । द्यौराल्यै । द्यौतन्ते देवा य- स्यामिति द्यौः द्युत दीप्तौ नौवत् वाहुलकात् डौप्रत्ययः । यद्वा द्योततेरेव अन्येभ्योऽपीति डः द्यः द्यंश्रवति रत्नतीति द्यौः क्विप् ज्वरत्वरेत्यूठ वृद्धिः । द्यावि स्वर्गे रमन्ते इति द्यौराः उर्वश्याद्यप्सरसः । रमु क्रीडायाम् डः यद्वा द्यौर्धि- यन्ते यासान्ता द्यौराः गेमत्वार्थियः । द्यौराणां आली प्रि- यसखीभूता पूर्वचित्तिः द्यौराली तस्यै द्यौराल्यै स्वाहा सुहुतमस्तु । यद्वा द्यावं स्वर्गं राति ददातीति द्यौराली रा दाने वाहुलकात् लरु वव्हादिभ्यश्चेति ङीप् काचित् मा- र्गदेवी तस्यै स्वाहा ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॐ वास्तुदेवाय स्वाहा इदं वास्तुदेवाय ॥२१॥

टी० वसोः पवित्रमसीति । वेश्मभूर्वास्तुरस्त्रियामिति वचनाद्वास्तुशब्दोऽत्रनपुंसकलिंगोगृह्यते । हेवास्तोत्वं वसोः गृहे वसतीति वसुर्गृहस्थोमनुष्यः तस्य वसोः पवित्रमसि चित्तशोधकं भवसि । यद्वा हेवास्तो वसोर्जनानां वासभूतस्य आलयस्य पवित्रं शोधकं असि । अथवा पविर्वज्रं तस्मात्त्राणकरं असि । पविरिव पविर्मृत्युस्तस्मात्त्राणकरं वा असि । कीदृशं त्वं शतधारं तथा सहस्रधारम् । शतसहस्रशब्दौ अपरिमितार्थवचनौ अपरिमिता धनधान्यगोमहिष्यादीनां धारा येन तत् । एवं भूतं त्वमसि । वसोः पवित्रमिति द्विरुक्तिः अभ्यासे भूयासमर्थं मन्यन्ते इति यास्कोक्तिः । इदानिं गृहं प्रतिवदति हेगृह सविता प्रेरकोदेवः सूर्य इन्द्रोवा पूर्वोक्तरीत्या शतधारेण वसोः पवित्रेण त्वः त्वां पुनातु शोधयतु सुप्वेति पवित्रविशेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे काशान्दिग्भ्योनकुलान्वभ्रुकानवान्तरदिशाभ्यः ॐ भूमिदवायस्वाहा इदं भूमिदेवाय ॥ २२ ॥

णम् । सुष्ठु पुनातीति सुपूः तेन सुप्वा । नुडागमाभाव आर्षः । इदानिं वासुदेवं प्रतिवदति । हेवास्तुदेव यजमानोयां कामनामिच्छति कां सुखरूपां तां कामनां अधुक्षः दुह प्रपूरणे प्रपूरितवानसि ॥ वास्तुनि गेहे दिव्यति प्रकाशते इति वास्तुदेवः अथवा वास्तुरूपेण गृहभूमिरूपेण दीव्यतीति वास्तुदेवस्तस्मै वास्तुदेवाय स्वाहा सुहुतमस्तु ॥ २१ ॥

टी० भूम्या आखूनिति । भूम्या भूम्यै भूमिप्रीतये आखून अन्तरिक्षाय अन्तरिक्ष प्रीतये पाङ्क्त्रान् मूषकजातिविशेषान् । दिवे स्वर्गप्रीतये काशान् तद्वदानेव दिग्भ्योदिक्प्रीतये नकुलान् अवान्तरदिशाभ्यः अवान्तरदिशाप्रीतये वभ्रुकान् आलभते नियुनक्ति ॥ भूम्या देवोभूमिदेवः अथवा भूम्यां दीव्यति प्रकाशते इति भूमिदेवः भूमिरूपेण दीव्यतीति भूमिदेवोवास्तस्मै भूमिदेवाय स्वाहा सुहुतमस्तु ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ॐगैड्डुदेवाय स्वाहा इदं गैड्डुदेवाय ॥ २३ ॥

टी०गेन गणेशेन गैर्गन्धर्वैर्गैं गगने वा आ ईड्यते स्तूयते इतिं गैड्डुः शिवः गपूर्वात् आउपसर्गाच्च ईड स्तुतौ इति धातोर्बाहुकात् उप्रत्ययः यद्वा समाधिना योगिनोयत्र-गच्छन्तीति गः परमात्मा तं पुत्रकामनार्थं आ इड्डे स्तौतीति गैड्डुःशिवः यद्वा गाते गच्छन्तीति गाः पशवः गाङ् गतौ विच् तैः आ ईड्यते स्तूयते इति गैड्डुः शिवः पशुपतित्वात् । यद्वा गाते गच्छन्ति गावोनिवासार्थं यस्मिन्निति गा गोष्ठं तस्मिन् आ ईड्यते पूजादिना स्तूयते जनैर्यः सोगैड्डुः शिवः सचासौ देवः गैड्डुदेवस्तस्मै गैड्डुदेवाय स्वाहा सुहुतमस्तु ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे काशान्दिग्भ्योनकुलान्वभ्रुकानवान्तरदिशाभ्यः ॐ भूमिदेवायस्वाहा इदं भूमिदेवाय ॥ २२ ॥

णम् । सुष्ठु पुनातीति सुपूः तेन सुप्वा । नुडागमाभाव आर्षः । इदानिं वास्तुदेवं प्रतिवदति । हेवास्तुदेव यजमानोयां कामनामिच्छति कां सुखरूपां तां कामनां अधुक्षः दुह प्रपूरणे प्रपूरितवानसि ॥ वास्तुनि गेहे दिव्यति प्रकाशते इति वास्तुदेवः अथवा वास्तुरूपेण गृहभूमिरूपेण दीव्यतीति वास्तुदेवस्तस्मै वास्तुदेवाय स्वाहा सुहुतमस्तु ॥ २१ ॥

टी० भूम्या आखूनिति । भूम्या भूम्यै भूमिप्रीतये आखून अन्तरिक्षाय अन्तरिक्ष प्रीतये पाङ्क्त्रान् मूषकजातिविशेषान् । दिवे स्वर्गप्रीतये काशान् तद्भक्षानेव दिग्भ्योदिक्प्रीतये नकुलान् अवान्तरदिशाभ्यः अवान्तरदिशाप्रीतये वभ्रुकान् आलभते निग्रुनक्ति ॥ भूम्या देवोभूमिदेवः अथवा भूम्यां दीव्यति प्रकाशते इति भूमिदेवः भूमिरूपेण दीव्यतीति भूमिदेवोवास्तस्मै भूमिदेवाय स्वाहा सुहुतमस्तु ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ॐगैड्डुदेवाय स्वाहा इदं गैड्डुदेवाय ॥ २३ ॥

टी०गेन गणेशेन गैर्गन्धर्वैर्गं गगने वा आ ईड्यते स्तूयते इति गैड्डुः शिवः गपूर्वात् आउपसर्गाच्च ईड स्तुतौ इति धातोर्बाहुकात् उप्रत्ययः यद्वा समाधिना योगिनोयत्र-गच्छन्तीति गः परमात्मा तं पुत्रकामनार्थं आ इड्डे स्तौतीति गैड्डुःशिवः यद्वा गाते गच्छन्तीति गाः पशवः गाङ् गतौ विच् तैः आ ईड्यते स्तूयते इति गैड्डुः शिवः पशुपतित्वात् । यद्वा गाते गच्छन्ति गावोनिवासार्थं यस्मिन्निति गा गोष्ठं तस्मिन् आ ईड्यते पूजादिना स्तूयते जनैर्यः सोगैड्डुः शिवः सचासौ देवः गैड्डुदेवस्तस्मै गैड्डुदेवाय स्वाहा सुहुतमस्तु ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसिमा त्वाहिꣳसीन्मा माहिꣳसीः ॥ ॐ क्षेत्रपालाय स्वाहा इदं क्षेत्रपालाय ॥ २४ ॥

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा वयमिदन्तदवयजामहे स्वाहा ॥ ॐ ग्रामदेवाय स्वाहा इदं ग्रामदेवाय ॥२५॥

टी० क्षत्रस्य योनिरसीति हेक्षेत्रपाल त्वं क्षत्रस्य योनिरसि उत्पत्तिस्थानभूतोऽसि क्षद संवरणे ऽष्ट्रन् । तथा क्षत्रस्य नाभिरसि नहनं वन्धनं तद्रूपोऽसि । णह वन्धने नहोभ इतीरु् हस्य भः हेक्षेत्रपाल सर्वोऽपिजनः त्वा त्वां माहिंसीत । त्वञ्च मा मां माहिंसीः ॥ क्षेत्रं पालयतीति क्षेत्रपालस्तस्मै क्षेत्रपालाय स्वाहा सुहुतमस्तु पाल रक्षणे कर्मण्यण् ॥ २४ ॥

टी० यद्ग्रामे इति । हेग्रामदेव ग्रामे वसन्तोत्रयं यदेनः पापं ग्रामोपद्रवरुपम् चकृमा चकृम कृतवन्तः । संहितायां दीर्घः । तथा अरण्ये वने वसन्तोयदेनोमृगोपद्रवादिरुपं चकृम । तथा सभायां स्थित्वा यदेनोमहाजनतिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम् ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्ति नोमघवा धात्विन्द्रः ॥ ॐ स्वर्गेन्द्राय स्वाहा इदं स्वर्गेन्द्राय ॥ २६ ॥

स्कारादिकं चक्रम । तथेन्द्रिये जिह्वोपस्थरुपे प्रीतिमन्तोवयं यदेनः कलञ्जभक्षणपरस्त्रीगमनादिकं चक्रम । तथान्यत्रापि भृत्यस्वाम्यादौ यदेनः ताडनावज्ञादिकं चक्रम । त्वत्प्रसादात्तदिदं सर्वं पापमवयजामहे विनाशयाम अवपूर्वोयजिर्नाशनार्थः । स्वाहा ग्रामदेवाय सुहुतमस्तु ॥ ग्रामस्य देवोग्रामदेवः अथवा ग्रामे दीव्यति प्रकाशते इति ग्रामदेवः। ग्रामरुपेण दीव्यति वा ग्रामदेवस्तस्मै ग्रामदेवाय स्वाहा सुहुतमस्तु ॥ २५ ॥

टी० त्रात्रारमिन्द्रमिति । पूर्वं व्याख्याता । स्वर्गेन्द्राय स्वाहा इदं स्वर्गेन्द्राय स्वाहा स्वर्गे स्थित इन्द्रः स्वर्गेन्द्रस्तस्मै स्वर्गेन्द्राय सुहुतमस्तु ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनमोऽस्तुसर्पेभ्योये केच पृथिवीमनु । येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्योनमः ॥ ॐपातालवासुकिभ्यः स्वाहा इदं पातालवासुकिभ्यः ॥ २७ ॥

ॐमित्रोन एहि सुमित्रध इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳस्योनः स्योनम् । स्वान भ्राजाङ्घारे वम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वोदभन् ॥ मित्रलोकाय स्वाहा इदं मित्रलोकाय ॥२८॥

टी० नमोऽस्तु सर्पेभ्य इति व्याख्याता । वसु रत्नं के मूर्द्धि यस्य स वसुकः अथवा वसु रत्नं कायतीति वसुकः कै शब्दे कप्रत्ययः । वसुकस्यापत्यानि पुमांसोवासुकयः अत इञ् । पाताले स्थिता वासुकयः पातालवासुकयस्तेभ्यः पातालवासुकिभ्यः स्वाहा सुहुतमस्तु ॥२७॥

टी० मित्रोन एहीति हेमित्रलोक त्वं नोऽस्माकं यजमानमितिशेषः । यजमानं प्रत्येहि आगच्छ किंभूतस्त्वम् मित्रः सखा प्रीतियुतः यद्वा मित्रोरविरुपः। तथा सुमित्रधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोभनानि मित्राणि दधाति पुष्यतीति सुमित्रधः। परम-श्वर्येणोपेतत्वादत्रेन्द्रशब्देन यजमानः तथा च श्रुतिः। एष वा अत्रेन्द्रोभवति यद्यजमान इति हेमित्रलोक त्वमिन्द्रस्य यजमानस्य दक्षिणमूरुमाविश दक्षिणे ऊरावुपविशेत्यर्थः। किंभूतस्त्वम् उशन् वशकान्तौ वष्टि उशन् शतृप्रत्ययः ऊरुं कामयमानः। तथा स्योनः सुखभूतः। किंभूतमूरुम्। उशन्तं सोमं कामयमानं स्योनमुपवेशे सुखकरम्। पुरा देवाः सोमं क्रीतमिन्द्रस्योरावुपवेशयन् तस्मादत्रेन्द्रशब्देन यजमानः। तदाहतित्तिरिः दिवा वै सोमम-क्रीणं स्तमिन्द्रस्योरौ दक्षिण आसादयन् स खलु वा एत र्हीन्द्राथोयजते तस्मादेवमाह इति सोमरक्षकान्देवविशेषान्प्रत्याह। स्वनतीति स्वानः। भ्राजते शोभतेऽसौ भ्राजः। अङ्घस्य पापस्यारिरङ्घारिः विभर्ति पुष्णाति विश्वमिति वम्भारिः। हसतीति हस्तः सर्वदा हृष्टरूपः। शोभनौ हस्तौ यस्य स सुहस्तः। कृशं दुर्बलमनिति जीवयतीति कृशानुः। स्वानादयः सप्त सोमरक्षका देवविशेषाः। हे-स्वानादयः सप्तदेवाः वोयुष्माकमेते सोमक्रयणाः सोमः क्रीयते यैस्ते सोमं क्रेतुमानीता हिरण्यादिपदार्थाः पुरतः स्थापिताः तान् पदार्थान् यूयं रक्षध्वमवत। वोयुष्मान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मादभन् वैरिणोमाहिंसिषत । दभ्नोतिर्हिंसाकर्मा । स्वाना-दयोधिष्ण्याधिष्ठातारः सोमरक्षकाः तदाह तित्तिरिः । स्वानभ्राजेत्याह ते चामुष्मिँल्लोके सोममरक्षन् इति मेद्यति स्नेहं करोतीति मित्रम् । ञिमिदा स्नेहने अमिचिमिदिशदिभ्य इति क्त्र मित्रस्य लोकः । मित्र-लोकस्तस्मै यद्वा सर्वेषां जीवानां मित्रं परमात्मा स एव लोकोभक्तानां निवासस्थानं तस्मै तत्प्राप्तये इत्यर्थः॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐराजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानꣳस्वे दमे ॥ ॐमान्धात्रे स्वाहा इदं मान्धात्रे ॥ २६ ॥

टी० राजन्तमध्वराणामिति। वयमीदृशं मान्धातारमुपैमः। कीदृशम् । राजन्तं दीप्यमानम् । अध्वराणां गोपां गोपायतीति गोपास्तं यज्ञानां गोप्तारम् । ऋतस्य सत्यवचनलक्षणस्य व्रतस्य दीदिविं दीपयितारम् मान्धातुः समीपे व्रतं गृहीत्वा सत्यं वदतीत्याशयः । स्वे दमे स्वकीये यज्ञगृहे वर्धमानं चातुर्मास्यसोमपश्वादिभिरभिवृद्धिं गच्छन्तम् दाम्यन्ति गृहस्था यत्रेति दमोगृहम् । दिवेः क्विप्रत्ययोवाहुलकात लिङ्वद्भावद्वित्वम् : तुजादीनां दीर्घोभ्यासस्येत्यभ्यासदीर्घः । देवयतीति दीदिविः ॥ मां लक्ष्मीं दधाति धारयति पोषयति वा मान्धाता तृच् अलुक्समासः । अथवा युवनाश्वस्य कुक्षिं भित्वा उत्पन्नोऽयं बालकः कं धास्यतीति दुखितैर्विप्रैरुक्ते सति यज्ञे आराधित इन्द्रोः मां धाता पाता हेवत्स मारोदीरिति ब्रुवन् मुखे तर्जनीमदात् इति मांधाता राजा तस्मै माधात्रे स्वाहा सुहुतमस्तु । यद्वा अस्मच्छब्दार्थे जीवं धयति पाययतीति मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषाᳬंसहस्रयोजनेव धन्वानि तन्मसि॥ ॐ तीर्थराजा स्वाहा इदं तीर्थराजाय॥३०॥

धाता जीवस्य तृप्तिकरस्तस्मै स्वाहा ॥ २९ ॥

टी० येतीर्थानीति। ये चोरादयः अथवा ये क्रूररुद्राः तीर्थानि प्रयागकाश्यादीनि तीर्थयात्राकारीणां प्रतिवन्धकार्थं प्रचरन्तिगच्छन्ति कीदृशाः। सृकाहस्ता सृकेति आयुधनाम । सृका आयुधानि हस्ते येषान्ते निषङ्गिणः निषङ्गाः खड्गा विद्यन्ते येषान्ते सृकाहस्तत्वेपि निषङ्गित्वोक्तिः खड्गप्राधान्याय तेषां चोरादीनां क्रूररुद्राणां वा धन्वानि धनूंषि सहस्रयोजने सहस्रं योजनानि यस्मिँस्तादृशे पथि सहस्रयोजनव्यवहिते मार्गे तीर्थप्रसादाद्वयमवतन्मसि अवतन्म अवतारयामः अपज्यानि कृत्वास्मत्तोदूरंक्षिपाम इत्यर्थः तीर्थानां राजा प्रयागादिः तीर्थराजस्तस्मै स्वाहा सुहुतमस्तु। यद्वा तीर्थानां प्रयागादितीर्थानां राजा ईश्वरस्तस्मै तीर्थराजाय स्वाहा । राजाहसखिभ्यष्टच् इति टच ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐव्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।
दक्षिणां श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥
ॐव्रतराजाय स्वाहा इदं व्रतराजाय ॥ ३१ ॥

टी० व्रतेन दीक्षामिति । यजमानोव्रतेन दीक्षामाप्नोति दीक्षयादक्षिणामाप्नोति दक्षिणा विभक्तिलोपः । दक्षिणया श्रद्धामाप्नोति श्रदिति सत्यनाम । श्रत् सत्यं धीयते यस्यां सा श्रद्धा आस्तिक्यबुद्धिः पुण्यवतां मनोविशेषः । श्रद्धया सत्यं ज्ञानमनन्तं ब्रह्माप्यते प्राप्यते । श्रद्धां विना ज्ञानाभावात् ॥ व्रतानां राजा व्रतराजस्तस्मै व्रतराजाय स्वाहा सुहुतमस्तु ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा॥ ॐ पुनर्दिक्पालेभ्यः स्वाहा इदं पुनर्दिक्पालेभ्यः॥ ३२।

टी॰ प्राच्यै दिशे स्वाहेति पूर्वादिक् प्राची दक्षिणा दिक् दक्षिणा पश्चिमा दिक् प्रतीची उत्तरा दिक् उदीची ऊर्ध्वा दिक् अधोदिक् अवाची दिक् एताभ्योदिग्भ्यः स्वाहा॥ पूर्वदिशमारभ्यस्वावधिपर्यन्ता दिक् अर्वाची तस्यै दिशे स्वाहा सुहुतमस्तु एवमन्यत्राप्यर्वाच्योदिशोज्ञेयाः॥ पुनरपि दिशां पालकेभ्यः स्वाहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्ने: पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोम य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुता ँ सप्तमी बृहस्पते रष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ ॐ तिथिभ्यः स्वाहा इदं तिथिभ्यः ॥३३॥

टी० अग्ने: पक्षतिरिति । अग्नेर्देवस्य पक्षतिः प्रति-। पत्तिथिरस्तु पक्षोमासार्द्धके पार्श्वे ग्रहे साध्यविरोधयोः केशादेः परतोवृन्दे बले सखिसहाययोः । चुल्लीरन्ध्रे पतत्रे च वाजिकुञ्जरपार्श्वयोः । इत्यभिधानोक्तेः । पक्षस्यार्द्धमासस्य मूलं प्रतिपत् पक्षतिः । पक्षाचिरिति मूलार्थेति प्रत्ययः । पक्षतिस्तु भवेत्पक्षमूले च प्रतिपत्तिथौ इत्यमरः । वायोर्देवस्य निपक्षतिर्द्वितीयातिथिरस्तु नीचा पक्षतिर्निपक्षतिर्द्वितीया । तृतीयातिथिरिन्द्रस्यास्तु । चतुर्थीतिथिः सोमस्य अदित्यै चतुर्थी षष्ठ्यर्थे । पञ्चमीतिथिरदित्याः। षष्ठीतिथिरिन्द्राण्याः सप्तमीतिथिर्मरुताम् । अष्टमीतिथिर्बृहस्पतेः । नवमीतिथिरर्यम्णोदेवस्य दशमीतिथिर्धातुर्देव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य । एकादशीतिथिरिन्द्रस्य । द्वादशीतिथिर्वरुणस्य त्र-
योदशीतिथिर्यमस्य देवस्यास्तु । विभक्तिव्यत्ययोवा ।
पञ्चत्याग्नि देवं प्रीणामिएवमग्रेव्याख्येयम् । अत्रानु-
क्तेपि ज्योतिःशास्त्राच्चतुर्दशीपञ्चदशीदेवौ लिख्येते चतु-
र्दशीतिथिः शिवस्यास्तु पञ्चदशीतिथिः शशिनोऽस्तु ॥
सूर्यचन्द्रगत्यन्तरान्निष्पन्ना याः प्रतिपदाद्याः तिथयस्ता-
भ्यस्तिथिभ्यः स्वाहा सुहुतमस्तु । अतन्ति सूर्यचन्द्र-
गत्यन्तरात्सततं निर्गच्छन्तीति तिथयः । अत सातत्य
गमने ऋतन्यञ्जीति इथिन्प्रत्ययः । पृषोदरादित्वाद
ल्लोपः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहो-रात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्याᳬस्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्योदेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्य स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ॐ नक्षत्रेभ्यः स्वाहा इदं नक्षत्रेभ्यः ॥ ३४ ॥

टी॰ नक्षत्रेभ्यः स्वाहेति । न क्षदते न हिनस्तीति नक्षत्रम् । क्षदेति सौत्रोधातुर्हिंसार्थे वर्त्तते आत्मनेपदीष्ट्रन् नभ्राराननपादिति नञः प्रकृतिभावः यद्वा णक्ष गतौ नक्षतीति नक्षत्रम् अमिनक्षिकलिभ्योऽत्रनिति अत्रन्प्रत्ययः अथवा न क्षणोतीति नक्षत्रम् । क्षणु हिंसायाम् ष्ट्रन् बाहुलकाणूणोत्रिलोपः । क्षत्रभिन्नत्वान्नक्षत्रं वा यद्वा न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥ ॐ योगेभ्यः स्वाहा इदं योगेभ्यः ॥ ३५ ॥

क्षरतीति नक्षत्रम् । क्षरतेः क्षीयतेर्वा क्षत्रमिति निपात्यते । नक्षत्राण्येव नाक्षत्रियाणि तेभ्योनाक्षत्रियेभ्यः नक्षत्राद्घ इति स्वार्थेघप्रत्ययः । आयनेयीनीयिय इति घस्येयादेशः। आर्तवेभ्यः ऋतुसंबन्धिभ्यः । रश्मिभ्यः किरणेभ्यः । अन्यत्पष्टम् ॥ चन्द्रगतेर्निष्पन्नानि ;अश्विन्यादिनक्षत्राणि तेभ्योनक्षत्रेभ्यः स्वाहा सुहुतमस्तु ॥ ३४ ॥

टी॰ योगे योग इति सखायः परस्परसख्यं प्राप्ताः । ऋत्विग्यजमानाः । वयंइन्द्रं ऐश्वर्यवन्तमैश्वर्यप्रदं वा योगं ऊतये अवनाय रक्षणाय हवामहे आह्वयामः ह्वः शपि संप्रसारणमुक्त सति वाजेवाजे तत्तदन्ने मनुष्याणां देवानां च दातव्ये सति तत्तदन्नप्राप्तिनिमित्तं वा किंभूतम् । योगे योगे तवस्तरम् युज्यतेऽनुष्ठीयते इति योगः कर्म तस्मिन् । तत्तद्यागादिकर्मणि तवस्तरं वलवत्तरं फलं दातुमुत्साहवन्तम् । तव इति वलनाम । तवोवलमस्यास्तीति तवस्वी असमाया इत्यादिना विन् अत्यन्तं तवस्वी तवस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐआदित्यं गर्भं पयसा समङ्धिसहस्रस्य प्रतिमां विश्वरूपम् । परिबृङ्धि हरसा माभिमंस्था शतायुषं कृणुहि चीयमानः ॥ॐवारेभ्यः स्वाहा इदं वारेभ्यः ॥ ३६ ॥

रस्तं अतिशयने तरप् । विन्मलोलुक् । तरपि विनोलुक् । सूर्यचन्द्रगतियोगान्निष्पन्ना ये विष्कुम्भाद्या योगास्तेभ्यो-योगेभ्यः स्वाहा सुहुतमस्तु ॥ ३५ ॥

टी० आदित्य गर्भमिति । हेवार त्वम् । सप्तवारनामानि आदत्ते इति आदित्यः सूर्यादिग्रहसप्तकम् । तथाभूतमादित्यम् । पयसा असमञ्जुतेन क्षीरेण क्षीरोत्पन्नेन घृतेन वा समङ्धि स्निग्धतां कुरु प्रीतिं कुर्वित्यर्थः । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु । लोटि मध्यमैकवचने रूपम् । कीदृशमादित्यम् । गर्भं गीर्यते स्तूयते सर्वैर्जनैरिति गर्भस्तम् गृणातेर्भप्रत्ययः यद्वा गृह्णाति शास्त्रोक्तानि स्वस्वकर्माणि इति गर्भस्तम् । पचाद्यच् । हृग्रहोर्भश्छन्दसीति हस्यभः । सहस्रस्य प्रतिमां बहुधनस्य प्रतिमाभूतं बहुधनप्रदमित्यर्थः । विश्वं सर्वं रूपयति प्रकाशयतीति विश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐभद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ ॐकरणेभ्यः स्वाहा इदं करणेभ्यः ॥ ३७ ॥

रूपस्तम्। सर्वरूपप्रकाशकमित्यर्थः। सर्वाणि रूपाणि यस्मादिति वा किञ्च हरसा आयुर्हरणरूपेण कर्मणा यजमानं परिवृङ्ग्धि परिवर्जय। वृजी वर्जने रुधादिलोट् मा अभिंसस्था यजमानं मा हिंसीः। मन्यतेर्लुङ्। अभिपूर्वोऽन्यर्तिर्हिंसार्थः। किञ्च। चीयमानः आयुषामुपचीयमानः सन्। यजमानं शतायुषं शताब्दजीविनं कृणुहि कुरु॥ वारयन्ति वृयन्ते वा वाराः वृञ् वरणे पचाद्यच् घञ् वा। वारः सूर्यादिदिवसे वारोऽवसरवृन्दयोः। कुब्जवृक्षे हरे वारो वारं मद्यस्य भाजने इति विश्वः। वारेभ्यः स्वाहा सुहुतमस्तु ॥ ३६ ॥

टी० भद्रं कर्णेभिरिति। हेयजत्रा यजन्तं त्रायन्ते रक्षन्तीति यजत्रा यजमानपालका देवाः हेकरणदेवाः कर्णेभिः कर्णैः बहुलं छन्दसीति एस् अभावः युष्मत्प्रसात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐवायो ये ते सहस्रिणोरथासस्तेभिरागहि ।
नियुत्वान्सोमपीतये ॥ॐवातेभ्यः स्वाहा इदं
वातेभ्यः ॥ ३८ ॥

भद्रं कल्याणमनुकूलं वयं श्रृणुयाम । तथा अक्षभिर्नेत्रैर्भद्रं वयं पश्येम । बहुलं छन्दसीति हलादौ अक्षिशब्दस्यानङादेशः । किञ्च देवहितं देवैर्हितं स्थापितं देवानांहितं देवोपासनयोग्यं वा यदायुः जीवनं तद्वयं व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम । कीदृशा वयम् । स्थिरैर्दृढैरङ्गैरवयवैः करचरणादिभिः तनूभिः शरीरैश्चपुत्रादिभिर्वा युताः तुष्टुवांसः भवतः स्तुवन्तः सन्तः ॥ क्रियन्ते शुभाशुभकर्माणि एभिरिति करणानि तेभ्यः करणेभ्यः स्वाहा सुहुतमस्तु करणाधिकरणयोरिति ल्युट् ॥ ३७ ॥

टी० वायो ये ते इति व्याख्याता । वान्ति गच्छन्तीतिवाता वायवः तेभ्योवातेभ्यः स्वाहा सुहुतमस्तु वा गतिगन्धनयोः हसिमृग्रिणीति तन् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ वाताय स्वाहा धूमाय स्वाहाऽभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा पुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा॥ ॐ मेघेभ्यः स्वाहा इदं मेघेभ्यः ॥३६॥

टी० वाताय स्वाहेति । वाताय वाताधीनाय धूमाय धूमरूपाय धू विधूने मरु अभ्राय जलं बिभ्रते मूलविभुजादित्वात्कः । मेघाय जलसेचनकर्त्रे मिह सेचने अच्। विद्योतमानाय विद्युत। विशेषेण द्योतमानाय प्रकाशमानाय द्युत दीप्तौ शानच् स्तनयते शब्दं कुर्वते स्तनशब्दे स्तनयतेः शतृ । अवस्फूर्जते वज्रनिर्घोषं कुर्वते टुओस्फूर्जा वज्रनिर्घोषे शतृ वर्षते जलवर्षणं कुर्वते वृषु सेचने शतृ अववर्षते जलनिरोधं कुर्वते नम्रीभूय जलवर्षणं कुर्वते वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उग्रं वर्षते उत्कृष्टं जलवर्षणं कुर्वते शीघ्रं वर्षते शीघ्रं जलवर्षणं कुर्वते उदगृह्णते पुनःपुनर्वर्षणं कुर्वते अथवा जलमूर्ध्वं गृह्णते उद्गृहीताय वायुनोर्द्ध्वं गृहीताय पृणते जलपूरणं कुर्वते पृष स्नेहनसेवनपूरणेषु क्र्यादिः शतृ शीकायते शीकृ सेचने भ्वादि । शीकयतः शतृ । संहितायां दीर्घः। पुष्वाभ्यः जलकणिकारूपाभ्यः पुष स्नेहनसेवनपूरणेषु अशूपुषिलटिकणिखटिविशिभ्यः क्वन इति क्वन्प्रत्ययः । ह्रादुनीभ्यः ह्रादन्ते अव्यक्तं शब्दं कुर्वन्तीति ह्रादुन्यः ह्राद अव्यक्ते शब्दे आवश्यके णिनिः । पृषोदरादिः नीहाराय नितरां ह्रियते वायुनेति नीहारस्तस्मै हृञ् हरणे घञ् उपसर्गस्य घञीति दीर्घः । अवश्यायरूपाय एतेभ्यः सप्तदशनामभ्योमेघेभ्यः स्वाहा सुहुतमस्तु ॥ मेहन्ति जलसेचनं कुर्वन्तीति मेघास्तेभ्यः स्वाहा सुहुतमस्तु ॥ मिह सेचने अच् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐसमुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवꣳसवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभोगच्छ वाहाग्निं वैश्वानरं गच्छ स्वाहा मनोमे हार्दि यच्छ दिवन्ते धूमोगच्छतु स्वर्ज्योतिः पृथिवीं भस्मना पृण स्वाहा ॥ ॐसमुद्रेभ्यः स्वाहाइदं समुद्रेभ्यः ॥ ४० ॥

टी० समुद्रं गच्छ स्वाहेति । हेहविः त्वं समुद्रादिनामकान् देवान् गच्छ प्राप्नुहि तृप्तिकरणायेति शेषः स्वाहा सुहुतमस्तु । हेसमुद्रादिदेवतासमूह हार्दि न्हिदयसंवन्धि मे मनोयच्छ निवध्नीहि निवद्धं मनोहि स्वादायतनान्नच्यवते । हेहविः ते तव धूमः दिवं द्युलोकं गच्छतु वृष्ट्यै तव ज्योतिर्जाला स्वः आदित्यं गच्छतु स्वःशब्देनादित्योऽभिधीयतेऽन्तरिक्षं वा भस्मना पृथिवीमापृण समन्तात्पूरय ;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनदीभ्यः पौञ्जिष्टमृक्षिकाभ्योनैषाद पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्योव्रात्यं प्रयुग्भ्य उन्मत्तं सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यताया अकितवं पिशाचेभ्योविदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ॐपञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॐनदीभ्यः स्वाहा इदं नदीभ्यः ॥ ४१ ॥

स्वाहा सुहुतमस्तु समुद्रेभ्यः सम्यक् उन्दन्ति क्लेदनं कुर्वन्तीति समुद्राः उन्दी क्लेदने स्फायीति रक्प्रत्ययः । समीचीना उद्रा जलचरविशेषा यस्मिन्निति वा समुद्राः । सह मुद्रया मर्यादया वर्त्तन्तेऽइति वा समुद्रास्तेभ्यः स्वाहा सुहुतमस्तु ॥ ४० ॥

टी० ॐनदीभ्य इति । पौञ्जिष्टं पुञ्जिष्टोऽन्त्यजः पुल्कसस्तदपत्यम् ऋक्षीकाभ्योनैषादं निषादपुत्रम् । पुरुषव्याघ्राय दुर्मदमुन्मत्तम् । गन्धर्वाप्सरोभ्योव्रात्यं सावित्रीपतितम् प्रयुग्भ्यः उन्मत्तम् । सर्पदेवजनेभ्यः अप्रतिपदम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐइँष्टोयज्ञोभृगुभिराशीर्दा वसुभिः । तस्य न इष्टस्य प्रीतस्यद्रविणेहागमेः ॥ ॐइष्टदेवाय स्वाहा इदं इष्टदेवाय ॥ ४२ ॥

प्रतिपद्यते जानातीति प्रतिपत् अतथाविधं विकलमित्यर्थः। अयेभ्यः कितवं द्यूतकारम् ईर्यताये अकितवमद्यूतकृतम् । पिशाचेभ्यः विदलीकारीं । यातुधानेभ्यः कण्ठकीकारीं कण्टकी कर्म तत्कारिणीम् । नियुक्ति ॥ नदीदेवत्यानुष्टुप् याः दृषद्वती शतद्रूश्चन्द्रभागा विपाशेरावतीत्यादिकाः पञ्च नद्यः सरस्वतीमपियन्ति गच्छन्ति किंभूताः सस्रोतसः समानं स्रोतः प्रवाहोयासान्ताः । तुरवधारणे सा उ सैव सरस्वत्येव पञ्चधादेशो सरिन्नदी अभवत पञ्चापि स्वनामानित्यक्त्वा सरस्वत्येवाभवत् नदन्ति अव्यक्तं शब्दं कुर्वन्तीति नद्यः ताभ्योनदीभ्यः स्वाहा सुहुतमस्तु । णद अव्यक्ते शब्दे पचादिषु नदड्इति टित्वनिपातनात् टिड्ढेति ङीप् ॥ ४१ ॥

टी० इष्टोयज्ञ इति हेद्रविण द्रवति देवान्प्रतिगच्छतीति द्रविण हविःतत्संबुद्धौ हेद्रविण हेहविः अथवा हेद्रव्यविशेष द्रुगतौ द्रुदक्षिभ्यामिनन् । नोस्माकं तस्य इष्टस्य इष्टदेवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रीतये इह सदने त्वमागमेः आगच्छ आङ्पूर्वाद्गमेश्छत्वाभावे लिङि मध्यमैकवचने रूपम् । कीदृशस्य इष्टस्य प्रीतस्य अस्मासु स्निग्धस्य तस्य कस्य यस्य इष्टदेवस्य यज्ञः भृगुभिर्भृगुगोत्रैर्ब्राह्मणैः वसुभिर्वस्वादिदेवैश्च इष्टः संपादितः कीदृशोयज्ञः । आशीर्दा आशिषोऽभिलषितपदार्थान् ददातीत्याशीर्दाः क्विप् । विप्रैर्देवैर्यस्य यज्ञकृतस्तस्य गृहे त्वं गमेः सर्वदा तिष्ठेत्यर्थः ॥ मन्त्रोपासकैः इष्यते इति इष्टः सचासौ देवः यद्वा इष्टे यज्ञे दीव्यति प्रकाशते इति इष्टदेवः यद्वा मन्त्रोपासकेभ्यः इष्टरूपेण वाञ्छितरूपेण दीव्यतीति इष्टदेवः तस्मै इष्टदेवाय स्वाहा सुहुतमस्तु इषु इच्छायां क्तः । इष्टमाशंशितेऽपि स्यात्पूजिते प्रेयसि त्रिषु । सप्ततन्तौ पुमान्क्लीवे संस्कारे क्रतुकर्मणि । इति विश्वः । अथवा यज देवपूजासंगतिकरणदानेषु । नपुंसके भावे क्तः । इष्टं योगे च दाने च वाञ्छितेऽपि प्रयुज्यते । इत्यजयः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ कुलायिनीघृतबतीपुरन्धिः स्योने सीदसदने पृथीव्याः । अभि त्वा रूद्रा बसबोगृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा ॥ ॐ कुलदेबाय स्वाहा इदं कुलदेबाय ॥ ४३ ॥

टी० कुलायिनीति योदेवः स देवता इति निरुक्ते यास्कवचनम् हेकुलदेवते पृथिव्या भूम्याः स्योने सुखरूपे सदने उत्तममन्दिररूपस्थाने सीद यजमानेष्टसिद्धर्थं तिष्ठ । त्वं कुलायिनी कुलं प्रति एति गच्छतीत्येवं शीला कुलायिनी भवसि इण गतौ इति धातोः सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिप्रत्ययः तथा घृतवती होष्यमाणाज्ययुता पुरन्धिः पुरं बहुरूपं देहं बहुवरदानं वा धारयतीति पुरुधा धीयते स्थाप्यते जनैरिति वा पुरन्धिः पृषोदरादिः । पुरं शरीरमित्याहुर्गृहोपरिगृहे पुरम् पुरोगुग्गुलुराख्यातोनगरेऽपि पुरंपुरीइतिधरणिः किञ्च रुद्रा वसवश्चोपलक्षणत्वात् सर्वे देवाः त्वा त्वां अभिगृणन्तु स्तुवन्तु किञ्च सौभाग्याय ऐश्वर्याय इमा इमानि ब्रह्म ब्रह्माणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदशाखादिमन्त्रान् पीपिहि आप्यायस्व मन्त्रान्प्राप्नुहि अस्मन्मन्त्रोपहिता सौभाग्याय भवेति भावः । इमेति सुपः आकारः ब्रह्मति सुपोलोपः पि गतौ तुदादिः बहुलं छन्दसीति शपः श्लुः श्लौ इति द्वित्वम् तुजादीनां दीर्घोऽभ्यासस्येति अभ्यासदीर्घः इतः परं यजुः किञ्च अश्विनाश्विनौ देवानामध्वर्यू इह स्योने हेकुलदेवते त्वा त्वां सादयतामुपधत्ताम् । केचिदिदं यजुश्चतुर्थपादेन परिकल्प्य त्रिष्टुभं वदन्ति ॥ यद्वा हेकुलदेवते पृथिव्याः शरीरस्य स्योने सुखरूपे सदने हृदयकमलस्थाने सीद तिष्ठ त्वं कुलायिनी कुलं देहं प्रतिगच्छति तच्छीला कुलायिनी भवसि । कुलं देहेऽन्वये गणे इति कोषः । तथा घृतवती घरणवती यजमानेषु फलवर्षणवती घृक्षरणदीप्त्योः अन्यत्समानम् । यद्वा हेकुलदेवते पृथिव्या बिस्तीर्णस्य गृहस्य स्योने सुखरूपे सदने स्थाने सीद तिष्ठ त्वं कुलायिनी कुलं भवनं एति गच्छति तच्छीला कुलायिनी भवसि कुलं जनपदे गोत्रे सजातीयगणेऽपि च ॥ भवने च तनौ क्लीबं कण्टकार्योषधौ कुली इतिः तथा घृतवती धनवर्षणवतीः पुरन्धिः पुरं बहुगृहं दधातीति पुरन्धिः पुरं नपुंसकं गेहे इति कोषः । अन्यत्समानम् ॥ द्वितीयार्थमाह ॥यत्र देवतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तौति । गोपथब्राह्मणे क्षत्रं देवोदेवतेति वचनात् । हेक्षत्र-
देवते । पृथिव्या विस्तीर्णायाः संग्रामभूम्याः संबन्धिनि
स्योने स्वर्गफलप्रदत्वात् सुखरूपे सदने संग्रामशिरःस्थाने
सीद सर्वशत्रुघातार्थं निर्भयपूर्वकं तिष्ठ त्वं कुलायिनी कुलं
सर्वसैन्यघणं अथवा कुलं शक्तिः प्रकीर्त्तितमिति वचनात्
सर्वशक्ति एति प्राप्नोति तच्छीला कुलायिनी भवासि घृत-
वती शत्रुषु दीप्तवती वाणाद्यायुधवर्षणवती वा पुरन्धिः
परपुरं स्वीकृतेन धारयतीति पुरन्धिः संग्रामवर्णनं यथा
व्यासउवाच संग्रामस्येह माहात्म्यं त्वयोक्तं मुनिसत्तम
एतदेच्छाम्यहं श्रोतुं ब्रूहि मे वदतां वर ॥ सनत्कुमारउवाच
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ॥ न तत्फलमवा-
प्नोति संग्रामे यदवाप्नुयात् ॥ इति यज्ञविदः प्राहुर्यज्ञकर्म-
विदः सदाः ॥ तस्मात्तत्ते प्रवक्ष्यामि यत्फलं शस्त्रजीविनाम्
धर्मलाभोऽर्थलाभश्च मोक्षलाभस्तथैव च ॥ यः शूरो वध्यते
युद्धे विमर्दपरवाहिनीम् ॥ तस्यधर्मार्थकामस्य यज्ञश्चैवाल्प-
दक्षिणः ॥ परं ह्यभिमुखं हत्वा तद्यानं योऽधिरोहति ॥
विष्णुलोके स जायेत यश्च युद्धे पराजितः ॥ अश्वमेधान-
वाप्नोति यश्च तु न मृतः स चेत् ॥ यस्तु शस्त्रमनुप्राप्य
वीर्यवान्वाहिनीमुखे ॥ संमुखोवर्त्तते शूरः सस्वर्गान्न निव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तेते ॥ राजा वा राजपुत्रो वा सेनापतिरथापि वा ॥ हतः शात्रेण यः शूरस्तस्य लोकोऽक्षयोध्रुवम् इति । किञ्च । सर्वे देवाः त्वा त्वां संग्रामे शूर इति अभिगृणन्तु स्तुवन्तु सौभाग्याय ऐश्वर्याय इमा इमानि ब्रह्म ब्रह्माणि संग्रामव्यापकानि ब्रह्मास्त्रादीनि आयुधानि पीपिहि प्राप्नुहि अश्विना अश्विनौदेवानामध्वर्यू । इह संग्रामयज्ञस्थाने त्वा त्वां सादयतां विजयार्थं उपधत्ताम् ॥ तृतीयार्थमाह ॥ हेराजदेवते पृथिव्या विस्तीर्णायाः सर्वभूम्याः संबन्धिनि स्योने सर्वशत्रुरहितत्वेन सुखरूपे सदने श्रेष्ठसभास्थाने सीद आनंदपूर्वकं तिष्ठ त्वं कुलायिनी । कुले सर्वसैन्यगणं सर्वशत्रुघातशक्तिं सर्वशस्त्रास्त्रज्ञानशक्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि घृतवती बलेन दीप्तवती दानधर्मादिषु धनवर्षणवती वा । पुरन्धिः पुरं बहुसुन्दररूपं धारयतीति पुरन्धिः । किञ्च सर्वे देवाः अयं राजा परमधर्मात्मा इति त्वा त्वां अभिगृणन्तु स्तुवन्तु किञ्च सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि वेदादिसर्वशास्त्राणि पीपिहि ये गत्यर्थाः धातवस्ते ज्ञानार्थत्वात् जानीहि । ब्रह्म तत्वं तपोवेदोब्रह्मा विप्रः प्रजापतिरिति कोषान्तरमिति॥ अश्विना अश्विनौ देवानामध्वर्यू । इहोत्तमस्थाने हेराजदेवते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वा त्वां सादयतामुपधत्ताम् राजदेवतावर्णनं यथा शान्तिपर्वणि। इन्द्रोराजा यमोराजा धर्मोराजा तथैव च ॥ राजा बिभर्ति रूपाणि राज्ञा सर्वमिदं धृतम् । यथैवेन्द्रस्तथा राजा संपूज्योभूतिमिच्छता ॥ वाल्मीकीये पञ्चरूपाणि राजानोधारयन्त्यमितौजसः ॥अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ॥ मानवधर्मशास्त्रे बालोऽपि नावमन्तव्योमनुष्य इति भूमिपः ॥ महती देवता ह्येषा राजरूपेण तिष्ठति ॥ चतुर्थार्थमाह । हेयमदेवते पृथिव्या विस्तीर्णायाः यमपूर्याः स्थाने धार्मिकानां सुखरूपे सदने दशयोजनपरिमितासनस्थाने सीद पापिजनशासनार्थं तिष्ठ त्वं कुलायिनी कुलं पापिनां शासनशक्ति एति प्राप्नोति तच्छीला कुलायिनी अथवा कुत्सितोलायो गतिर्येषु ते कुलाया नरकाः पापिनां शासनार्थं ते सन्ति यस्या यमदेवतायाः सा कुलायिनी भवसि । तथा घृतवती पापिषु क्रोधेन दीप्तवती । पुरन्धिः पुरं पापिषु बहुभयङ्कररूपं धारयतीति पुरन्धिः किञ्च सर्वे देवाः त्वां स्तुवन्तु । धार्मिकाणां सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि तपांसि पीपिहि जानीहि । अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेयमदेवते त्वां सादयतामुपधत्ताम् ॥ पञ्चमार्थमाह । हेसूर्यदेवते । पृथिव्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽन्तरीक्षस्य पृथिवीशब्दोऽन्तरिक्षनामसु पाठात् । मध्य-स्थिते स्योने सुखरूपे किरणरूपे वा स्योनः किरणसूर्ययो-रिति कोषान्तरम् । सदने ज्योतिश्चक्रस्थाने सीद भ्रमणेन रात्रिदिनविभागार्थं शुभाशुभकर्मविचारणार्थं च तिष्ठ त्वं कुलायिनी कुलं भासि भासि नामादिगणं तेजोरूपेण तापशक्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि तथा घृतवती जलक्षरणवती दीप्तवती वा पुरन्धिः पुरं बहु-नामरूपं धारयतीति पुरन्धिः तथा सर्वे देवाः त्वा त्वां अभिगृणन्तु । सौभाग्याय यजमानानां ऐश्वर्याय इमा इमानि ब्रह्म ब्रह्माणि वेदान् पीपिहि आप्यायस्व अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेसूर्यदेवते त्वां सादयताम् ॥ षष्ठार्थमाह । हेअग्निदेवते पृथिव्याः यज्ञभूमेः स्योने सुखरूपे सदने वेदिकास्थाने सीद देवेभ्योहविःप्रदानार्थं तिष्ठ । त्वं कुलायिनी देवेभ्योहविःप्रदानशक्तिं दाहिकाश-क्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि घृतव-ती होष्यमाणाज्यवती दीप्तवती वा पुरन्धिः । पुरं बहु-नामरूपं धारयतीति पुरन्धिः । किञ्च सर्वे देवाः त्वामभि-गृणन्तु यजमानानां सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि वैदिकमन्त्रान् पीपिहि जानीहि । अश्विनौ देवानामध्वर्यू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इह यज्ञस्थाने हेअग्निदेवते त्वां सादयताम् ॥ सप्तमार्थं माह ॥ हेवायुदेवते पृथिव्याः अन्तरिक्षस्य संबन्धिनि स्योने सर्वप्राणिनां सुखरूपे सदने हृदयस्थाने हृदयाकाश-स्थाने इत्यर्थः । सीद श्वासप्रश्वासरूपेण तिष्ठ ! बाह्यस्य वायोरायमनं श्वासः कोष्ठ्यस्य वायोर्निःसारणं प्रश्वासः त्वं कुलायिनी कुलं जीवितार्थी देहं प्रति एति गच्छति तच्छीला कुलायिनी भवसि घृतवती घृसेचने भ्वादिः सेचनवति पुरन्धिः पुरं सूक्ष्मदेहं धारयतीति पुरन्धिः किञ्च सर्वे देवाः त्वामभिगृणन्तु सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि वेदशास्त्राणि पीपिहि आप्यायस्व अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने त्वां सादयताम् ॥ अष्टमार्थ-माह ॥ हेपतिदेवते पृथिव्याः विस्तीर्णायाः शय्यायाः उपरि स्योने विलासनादिना सुखरूपे सदने शयनस्थाने सीद ऋतुदानार्थी तिष्ठ । त्वं कुलायिनी कुलं श्रेष्ठकुलं रतिशक्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि घृतवता वीर्यक्षरणवता पुरन्धिः पुरं सुन्दररूपं देहं धारय-तीति पुरन्धिः किञ्च सर्वे देवाः त्वां अभिगृणन्तु सौभा-ग्याय सुभगत्वाय इमा इमानि ब्रह्म ब्रह्माणि वेदशास्त्राणि पीपिहि जानीहि वेदशास्त्रज्ञानेनास्मत्सौभाग्याय भवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषः । अश्विनौ देवानामध्वर्यू । इह शयनस्थाने हेपतिदेवते त्वां सादयताम् ॥ पतिव्रतावर्णनम् अनुशासनपर्वणि पतिर्हिदेवोनारीणां पतिर्बन्धुः पतिर्गतिः ॥ पत्या गतिसमा नास्ति दैवतं वा यथा पतिः ॥ वाल्मीकीये ॥ भर्ता तु खलु नारीनां गुणवान्निर्गुणोऽपि वा ॥ धर्मं विमृश्यमानानां प्रत्यक्षं देवदैवतम् ॥ तत्रैव अनुसूयावाक्यम् ॥ स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ मार्कण्डेयपुराणे । पतिप्रसादादिह च प्रेत्य चैव यशस्विनी ॥ नारी सुखमवाप्नोति नार्या भर्ता हि देवता ॥ व्याससंहितायाम् । महापातकदुष्टा च पतिगर्भविनाशिनी ॥ पराशरसंहितायाम् । ऋतुस्नाता तु या नारी भर्त्तारं नोपसर्पति ॥ सा मृता नरकं याति विधवा च पुनःपुनः ॥ इति ॥ नवमार्थमाह॥ हेसुन्दरि पृथिव्याः विस्तीर्णायाः शय्यायाः स्योने सुखरूपे सदने शयनस्थाने सीद संभोगार्थं तिष्ठ त्वं कुलायिनी कुलं श्रेष्ठकुलं पुत्रोत्पादनार्थं गर्भधारणशक्ति वा एति प्राप्नोति तच्छीला कुलायिनी भवसि । घृतवती दीप्तवती पुरन्धिः पुरं सर्वगुणसंपन्नं देहं धारयतीति पुरन्धिः । किञ्च सर्वे देवा त्वामभिगृणन्तु । किञ्च सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि पातिव्रत्यधर्माणि पीपिहि प्राप्नुहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शतिव्रत्यधर्मेण सौभाग्याय भवेति भावः । अश्विनौ देवानामध्वर्यू । इह शयनस्थाने हेसुन्दरि त्वां सादयताम् । व्यासस्संहितायाम् । ऋतुकालेऽभिगम्यैवं ब्रह्मचर्ये व्यवस्थितः । गच्छन्नपि यथाकामं न दुष्टः स्यादनन्यकृत् ॥ भ्रूणहत्यामवाप्नोति ऋतौ भार्यापराङ्मुखः ॥ मानवे । ऋतुकालेऽभिगामी स्यात्स्वदारनिरतः सदा ॥ पर्ववर्जं व्रजेच्चैनां तद्व्रतोरतिकाम्यया ॥ स्त्रियान्तुरोचमानायां सर्वं तद्रोचते कुलम् ॥ तस्यां त्वरोचमानायां सर्वमेव न रोचते ॥ इति ॥ दशमार्थमाह ॥ हेगुरुदेवते पृथिव्या विस्तीर्णायाःपाठशालायाःस्योने सुखरूपे सदने उत्तमासनस्थाने सीद अध्यापनार्थं तिष्ट त्वं कुलायिनी कुलं शिष्यगणं सर्वशास्त्रार्थशक्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि । तथा घृतवती अर्थचरणवती । शास्त्रार्थज्ञानेन दीप्तवती वा । पुरन्धिः पुरं सर्वगुणसंपन्नं देहं धारयतीति पुरन्धिः। किञ्च । सर्वे देवाः त्वामभिगृणन्तु । किञ्च सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि वेदशास्त्राणि पीपिहि जानीहि । अश्विनौ देवानामध्वर्यू । इह पाटशालास्थाने हेगुरुदेवते त्वां सादयताम् ॥ एकादशार्थमाह ॥ हेसरस्वति पृथिव्या विस्तीर्णस्य ग्रन्थराशेः संवन्धिनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्योने सुखरूपे सदने शब्दग्रामस्थाने सीद सुशब्दार्थरूपेण तिष्ठ। यद्वा पृथिव्याः देहस्य स्योने सुखरूपे सदने कण्ठ-स्थाने सीद उच्चारणार्थं तिष्ठ। त्वं कुलायिनी कुलं गुरु-कुलं विद्वद्गणं शास्त्रगणं वचनशक्तिं वा एति प्राप्नोति तच्छीला कुलायिनी भवसि। घृतवती अर्थक्षरणवती दीप्तवतीवा। पुरन्धिः पुरं स्वच्छरूपदेहं धारयतीति पुरन्धिः किञ्च सर्वे देवाः त्वामभिगृणन्तु सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि ब्रह्मज्ञानप्रतिपादक रूपाणि शास्त्राणि पाहि आप्यायस्व। अश्विनौ देवानामध्वर्यू इह कण्ठस्थाने यज्ञस्थाने वा हेसरस्वति त्वां सादयताम् ॥ द्वादशार्थमाह॥ हेमहासरस्वत्यादिरूपे चित्सदानन्दमयि चण्डिके पृथिव्याः ग्रन्थसंक्षेपभूतायाअपि अर्थविस्तीर्णायाः शप्तसत्याः स्योने साधकानां सुखरूपे सदने मन्त्रार्थरुपस्थाने सीद अभीष्ट-दानार्थं तिष्ठ। त्वं कुलायिनी कुलं असुरकुलं हन्तुं एति गच्छति तच्छीला कुलायिनी अथवा कुलं सर्वदेवशक्तिं एति प्राप्नोति तच्छीला कुलायिनी भवसि। तथा घृतवती साधकानां फलवर्षणवती दीप्तवती वा। पुरन्धिः पुरं बहु-रूपदेहं धारयतीति पुरन्धिः। किञ्च। सर्वे देवाः त्वाम-भिगृणन्तु। सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि सप्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शतीमन्त्रान् पीपिहि आप्यायस्व । अश्विनौ देवानामध्वर्यू इह सप्तशतीस्थाने यज्ञस्थाने वा हेचण्डिके त्वां सादयताम् ।। त्रयोदशार्थमाह हेभुवनेश्वरि पृथिव्या मणिद्वीपभूम्याः स्योने सुखरूपे सदने चिन्तामणिमयगृहस्थाने सीद शक्तिशक्तिमदभेदे सच्चिदानन्दरूपेण च तिष्ठ त्वं कुलायिनी कुलं सर्वशक्ति एति आप्नोति तच्छीला कुलायिनी भवसि । तथा घृतवती भक्तेषु फलवर्षणवती दीप्तवती वा पुरन्धिः पुरं वहुसुन्दरूपं धारयतीति पुरन्धिः । किञ्च । सर्वे देवाः त्वामभिगृणन्तु सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि ब्रह्मज्ञानानि पीपिहि आप्यायस्व । अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेभुवनेश्वरि त्वां सादयताम्।। चतुर्दशार्थमाह ।। हेपरमेश्वरदेवते पृथिव्याः अन्तरिक्षस्य मध्यस्थिते स्योने सूर्ये सूर्यमण्डले स्योनः किरणसूर्ययोरिति मेदिनीकोषः। सदने स्थाने सूर्यमण्डलस्थाने इत्यर्थः सीद अन्तर्यामिरूपेण तिष्ठ भक्तैरूपासनार्थमिति भाव अथवा पृथिव्याः शरीरस्य स्योने सुखरूपे सदने । हृदय कमलस्थाने सीद भक्तवात्सल्यतया तिष्ठ यद्वा पृथिव्याः पृथिव्युपलक्षणस्य ब्रह्माण्डस्य उपरिस्थिते स्योने सुखरूपे सदने वैकुण्ठस्थाने सीद व्यत्ययेन तिष्ठसीत्यर्थः त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुलायिनी कुलं दैत्यवधार्थं धर्मसंस्थापनार्थं च अवतारग-णं एति प्राप्नोति तच्छीला कुलायिनी भवसि । तथा । स्वेनरूपेण घृतवती भक्तेषु फलचरणवती । पुरन्धिः पुरं मत्स्यादिरूपं देहं धारयतीति पुरन्धिः । किञ्च सर्वे देवाः त्वामभिगृणन्तु किञ्च सौभाग्याय इमा इमानि ब्रह्म ब्रह्माणि ब्रह्मज्ञानरूपाणि पीपिहि आप्यायस्व । अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेपरमेश्वरदेवते त्वां सादय-ताम् ॥ पंचदशार्थमाह ॥ हेकृष्णादेवते पृथिव्याः भूम्याः स्योने सुखरूपे सदने द्वारकास्थाने सीद दुष्टशिक्षार्थं तिष्ठ त्वं कुलायिनी नामैकदेशेननामग्रहणमितिन्यायात् । कुलं गोकुलं प्रति वाललीलार्थं एति गच्छतीत्येवं शीला कुला-यिनी । अथवा कुलं दुष्टानां कुलं हन्तुं एति गच्छतीत्येवं शीला कुलायिनी यद्वा कुलं सर्वशक्तिं एति प्राप्नोति कूलायिनी भवसि । तथा । घृतवती सत्सु फलचरणवती असत्सु क्रोधेन दीप्तवती । पुरन्धिः पुरं बहुभार्याभोग धारणदेहं सुन्दरदेहंवा धारयतीति पुरन्धिः । किञ्च सर्वे देवाः त्वामभिगृणन्तु किञ्च सौभाग्याय । इमा इमानि ब्रह्म ब्रह्माणि ब्रह्मज्ञानानि पीपिहि आप्यायस्व । अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेकृष्णादेवते त्वां सादयताम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षोडशार्थमाह॥हेपरब्रह्मदेवते । पृथिव्याः पृथिव्युपलक्षणस्य अनेककोटिब्रह्माण्डदेहस्य स्योने सुखरूपे सदने स्वमहिम्नि- स्थाने सीद सर्वव्यापकरूपेण तिष्ठ अथवा पृथिव्याः वि- स्तीर्णस्य समष्टिव्यष्टिरूपस्थूलसूक्ष्मकारणोपाधिदेहत्रयस्य विश्वतैजसप्राज्ञविराट्सूत्रेश्वरचैतन्योपहितस्य स्योने सुख- रूपे सदने स्वे तुरीयाख्ये प्रत्यक्चैतन्यरूपस्थाने सीद स- च्चिदानन्दरूपेण तिष्ठ त्वं कुलायिनी कुलं अनेककोटिब्र ह्माण्डगणं एति करामलकफलवत् प्राप्नोतीत्येवं शीला कुलायिनी भवसि तथा घृतवती कदाचित् सृष्टिकाले अनेककोटिब्रह्माण्डक्षरणवती अनेककोटिसूर्यवद्दीप्तवतीवा पुरन्धिः प्रलयकाले पुरं बहुब्रह्माण्डरूपं स्वोदरे परमाणुवत् धारयतीति पुरन्धिः । किञ्च रुद्रा रुणद्धि एनमिति रुा रोदित्यनेन वा रौत्यनेन रुा रुत् अज्ञानं विपर्ययोवा शोकोवा दुखं वा रुत् तां द्रावयन्तीति रुद्राः अज्ञानादिनाशकाः वसवः योगिनां हृदयेषु वसन्तीति वसवः शमदमादयः उपलक्षणत्वात् यमनियमादयोऽपि तथा श्रवणमननदिनिध्यासनान्यपि त्वा त्वां अभिगृणन्तु स्तुवन्तु किञ्च सौभाग्याय ईश्वराराधनरूपाय इमा इमानि ब्रह्म ब्रह्माणि ब्रह्मज्ञान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपाणि पीपिहि आप्यायस्व। अश्विनौ देवानामध्वर्यू इह यज्ञस्थाने हेमब्रह्मवेदते त्वां सादयतामुपधत्ताम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ॐभैरवाय स्वाहा इदं भैरवाय ॥ ४४ ॥

ॐदेवीर्द्वार इन्द्रꣳसंघाते वीड्वीर्यामन्नवर्धयन् । आ वत्सेन तरुणेन कुमारेण च मीवता पार्वाणꣳरेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज॥ॐभैरव्यै स्वाहा इदंभैरव्यै ४५

ॐअम्बेअम्बिकेऽम्बालिके न मानयति कश्चन समस्त्यश्वकः सुभद्रिकां कांपिलवासिनीम् ॥ ॐविन्ध्यवासिन्यै स्वाहा इदं विन्ध्यवासिन्यै ॥ ४६ ॥

टी० नमः शंबायेति व्याख्याता ॥ ४४ ॥
टी० देवीर्द्वार इति व्याख्याता ॥ ४५ ॥
टी० अम्बेअम्बिक इति व्याख्याता ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐएषोहदेवः प्रदिशोऽनु सर्वाः पूर्वोह जातः स उ गर्भे अन्तः॥स एवजातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ॥ ॐसर्वेभ्योदेवेभ्यः स्वाहा इदं सर्वेभ्योदेवेभ्यः ॥४७॥ ॐशुक्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च। शुक्रश्च ऋतपाश्चात्यꣳहाः॥ ॐसर्वहोमपूरणार्थेभ्यः स्वाहा ॥ ४८ ॥ इदं सर्वहोमपूरणार्थेभ्यः

टीं॰ एषोह देव इति । हप्रसिद्धम् । एषोदेवः परमात्मा सर्वाः प्रदिशः अनुतिष्ठति व्याप्यस्थितः । हेजनाः ह प्रसिद्धम् । पूर्वः प्रथमोजातः उत्पन्नः । गर्भे अन्तः अन्तः गर्भमध्ये स उ स एव तिष्ठति । जातोऽपि स एव जनिष्यमाणः उत्पत्स्यमानोऽपि स एव प्रत्यङ् प्रतिपदार्थमञ्चतीति प्रत्यङ् । सर्वतोमुखः सर्वतोमुखाद्यवयवा यस्य स अचिन्त्यशक्तिरित्यर्थः ॥ ४७ ॥

टीं॰ शुक्रज्योतिरिति । शुक्रज्योतिरित्याद्याः सर्वहोमपूरणार्था मरुतोदेवा यूयमद्यास्मिन्नोऽस्माकं यज्ञे एतन एत आगच्छतः शुक्रं शुद्धं शुक्रस्येव वा ज्योतिस्तेजोयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ राजन्तमध्वराणांगोपामृतस्यदीदिवम् वर्धमानꣳस्वेदमे ॥ ॐ पञ्चपाण्डवेभ्यः स्वाहा इदं पञ्चपाण्डवेभ्यः ॥४९

सशुक्रज्योतिः । चित्रं दर्शनीयं ज्योतिर्यस्य स चित्रज्योतिः सत्यं ब्रह्मलक्षणं ज्योतिर्यस्य स सत्यज्योतिः । ज्योतिस्तेजो यस्यास्तीति ज्योतिष्मान् शोचते दीप्यते इति शुक्रः ॥ ऋतं सत्यं यज्ञं वा पाति ऋतपाः अंहः पापमतीत्य वर्तते इति अत्यंहाः । चकाराः समुच्चयार्थाः ॥ ४८ ॥

टी० राजन्तमिति । वयमीदृशं पाण्डवपञ्चकमुपैमः कीदृशम् । राजन्तं दीप्यमानम् । अध्वराणां गोपां गोपायतीति गोपास्तम् । यज्ञानां गोप्तारम् । ऋतस्य सत्यवचनलक्षणस्य व्रतस्य दीदिविं दीपयितारम् । अग्न्यादिसमीपे व्रतं गृहीत्वा सत्यं वदतीत्याशयः । अस्मदीये गृहे वर्धमानम् । राजसूयाश्वमेधादिभिरभिवृद्धिं गच्छन्तम् । दाम्यन्ति गृहस्था यत्रेति दमो गृहम् । दिवेः क्विप्रत्ययो बाहुलकात् । लिङ्भावात् द्वित्वम् । तुजादीनां दीर्घोऽभ्यासस्य इत्यभ्यासदीर्घः । देवयतीति दीदिविः ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐउँग्रश्च भीमश्च ध्वान्तश्च धुनिश्च सासह्वांश्चा-भियुग्वाच विक्षिपः स्वाहा ॥ ॐ भीमसेनाय स्वाहा इदं भीमसेनाय ॥ ५० ॥

टी॰ उग्रश्चेति । उग्रः उत्कृष्टः बिभेत्यस्मादसौ भीमः भीमादयोऽपादाने इति निपातः । ध्वान्तयति शत्रूनन्धी-करोतीति ध्वान्तशब्दात् तत्करोति इति णिजन्तात्पचाद्यच् धूनयति कम्पयति शत्रूनिति धुनिः सहते अभिभवति शत्रूनिति सासह्वान् । सहेः क्वसुः अभ्यासदीर्घः । अभि-युनक्ति अभियुग्वा । अन्येभ्योऽपि दृश्यते इति अभिपूर्वा-द्युजेः क्वनिप् भक्तानां सुखयोक्ता । विक्षिपति प्रेरयति शत्रूनिति विक्षिपः शत्रुक्षेप्ता इगुपधेति कप्रत्ययः । एवं भूताय भीमसेनाय स्वाहा सुतहुमस्तु ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्॥ ॐ पितृभ्यः स्वाहा इदं पितृभ्यः ॥५१॥

टी० पितृभ्यः स्वधायिभ्य इति । सप्तयजूंसि पितृदेवत्यानि पितृभ्यः स्वधासंज्ञकं नमोऽन्नमस्तु स्वधा वै पितॄणामन्नम् इति श्रुतेः यद्वा पितृभ्यः स्वधान्नमस्तु तेभ्यो नमोनमस्कारश्चास्तु । कीदृशेभ्यः । स्वधायिभ्यः स्वधामन्नं प्रतियन्ति गच्छन्त्येवं शीलाः स्वधायिनस्तेभ्यः । इण् गतौ इति धातोः सुप्यजातौणिनिस्ताच्छील्ये इति णिनिप्रत्ययः । पितृभ्य इति बहुवचनं पितृव्याद्यपेक्षम् पूजार्थं वा एवं पितामहेभ्यः प्रपितामहेभ्य इति मन्त्रौ व्याख्येयौ । पितरः अक्षन् हविर्भक्षितवन्तः । घस्लृ अदने लङि रूपम् पितरोऽमीमदन्त मद तृप्तौ हविषा तृप्ताः । अतीतृपन्त तर्पिता अस्माभिः पितरः । यद्वा अस्मानतीतृपन्त तर्पयन्ति तृप्ताः सन्तोऽभीष्टदानेन हेपितरः शुन्धध्वम् । शुद्धाः पाणिप्रक्षालनेन शुद्धा यूयं भवत ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे। उपयामगृहीतोऽसि वैश्वानराय त्वैषते योनिर्वैश्वानराय त्वा॥ ॐ वैश्वानराय स्वाहा इदं वैश्वानराय॥ ५२॥

टी० ऋतावानमिति वयं वैश्वानरं विश्वेभ्योनरेभ्यो हितम्। यद्वा विश्वे नरा अस्य नरे संज्ञायामिति विश्वशब्दस्य दीर्घः। विश्वानरस्यापत्यम्। ऋष्यण् वैश्वानरमग्निम् ईमहे याचाम। यज्ञसमाप्तिमिति शेषः। ईमहे। याञ्चाकर्मसु पठितः कीदृशं वैश्वानरम्। ऋतावानम्। ऋतं सत्यं यज्ञोजलं वास्यास्ति ऋतावा तम्। छन्दसीवनिपौ वक्तव्यौ इत्यस्त्यर्थे वनिप्प्रत्ययः। संहितायामृतस्य दीर्घः। ऋतस्य सत्यस्याविनाशिनो ज्योतिषः तेजसः पतिं पालकम्। तेजोऽधिष्ठानमित्यर्थः। अजस्रं न जस्यति ननश्यतीति अजस्रस्तमनुपक्षीणम्। जसु हिंसायाम्। नम्रिकम्पि इति रप्रत्ययः। घर्मं घृ क्षरणदीप्त्योः जिघर्तिक्षरति जलमिति घर्मस्तम्। दीप्तं वा। हेहविर्विशेष त्वं उपायामसंज्ञकेन पात्रेण गृहीतोऽसि वैश्वानरायार्थाय त्वां गृह्णा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। इतोजातोविश्वमिदं विचष्टे वैश्वानरोयतते सूर्येण। उपयामगृहीतोसि०॥ॐवैश्वानराय स्वाहा इदं वैश्वानराय ५३

मि। ध्रुवादौ स्थापयति एष ते योनिः स्थानम् वैश्वनराय त्वा त्वां जुहोमि। एतादृशाय स्वाहा सुहुतमस्तु ॥५२॥

टी० वैश्वानरस्येति। त्रिष्टुप् कुत्सदृष्टा। वैश्वानरस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम। कं निपातः पादपूरणः हि यस्माद्धेतोः। वैश्वानरः इतोऽरणितोजात उत्पन्नः सन्। इदं विश्वं सर्वं विचष्टे कर्मानुरूपं पश्यति सूर्येण सह यतते स्पर्धते च। सूर्यसमतेजाइत्यर्थः। कीदृशोऽग्निः राजा राजते दीप्यते इति राजा भुवनानां अभिश्रीः अभिश्रयणीयः अभि समन्तात् श्रीयते सेव्यतेऽभिश्रीः। कर्मणि क्विप्। उप० एषते० उक्ते ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐवैश्वानरोन ऊतय आ प्रयातु परावतः । अग्निरुक्थेन वाहसा ॥ उपयामगृहीतोऽसि० ॐवैश्वानराय स्वाहा इदं वैश्वानराय॥५४॥

टी० वैश्वानरन इति । गायत्री । नोऽस्माकमूतयेऽनाय रक्षणाय । परावतः दूरदेशात् वैश्वानरः आ प्रयातु-आगच्छतु । केन वाहसा वाहनभूतेन उक्थेन उच्यते इति उक्थं स्तोम ऋचपरिभाषणे पातृतुदीति थक् । तेन स्तोमेन । वाहिष्ठोवाहनानां स्तोमोदूताहुतं नरा इति श्रुत्यन्तरैस्तोमस्य वाहनत्वमुक्तम ॥ उप० एषते उक्ते ॥ वैश्वानराय स्वाहा इदं वैश्वानराय ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ आकाशे यानि तीर्थानि यानि तीर्थानि भूतले। पाताले यानि तीर्थानि सर्वतीर्थ नमोऽस्तुते स्वाहा ॥५५॥

टी० सर्वाणि तीर्थानि तीर्थवत्तारकमन्त्रावा यस्मिन्स सर्वतीर्थः परमात्मा यद्वा सर्वेषां प्राणिनां तीर्थं तारकं ब्रह्म सर्वतीर्थं तत्संबुद्धौ हेसर्वतीर्थ ते तुभ्यं नमोऽस्तु त्वत्प्रसा-दात् आकाशभूतलपातालेषु यानि तीर्थानि तारकामन्त्राः वा सन्ति तेभ्यः स्वाहा ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐआकाशे ये च देवाश्च ये देवाः सन्ति भूतले॥पाताले सति ये देवाः सर्वदेव नमोऽस्तुतेस्वाहा ॥ ५६ ॥

टी० आकाश इति सर्वदेव सर्वे देवा यस्मिन्स सर्वदेवः परमेश्वरः तत्संबुद्धौ हेसर्वदेव यद्वा सर्वेषां देवः सर्वदेवः यद्वा सर्वैः ऋषिच्छन्दोदेवताविनियोगादिभिर्दीव्यति प्रकाशते इति सर्वदेवः यद्वा सर्वैः सृष्ट्यादिभिर्दीव्यति क्रीडति सर्वानसुरादीन् विजिगीषते । सर्वेषु आत्मशक्त्या व्यवहरति । सर्वैःतेजोभिर्द्योतते सर्वदैत्यादिवधार्थं माद्यति सर्वेषु भक्तेषु मोदते सर्वेषु भूतेषु निद्राशक्तिरूपेण तिष्ठति सर्वं गच्छति वा सर्वदेवः परमेश्वरः । यद्वा सर्वाणि भूतानि दीव्यन्ति प्रकाशन्ते यस्मा त्ससर्वदेवः यद्वा सर्वेषु दीव्यते प्रकाशते इति सर्वदेवः यद्वा सर्वे विश्वतैजस प्राज्ञविराट्सूत्रात्मेश्वररूपा दीव्यन्ति प्रकाशन्ते यस्मात्स सर्वदेवः परमेश्वरः यद्वा सर्वदा ईव इति च्छेदः ई लक्ष्मीं वाति गच्छति भोगायेति ईवोविष्णुः वा गतिगन्धनयोः आतोऽनुपसर्गे कः हेईव हेविष्णो सर्वदा सर्वस्मिन्काले ते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुभ्यं नमोऽस्तु यद्वा सर्वदश्चासौ ईश्वश्च सर्वदेवः यद्वा सर्वा-
णि धनानि ददातीति सर्वदा साचासौ ई लक्ष्मीः सर्वदे
तां प्रति वाति गच्छतीति सर्वदेवः तस्य संबोधने हेसर्वदेवः
यद्वा सर्वदे अव इति छेदः सर्वं वाञ्छितफलं यजमानेभ्यो
ददातीति सर्वदाः परमेश्वरः डुदाञ् दाने क्विप् तस्मै सर्वदे
तुभ्यं परमेश्वराय नमः नामयति विश्वमिति नमोहवीरूप-
मन्नम् अस्तु । णम प्रव्हत्वे शब्दे असुन्प्रत्ययः । अन्तर्भा-
वितण्यर्थो ज्ञेयः । अव देवान् यजमानान्वा पालय ।
त्वदनुज्ञया आकाशे अन्तरिक्षे यद्वा आ समन्ताद्देवानां
काशः प्रकाशोयस्मिन्निति आकाशः स्वर्गलोकः यद्वा उद-
ये कस्य सूर्यस्य आशादिक् काशा प्राचीदिक् आ सम-
न्तात् काशा यस्मिन्निति आकाश इन्द्रलोकः यद्वा आ
समन्तात् कस्य अग्नेः आशा यस्मिन्निति आकाशोऽग्नि-
लोकः यद्वा आ समन्तात् कस्य यमस्य आशा यस्मिनि
आकाशोयमलोकः यद्वा न विद्यते कं सुखं यस्मादिति
अकोनिर्ऋतिः आ समन्तात् अकस्य आशा यस्मिन्निति
आकाशोनिर्ऋतिलोकः यद्वा आ समन्तात् कं जलं यस्य
स आको वरुणः आ समन्तात् आकस्य आशा यस्मिन्नि-
ति आकाशोवरुणलोकः यद्वा आ समन्तात् कस्य वायोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आशा यस्मिन्निति आकाशोवायुलोकः यद्वा कं जलं तदात्मकत्वाचन्द्र उच्यते आ समन्तात् कस्य आशा यस्मिन्निति आकाशः सोमलोकः। यद्वा आ समन्तात् कं धनसुखं यस्य स आकः कुवेरः आ समन्तात् आकस्य आशा यस्मिन्निति आकाशोधनदलोकः यद्वा आ समन्तात् कं सामर्थ्यसुखं यस्य स आक ईशानः आ समन्तात् आकस्य आशा यस्मिन्निति आकाश इशानलोकः तस्मिन्। कोब्रह्मणि समीरात्मयमदक्षेषु भास्करे। मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषुकमिति कोषः। यद्वा आ ब्रह्मा काशः प्रकाशोयस्मिन्निति आकाशोब्रह्मलोकः। आकारस्तुपितामह इति कोषः। यद्वा अकारोवासुदेवः स्यादिति वचनात् आ समन्तात् अस्य विष्णोः काश प्रकाशोयस्मिन्निति आकाशोविष्णुलोकः यद्वा आ समन्तात् योगिनां कस्य सुखस्य आशा आशयोयस्मिन्निति आकाशः शिवलोकः यद्वा आ समन्तात् कं सुखं येषान्ते आका ब्रह्मविष्णुरुद्राः आ समन्तात् आकानां आशा आशयोयस्मिन्निति आकाशोगोलोकः तस्मिन् एतेषु लोकेषु तथा भूतले पाताले ये देवाः सन्ति वर्त्तन्ते तेभ्यः स्वाहा सुहुतमस्तु। अथवा आ समन्तात् काशःस्थूलसूक्ष्मदेहानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशोयस्मात्तत् आकाशं कारणशरीरं तस्मिन् । भवतीति भूः स्थूलदेहः तस्य तलमाश्रयरूपं लिङ्गशरीरं तस्मिन् । पततीति पातालं स्थूलशरीरं तस्मिन् । आलम्प्रत्ययः । एतेषु शरीरेषु ये व्यष्टिसमष्टिरूपा विश्वतैजसप्राज्ञविराट्सूत्रात्मेश्वररूपाः देवाः सन्ति तेभ्यः स्वाहा ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ आकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले । पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तुते स्वाहा ॥ ५७ ॥

टी० सर्वाणि लिङ्गानि शिवलिङ्गादीनि यस्मिन्स सर्वलिङ्गः परमात्मा अथवा लीनमर्थं गमयन्तीति लिङ्गानि वेदोपनिषत्प्रभृतिशास्त्राणि सर्वाणि लिङ्गानि यस्मत्स परमात्मा तत्संबुद्धौ हेसर्वलिङ्ग ते तुभ्यं नमोऽस्तु । त्वदनुग्रहेण आकाशादिषु यानि लिङ्गानि शिवलिङ्गादीनि वेदोपनिषत्प्रभृतिशास्त्राणि वा सन्ति तेभ्यः स्वाहा ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोमहाव्याहृतिहोमादि प्रजापतिहोमान्तमुत्त
राङ्गहोमंकुर्यात् ॥ तद्यथाओं महाव्याहृती
नाम्प्रजापतिऋषिरग्निवायु सूर्या देवतागाय
त्र्युष्णिगनुष्टुप्छन्दांस्यग्न्याधानेविनियोगः
ॐ भूः स्वाहाइदमग्नयेप्रोक्षणीपात्रेपिप्रक्षिपेत्
ओंभुवः स्वाहा इदं वायवेप्रोक्षणीपात्रेपि० ओं
स्वः स्वाहा इदं सूर्य्यायप्रोक्षणीपात्रेपि ॥
एतामहाव्याहृतयः ॥ ओं त्वन्नोऽइतिवामदेवऋ-
षिरग्निवरुणौदेवते त्रिष्टुप्छन्द आज्यहोमेवि-
नियोगः ओंत्वंनो ऽअग्नेवरुणस्यविद्वान्दे-
वस्यहेडोऽअवयासिसीष्ठाः याजिष्ठो वह्नितमः
शोशुचानो विश्वाद्वेषां० सिप्रमुमुग्ध्यस्मत
स्वाहा ओं अग्नीवरुणाभ्यास्स्वाहाइदमग्नी
वरुणाभ्यास्प्रोक्षणीपात्रेऽपि ॥ ओंसत्वन्नो
ऽग्नइतिवामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवतेआज्यहोमेविनियोगः ओं सत्वन्नोऽअग्ने वमोभवोतीनेदिष्ठोऽअस्यउषसोव्युष्टौ ॥ अव-यवक्षणोवरुणर्ठःरराणोव्वीहिमृडीकर्ठःसुहवोनऽ एधिस्वाहा ओंअग्नीवरुणाभ्यां स्वाहाइदमग्नी वरुणाभ्याम् प्रोक्षणीपात्रेपि॥ओं अयाश्चाग्नइ-तिवामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्व्व-प्रायश्चित्तहोमेविनियोगः ओंअयाश्चाग्नेऽनस्य-भिशस्तिपाश्चसत्वमित्त्वमयाऽआसि ॥ अयानो यज्ञंव्वहास्ययानोधेहिभेषजर्ठः स्वाहाइदमग्न येप्रोक्षणीपात्रेपि ॥ ओंयेतेशतमितिवामदेव-ऋषीस्त्रिष्टुप्छन्दोवरुणः सविताविष्णुर्विश्वेदे-वामरुतः स्वर्कादेवता प्रायश्चित्तहोमेविनियो-गः ओं येतेशतंव्वरुणये सहस्रं यज्ञियाः पा-शाविततामहान्तः ॥ तेभिर्न्नोऽअद्यसवितो ता विष्णुर्व्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा ओं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरुणायसवित्रेविष्णवे विश्वेभ्योदेवेभ्योमरुद्भ्यः स्वर्केभ्यः प्रोक्षणीपात्रेपि ॥ ॐ उदुत्तममितिशुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणोदेवतापाशान्मोचनेविनियोगः ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय। अथावयमादित्यव्रतेतवानागसोअदितये स्याम ॐ वरुणायस्वाहा इदंवरुणाय प्रोक्षणीपात्रेपि०॥ एताः प्रायश्चित्तसंज्ञकाः ॥ ॐ प्रजापतय इति प्रजापतिः ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमेविनियोगः ॐ प्रजापतये स्वाहा इदं प्रजापतयेइतिमनसा

ॐअग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते नमम ॥

टी० सुष्टु इष्टं अभीष्टं यज्ञं वा करोतीति स्विष्टकृत् तस्मै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः संस्रवप्राशनम् ॥ ततोहोता ॐ अद्येत्यादिकृतस्यामुकशर्मणः परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिं होमयिष्ये इति संकल्पः ॥ मूर्धानं दिव इति घृतपूर्णाहुतिं जुहुयात् ॥ ॐ मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् ॥ कविᳬसम्राजमतिथिं जनानामासन्नपात्रं जनयन्त देवा स्वाहा ॥ इति पूर्णाहुतिः ॥

टी० मूर्धानमिति पूर्णाहुतिः उत्थाय कर्त्तव्या । दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन ॥ इत्यग्निपुराणवचनात् । वैश्वानरदेवत्या त्रिष्टुप् भरद्वाजदृष्टा वैश्वानरश्चात्र सर्वात्मना स्तूयते देवा इदृशमग्निं जनयन्त उत्पादितवन्तः अङ्गागमाभात्र अर्थः किंभूतमग्निम् । दिवोमूर्धानं द्युलोकस्य शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय भासकम् । तथा पृथिव्या अरतिम् रतिरुपरतिस्तद्रहितम् न हि पृथिव्या उपरि कदाचिदप्यग्निरूपरमते किन्तु दाहपाकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्त्तते एव । यद्वा पृथिवीशब्देनान्तरिक्षमुच्यते । आकाशं आपः पृथिवीत्यन्तरिक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नासु पठितत्वात् पृथिव्या अन्तरिक्षस्यारतिमलमर्ति पर्याप्तमर्ति पूरकमित्यर्थः। तत्र स्थितोऽसौ थाकालं वृष्टयाया भूतानि पुष्णाति तथा वैश्वानरं विश्वभ्यः सर्वेभ्योनरेभ्यो-हितोवैश्वानरः तम् जठराग्निरूपेणान्नपाचकत्वात्। तथाऋते यज्ञे यज्ञनिमित्तमाजातम् उत्पन्नमरणिद्वयात्। तथा कविं क्रान्तदर्शनम्। स्वभक्तान्नुग्रहीतुमभिज्ञमित्यर्थः। तथा सम्राजं सम्यग्दीप्यमानमैश्वर्येणायुक्तमित्यर्थः तथा जनानां यजमानानामतिथिं हविर्भिः सत्कारयोग्यम्। विज्ञायते हि अतिथिरूपेण गृहान्प्रविशति तस्मात्तस्योदकमाहरन्ति। आसन् आपात्रम् आस्यशब्दस्य सप्तम्येकवचने पद्दन्न इति सूत्रेणासन् आदेशः सुपां सुलुक् इति सप्तमीलोपः आसन् आसनि आस्ये मुखे आपात्रम् आसिञ्चत्वेन पीयतेऽनेने-त्यापात्रम्। विज्ञायते हि चमसोदेवपान इति चमसेन ह वा एतेन भूतेन देवा भक्षयन्ति इति श्रुतेः। ईदृशमग्निं देवा इन्द्रादयोऽजनयन्तेत्यर्थः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोगन्धपुष्पाद्यतफलवस्त्रादिभिः स्रुवं संपूजयेत् स्रुचश्चम इति मन्त्रेण । ॐस्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च मेऽआधवनीयश्च मे वेदिश्च मे वर्हिश्च मे वभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

ततःपूर्णपात्रदानम् ॥ रौप्यं ताम्रं मृण्मयं वा यत्संभवं पात्रं फलवस्त्रद्रव्यसहितं षट्पञ्चाशदधिकद्विशतमुष्टिपरिमिततण्डुलयुक्तमादाय पूर्णा दर्वीति तत्पूर्णपात्रं चापि त्रिः सपूज्य । ॐपूर्णा दर्वि परा पत सुपूर्णापुनरापत वस्नेव विक्रीणावहाऽइषमूर्जꣳशतक्रतो ॥

टी० व्याख्याता ॥

टी० पूर्णा दर्वीति दृणाति यजमानस्य पापं निदारयतीति दर्वी पूर्णपात्री दृ विदारणे वृदृभ्यामिति विन् कृदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारादिति ङीष् । पात्त्यमत्रे त्रिषु क्लीवं स्रुवादौ राजमन्त्रिणि । नीरद्रुयान्तरे योग्ये इति कोषान्तरात् । अमत्रार्थे पात्रशब्दः त्रिषु लिङ्गेषु वर्त्तते । तस्याः संबोधने हेदर्वि हेपूर्णपात्रि त्वं पूर्णा तण्डुलादिभिः पूर्णत्वात् पूर्णा भूत्वा परा पूर्णत्वादेवोत्कृष्टा सती पत इन्द्रं प्रतिगच्छ सुपूर्णा कर्मफलेन सुष्टु पूर्णा सती पुनरापत भूयोऽस्मान्प्रत्यागच्छ । एवं दर्वीमुक्त्वा इन्द्रमाह हेशतक्रतो बहुकर्मन् इन्द्र त्वं चाहं चोभौ वस्नेव वस्नशब्देन मूल्यं तृतीयायाः पूर्वसवर्णदीर्घः । मूल्येनेव इषमभीष्टं हविः स्वरुपमन्नमूर्जं हविर्दानफलरूपं रसविशेषं च विक्रीणावहै द्रव्यविनिमयरूपं विक्रयं करवावहै अहं तुभ्यं हविर्ददामि त्वं मह्यं फलं देहीत्यर्थः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अद्येहेत्यादि अस्मिन्नमुककर्माङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे तत्सन्नमम इति दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ ततः प्रणीताविमोकः ॥ सुमित्रिया न आप ओषधयः सन्तु इति मन्त्रेण। पवित्राभ्यां प्रणीतोदकेन कर्तुः शिरः संमृज्य ॐ दुर्मित्रिया स्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः इति मन्त्रेणेशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ॥

टी० सुमित्रियान इति आपः प्रणीताजलानि ओषधयश्च नोस्माकं सुमित्रियाः साधुमित्रत्वेनावस्थिताः सन्तु । यः शत्रुरस्मान्द्वेष्टि वयं च यं शत्रुं द्विष्म द्वेष कुर्मः तस्मै उभयात्मकाय शत्रवे आप ओषधयश्च दुर्मित्रियाः अमित्रत्वेनावस्थिताः सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तत्क्षणक्रमेणैव बर्हिरुत्थाप्य आज्येनाभिघार्य देवागातुविदित्यादिपठित्वा हस्तेनैव होमयेत्॥ देवागातुविद इत्यस्य मनसस्पति ऋषिर्विराट् छन्दोवातोदेवता बर्हिर्होमे विनियोगः॥ ॐ देवागातुविदोगातुं वित्वा गातुमित मनसस्पत इमं देवयज्ञꣳस्वाहा वाते धाः॥इति बर्हिर्होमः॥

टी० देवागातुविद इति बर्हिर्होमेन देवान्विसृजति । विराट्छन्दस्का वातदेवत्या मनसस्पतिदृष्टा ऋक् गै शब्दे गीयते नानाविधैर्वैदिकशब्दैः प्रतिपाद्यते इति गातुर्यज्ञः तं विदन्ति जानन्तीति गातुविदः हेगातुविदः यज्ञवेत्तारोदेवाः गातुं वित्वा विदित्वा । विद ज्ञाने अस्मदीयोयज्ञः प्रवृत इति ज्ञात्वा गातुमित यज्ञं प्रत्यागच्छत । यद्वा गातुर्गन्तव्योमार्गः तं गच्छत । अस्मदीययज्ञेन तुष्टाः सन्तः स्वमार्गं गच्छत एवं देवान्विसृज्य चन्द्रं प्रत्याह । हेमनसस्पते मनोऽधिपश्चन्द्रः यद्वा देवान्यष्टुर्मनसः प्रवर्तकः परमेश्वरः तं प्रत्युच्यते हेमनसस्पते परमेश्वर हेदेव इममनुष्ठितं यज्ञं स्वाहा त्वद्धस्ते ददामि त्वं च तं यज्ञं वाते वायुरूपे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवै धाः स्थापय । वाते हि यज्ञोऽवतिष्ठते तदुक्तं श्रुत्वा वायुरेवाग्निस्तस्माद्यद्वाध्वर्युरुत्तमं वमं करोत्यथैतमेवाप्येति-इति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोमहाबलिः ॥ माषतण्डुलाद्यन्नं कुकुंमादि-गन्धरत्नपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं क्षेत्रपालाय दद्यात्; । ॐक्षेत्रपालाय भूतप्रेतापिशाचराक्षसशाकिनी डाकिनीवेतालादि-परिवारयुताय इमं बलिं गृहाण इति पठित्वा बलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयेत् । तत आचार्यः प्रक्षालितपाणिपाद आचामेत् । ततोयजमानोऽग्नेः पश्चिमभागे प्राङ्मुख उप-विश्य उदङ्मुखेभ्य आचार्यऋत्विगादिभ्यो-दक्षिणां दद्यात् ॥ अथ गोदानम् ॥ गोपूजन-मन्त्रः ॥ ॐनमोगोभ्यः श्रीमतीभ्यः सौरभे-यीभ्य एव च ॥ नमोब्रह्मसुताभ्यश्च पवित्राभ्यो-नमोनमः ॥ ॐइरावती धेनुमती हि भूतꣳसु-यवसिनी मनवे दशस्या ॥ व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितोमयूखैः स्वाहा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टी० इरावती इति वैष्णवी त्रिष्टुप् वसिष्ठदृष्टा । हेविष्णो त्वं हि यस्मात् भूतं प्राणिजातं व्यस्कम्ना । विभज्य स्तम्भितवानसि । स्कम्नोतिः स्तम्भनार्थः । तस्मात् विष्णवे व्यापकाय ते तुभ्यं ईदृशीः गौः यजमानेन दत्ता इति शेषः । कीदृशी । इरावती अन्नवती दुग्धवती वा धेनुमती बहुधेनुयुक्ता सुयवसिनी सुष्टु यवसानि आहारत्वेन विद्यन्ते यस्या सा सुयवसिनी तथा मनवे दशस्या मनुते जानातीति मनुर्ज्ञानवान्यजमानस्तस्मै दशस्या फलदात्री दाशृ दाने दाशतीति दशस्या असुन्प्रत्यये उपधाह्रस्वः । सुविभक्तेर्यादेश्च । पुनः कीदृशी रोदसी यस्या दानात् यजमानस्य संपूर्णपापं रोदिति रोदसी रुदिर् अश्रुविमोचने असुन् गौरादित्वात् ङीष् । अव्ययमप्यस्ति । किञ्च । पृथिवीं पृथुगुणयुक्तां माम् मयूखैः स्वतेजोरूपैः सूर्यादिभिर्देवैः सह अभितोदाधर्थ दधर्थ सर्वतोधारितवानसि स्वीकृतवानसीत्यर्थः। तुजादीनां दीर्घोऽभ्यासस्येति अभ्यासदीर्घः । स्वाहा तस्मै विष्णवे सुहुतमस्तु ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मन्त्रद्वयेन गांत्रिः संपूज्य * ॐआ कृष्णेन रजसा वर्त्तमानोनिवेशयन्नमृतं मर्त्यञ्च॥ हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्यन् इति मन्त्रेण ब्राह्मणं त्रिः संपूजयेत ॥

टी० आ कृष्णेनेति सविता सुवति प्रेरयति यज्ञादि कार्येषु जगदिति सविता षु प्रेरणे तृच्। देवोभूदेवोब्राह्मणः हिरण्ययेन हिरण्मयेन सुवर्णवत्कान्तिमयेन रथेन देहेन। रथः पुमानवयवे स्यन्दने वेतसेऽपि च इति मेदिनी। रथः स्यात्स्यन्दने काये वीरणे वेतसेऽपि च इति विश्वः आयाति सत्पात्रत्वेनागच्छति। किंभूतः। कृष्णेन परब्रह्मणा। कृषिर्भूवाचकः शब्दोणश्च निर्वृतिवाचकः। तयोरैक्यं परब्रह्म कृष्णइत्यभी धीयते इति स्मृतेः परब्रह्म ज्ञानेन आसाकल्येन वर्त्तमानः। तथा रजसा रञ्जयति देवमनुष्यादीनिति रजस्तथाभूतेन मनसा आसमन्ताद्वर्त्तमानः। रञ्जरागे असुन्। व्यवहिताश्चेति आ इति वर्त्तमान इत्यनेन संवध्यते। अमृतं अमरणधर्मकं देवादिकं हविर्भागादिषु मर्त्यञ्च मरणधर्मकंमनुष्यादिकञ्च निवेशयन्

* वेदाभिज्ञस्य ब्राह्मणस्य सूर्यभासनतया सूर्यमन्त्रमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशजलेन गामभ्युद्य गोपुच्छं गृहीत्वा स्वशिरस्यभिषिञ्चेदनेन मन्त्रेण ॥ ॐमनोमे तर्पयत वाचं मे तर्पयत चक्षु र्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥

यज्ञादिकर्मसु स्थापयन् । भुवनानि चतुर्दशभुवनानि भूतजातानि वा पश्यन् शास्त्रदृष्ट्या विचारयन् ॥ एतादृशाय ब्राह्मणाय गोदानमुचितमिति भावः ॥

टी० मनोम इति हेगोपुच्छजलानियूयं मे मम वाचं प्राणं चक्षुः श्रोत्रं तर्पयत तृप्तिं कुरुत । मदीयानि मनः प्रभृतीनीन्द्रियाणि तर्पयतेत्यर्थः एवं व्यासेनोक्त्वा समासेनाह आत्मानं शरीरं प्रजां पुत्रादिसंपत्तिं पशून्गवादीन् गणान्मनुष्यसङ्घाँश्च तर्पयत मे मदीया गणा मनुष्यसङ्घा मा वितृषन् मया द्रव्यदानेन पूरिता अपि सन्तोषविगततृष्णा मा भवन्तु । अनुरक्तगणोऽहं भवेयमिति यजमान आशास्त इत्यर्थः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः कुशादिसहितं गोपुच्छमादाय॥ ॐतत्सत्
विष्णुः३ इत्यादिदेशकालौ स्मृत्वाऽमुकगो-
त्रोऽमुकशर्माऽहं मयाऽद्यकृतैतदस्मिन्कर्मणि
तदङ्गत्वेन यथालब्धोपचारैः कृतस्य पूजनह-
वनकर्मणो यथोक्तफलप्राप्तिपूर्वकामुकदेवताप्री-
तये इमां गां रुद्रदेवतां तन्मूल्योपकल्पिममुक-
द्रव्यममुकदैवत ममुकगोत्रायामुकशर्मणे ब्रा-
ह्मणाय तुभ्यमहं संप्रददे ततः प्रार्थना ।
ॐकपिले सर्ववर्णानां पूजनीयासि रोहिणी॥
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे
ततोदानप्रातिष्ठार्थं द्रव्यं कुशादिसहितमादाय॥
अद्यकृतैद्गोदानप्रातिष्ठासिद्ध्यर्थमिदं द्रव्यं अमु
गोत्रायामुकशर्मणे ब्राह्मणाय दानप्रातिष्ठात्वेन-
दातुमहमुत्सजे । ब्राह्मणः स्वस्तीत्युक्त्वा ॐ-
कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामोदाता कामः प्रतिग्रहीता कामैतत्ते इति पठेत् ॥

टी० कोदादिति । कामदैवत्यम् । दातुर्दानाभिमानाभावाय स्वस्य प्रतिग्रहदोषाभावाय च देहेन्द्रियात्मसङ्घाते कामं विविनक्ति कोनरोऽदाद्दत्तवान् कस्मै नरायादादात् । प्रश्नद्वयस्योत्तरमाह । कामोऽदात्कामायैवादात् न त्वं दाताहं प्रतिग्रहीता । त्वत्कामाभिमानी देवोमत्कामाभिमानिनेऽदात् एवं च काम एव दाता काम एव प्रतिग्रहीता नान्यः हेकाम एतद्द्रव्यं ते तव दातृप्रतिग्रहीतृत्वात् ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोभूयसीदक्षिणादानम् ॥ ॐ हिरण्यगर्भगर्भस्थं हेमवीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ इति देयं ब्राह्मणं च त्रिः संपूज्यकुशादिसहितं द्रव्यमादाय ॥ ॐ तद्विष्णुः ३ इत्यादिदेशकालाद्युच्चार्यामुकगोत्रोऽमुकशर्माहं कृतस्यामुककर्मणोन्यूनातिरिक्तपरिपूर्णार्थं यथोक्तफलप्राप्त्यर्थं च इदं द्रव्यं सुवर्णं रौप्यं ताम्रं वा अमुकदैवतं नानानामगोत्रेभ्योनानानामशर्मभ्योब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्यदातुमहमुत्सृजे ॥ अथ सिद्धान्नदानम् ॥ ॐ अद्येहामुकगोत्रोऽमुकशर्माहं कृतस्यामुकर्मणोयथावत्फलप्राप्तये नानानामगोत्रान्नानानाशर्मणोब्राह्मणान् यथोपपन्नेनान्नेन यथाकालं भोजयिष्ये ॥ आमान्नपक्षे तु सन्तोषयिष्ये ॥ अथ मेधाकरणम् ॥ होता अद्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यादिकृतस्यामुककर्माङ्गभूतहोमादिकर्मणः प-
रिपूर्णतासिद्ध्यर्थं पूर्णाहुतिं होमयिष्ये इति संक-
ल्प्य घृतपूर्णस्रुवे नारिकेलपूगीफलादिफलचन्दन
पुष्पाणि निधाय घृतधारया सह होमयेदाभिर्म-
न्त्रैः ॥ ॐसदसस्पतिमद्भुतं प्रियमिन्द्रस्य का-
म्यम् । सनिं मेधामयासिषꣳस्वाहा ॥ ॐयां
मेधां देवगणाः पितरश्चोपासते ॥ तया माम्द्य
मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ ॐमेधां मे
वरुणोददातु मेधामग्निः प्रजापतिः ॥मेधामिन्द्र-
श्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥
आकूतिमग्निं प्रयुजꣳस्वाहा वाचोविधृतिमग्निं
प्रयुजꣳस्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वा
नराय स्वाहा ॥ ॐसप्त तेऽअग्ने समिधः
सप्तजिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ॥
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णस्व घृतेन स्वाहा ॥ ॐपूर्णा दर्वि परा पत सुपूर्णा पुन रापत ॥ वस्नेव विक्रीणावहा इष-मूर्जꣳशतक्रतो ॥ ॐइदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ॥ मयि देवा दधतु श्रियमश्नु तां मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥

टी० सदस्पतिमि व्याख्याता ॥ यां मेधामिति । हेअग्ने तया मेधया अद्य मां मेधाविनं बुद्धियुक्तं कुरु स्वाहा सुहुतमस्तु । अस्मायामेधास्रजोविन्निरिति विनिप्र-त्ययः । मेधास्यास्तीति मेधावी तम् । तया कया देवगणाः देवसमूहाः पितरश्च यां मेधामुपासते पूजयन्ति । देवपितृ मान्याबुद्धिरस्माकमस्त्वित्यर्थः ॥ मेधां मे इति लिङ्गोक्तदे-वतानुष्टुप् । वरुणोमे मह्यं मेधां ददातु अग्निः प्रजापतिश्च मेमेधां ददातु । इन्द्रः वायुश्च मे मेधां ददातु स्वाहा सुहुतमस्तु ॥ आकूतिमग्निर्मा मिति यजुःपङ्क्तिः । आकूति-रस्मदीयः संकल्पः तां प्रति प्रयुङ्क्ते प्रेरयतीति प्रयुक् तं संकल्पप्रेरकमग्निमुद्दिश्य स्वाहा सुहुतमस्तु । आकूतिरेवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्निरिति सामानाधिकरण्यं वा मनः यजुस्त्रिष्टुप् । अनुष्ठेयस्मरणसाधनं मनः श्रुतयोर्मन्त्रतन्त्रयोर्धारणशक्तिर्मेधा तदुभयं प्रति प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहा । चित्तम् यजुर्जगती । अविज्ञातस्यानुष्टानस्य ज्ञानसाधनं चित्तं तेन चित्तेनावगतमनुष्टानं विज्ञातं तदुभयं प्रति प्रेरकमग्निमुद्दिश्य सुहुतमस्तु । वाचः । यजुर्जगती । वाचोमन्त्रपाठरुपायाः विधृतिं विधारणं प्रति प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहा सुहुतमिदमस्तु । प्रजापतये । यजुः पङ्क्तिः । मनवे मन्वन्तरकारिणे प्रजापतये प्रजानां पालकाय स्वाहा । विश्वेषां नराणामनुग्राहकाय विश्वानरपुत्राय वाग्नये स्वाहा सुहुतमस्तु ॥ सप्त ते इति सप्तर्षिदृष्टा आग्नेयी द्व्याधिका त्रिष्टुप् । हेअग्ने ते तव सप्त समिधः समिन्धनाः प्राणाः शीर्षण्याः सन्ति । प्राणा वै समिधः प्राणाह्येतꣳसमिन्धते इति श्रुतेः किञ्च तव सप्त जिह्वाः सन्ति ज्वालारूपाः सप्त जिह्वा हिरण्याङ्गणाद्या आगमोक्ताः यद्वा आथर्वणिकोक्ताः काली कराली च मनोजवा च सुलोहिता चापि सुधूम्रवर्णा ॥ स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वा इति मुण्डकोपनिषदि । तथा सप्त ऋषयः मरीच्याद्यास्तत्र द्रष्टारः सन्ति । तथा सप्त प्रियाणि धाम धामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नि छन्दांसि गायत्र्यादीनि तत्र सन्ति । छन्दाꣳसि वा अस्य सप्त धाम प्रियाणि इति श्रुतेः । यद्वा धामानि स्थानानि आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यप्राजाहिताग्नीध्रीयाणि सोमयागे वन्हिधारकाणि सन्ति । किञ्च हेऽग्ने सप्त होत्राः होत्रादयः ऋत्विजः सप्तधा सप्तप्रकारैरग्निष्टोमादिसप्तसंस्थाभिः त्वा त्वां यजन्ति ॥ होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रोऽच्छावाकश्चेति सप्तहोत्राः । अग्निष्टोमोऽत्यग्निष्टोमउक्थ्यः षोडश्यतिरात्र आप्तोर्यामोवाजपेयश्चेति सप्तसंस्थाः प्रकाराः । हेऽग्ने स त्वं सप्त योनीः चितीः घृतेनापृणस्व सप्तयोनीरिति चितीरेतदाह सप्तचितिकोऽग्निरिति च श्रुतेः । स्वाहा सुहुतमस्तु । यद्वा यज्ञोवै स्वाहाकारा इति श्रुतेः । स्वाहा यज्ञरूपः त्वं सप्तयोनीर्घृतेनापृणस्व पृण तृप्तौ तुदादिः ॥ पूर्णा दर्वीति व्याख्याता । इदं मे ब्रह्मेति । मन्त्रोक्ता देवतानुष्टुप् । श्रीकामोऽनया श्रियं याचते ब्रह्म ब्राह्मणजातिः इदमिमे उभे ब्रह्मक्षत्रे मे मम श्रियमश्नुताम् । देवाः मयि उत्तमां श्रियं दधतु स्थापयन्तु । तस्यै प्रसिद्धायै ते तुभ्यं श्रिये स्वाहा सुहुतमस्तु चौ समुच्चयार्थौ । श्रीमेधे विना यज्ञासिद्धेस्ते प्रार्थ्येते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोयजमानः सपरिवारोवन्धुवर्गैः सह घृताक्तवस्त्रचन्दनपुष्पफलचर्वादिभिरग्निं संपूजयेदेभिर्मन्त्रैः ॥ ॐएधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजोमयि धेहि । समाववर्त्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् । वैश्वानरं ज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥ ॐअभ्यादधामि समिधमग्ने व्रतपते त्वयि । व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वादीक्षितोऽअहम् ॥ ॐयत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ॥ तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥ ॐयत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह ॥ तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते स्वाहा ॥

टी० एधोऽसीति । यजुषी हेघृताक्तचरो त्वं एधः एधयति दीपयतीति एधः दीपकोऽसि । वयं त्वत्प्रसाद् ए-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिषीमहि धनादिभिर्वृद्धिं प्राप्नुयाम; एधतेराशीर्लिङ् हेचरो त्वं समिदसि समिन्धयति दीपयतीति समित् तेजश्चासि तत्संयोगेनाग्नेर्ज्वलनात् । अतोमयि विषये तेजोधेहि धारय समाववर्ति आग्नेयी गायत्री । वैश्वानरज्योतिरिति यजुः आग्नेयम् । पृथिवी समावदर्ति सम्यगावर्तते विकरणव्यत्ययेन वृते; शपः श्लुः ।नश्यतीत्यर्थः उषाः दिवसोऽपि समाववर्त्ति । सूर्यः समाववार्त्ति । उ एवार्थे विश्वमिदं जगत् समाववार्त्ति । अतोऽहं वैश्वानरज्योतिः भूयासम् । विश्वेभ्योनरेभ्योहितोवैश्वानरः परमात्मा तद्रूपं ज्योतिर्ब्रह्मेव भूयासम् । विभून्महतोऽपि कामान्मनोरथान् व्यश्नवै प्राप्नुयाम् भूः स्वाहा भुवनं भूः सत्तामात्रं ब्रह्म तस्मै स्वाहा सुहुतमस्तु भूरित्यव्ययम् ।। अभ्यादधामीति । अग्निदेवत्यास्त्रिस्रोऽनुष्टुभः आश्वतराश्विदृष्टाः हेअग्ने व्रतपते व्रतस्य कर्मणः पालक अहं समिन्धे चरुं त्वयि अभ्यादधाभि जुहोमि तेन चर्वाधानेन दीक्षितः सन्नहं व्रतं कर्म श्रद्धां विश्वासं चोपैमि उपगच्छामि तत्र त्वामिन्धे दीपयामि ।। यत्र ब्रह्मेति । पुण्यं पवित्रं लोकं प्रज्ञेषं जानीयाम् । लोकमप्राप्तानां तल्लोकज्ञानं न भवतीति स्वर्लोकगमनं प्रार्थ्यते । तं कम् । यत्र लोके ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रियजाति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्च सहावियोगेन चरतः तिष्ठतः इत्यर्थः कीदृशे ब्रह्मसत्रे । सम्यञ्चौ लिङ्गव्यत्ययः । समीची सम्यक् अञ्चतस्ते तत्र-चाग्निना सह देवाः सञ्चरन्ति । सदा च विप्राः क्षत्रियाश्च यंगच्छन्ति तं देवलोकं प्राप्नुयामित्यर्थः ॥ यत्रेन्द्रश्चेति । यत्र लोके इन्द्रश्च वायुश्च सम्यञ्चौ सह चरतः । यत्र च सेदिः सदनं सेदिः आदृगम इति चात्किप्रत्ययः । लिड्व-त्वादेत्वाभ्यासलोपौ अन्नाप्राप्तिजनितं दुःखं सेदिः स यत्र न विद्यते तंलोकं पुण्यं पवित्रं प्रज्ञेषं प्रजानीयाम् । जाना-तेः सिब्बहुलं लेटि इति सिपीटि च रूपम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः स्रुवेण भस्म किञ्चिद्गृहीत्वाऽवशिष्टाज्येः पिष्ट्वा तत्तिलकं प्रिष्ट्वाभिमन्त्रयेदनेन मन्त्रेण ॥ ॐअग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय वार्हतायैकादशकपालो विश्वेदेवेभ्योः सप्तदशेभ्यो वैरुपभ्योद्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय चरुः सवित्र औष्णिहाय त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरूरदित्यै विष्णुपत्न्यै चरूरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥

टी० अग्नये गायत्रायेति इमान्यपि ब्राह्मणवाक्यानि न मन्त्राः अग्नयेऽष्टाकपालः पुरोडाशः कार्यः । अष्टसु कपालेषु संस्कृतोऽष्टाकपालः । तद्धितार्थोत्तरपदसमाहारेचेति समासः । अष्टनः कपाले हविषि इत्यष्टन्शब्दस्य दीर्घः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कीदृशायाग्नये गायत्राय गायत्र्या स्तुताय त्रिवृते त्रिवृ-
त्स्तोमेन स्तुताय राथन्तराय रथन्तरसाम्ना स्तुताय
१इन्द्राय एकादशकपालः पुरोडाशः । समासः पूर्ववत् ।
कीदृशाय इन्द्राय त्रैष्टुभाय त्रिष्टुभा स्तुताय । पञ्चदशाय
पञ्चदशस्तोमस्तुताय वार्हताय बृहत्सामस्तुताय २ विश्वे-
भ्योदेवेभ्यः द्वादशकपाल: पुरोडाशः कीदृशेभ्यो: । जाग-
तेभ्यः जगत्या छन्दसा स्तुतेभ्यः सप्तदशेभ्यः सप्तदशस्तो-
मस्तुतेभ्य: वैरूपेभ्यः वैरूपसामस्तुतेभ्यः ३मित्रावरुणाभ्यां
पयस्या पयसि श्रितः चरुः कीदृशाभ्याम् आनुष्टुभ्याम्
एकविंशाभ्यामेकविंशस्तुताभ्याम् । वैराजाभ्यां वैराजसाम-
स्तुताभ्याम् ।४ बृहस्पतये चरुः । कीदृशाय पाङ्क्ताय पङ्-
क्तिछन्दसा स्तुताय त्रिणवाय त्रिणवस्तोमस्तुताय शाक्करा-
य शाक्करसामस्तुताय ५ सवित्रे द्वादशकपालः पुरोडाशः ।
कीदृशाय सवित्रे औष्णिहाय उष्णिक्छन्दसा स्तुताय
त्रयस्त्रिंशाय त्रयस्त्रिंशस्तोमस्तुताय रैवताय रैवतसामस्तु
ताय ६ एवं छन्द. स्तोमसामसहितान् षड्देवानभिधाय
चतुरः केवलानाह प्राजापत्यश्चरुः प्रजापतिदेवत्यश्चरुः कार्यः
७ विष्णुपत्न्यै अदित्यै चरुरेव । ८ वैश्वानराय वैश्वानर-
गुणविशिष्टायाग्नये द्वादशकपालः पुरोडाशः । ९ अनुमत्यै
देवतायै अष्टाकपालः पुरोडाशः कार्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोयजमानस्य तिलकं कुर्यात् । ॐत्र्यायुषं जमदग्नेरिति ललाटे ॐकश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॐयद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले ॐतन्नोऽस्तुत्र्यायुषमिति हृदि ॥

टी० त्र्यायुषमिति आर्शीर्दैवतोष्णिक् यस्याश्चत्वारः पादाः सप्ताक्षराः सोष्णिक् जमदग्नेर्मुनेर्यत्त्र्यायुषं त्रयाणां बालयौवनस्थाविराणामायुषां समाहारस्त्र्यायुषम् तथा कश्यपस्यैतन्नामकस्य प्रजापतेः सम्बन्धियत्त्र्यायुषम् तथा देवेषु इन्द्रादिषु यत्त्र्यायुषमस्ति तत्सर्वं त्र्यायुषं नोऽस्माकं यजमानानामस्तु । जमदग्न्यादीनां बाल्यादिषु यादृशं चरितं तादृशं नोभूयादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोयजमानोघृतछायां निरीक्ष्य तं ब्राह्मणाय दद्यात्तत्र क्रमः पात्रं रौप्यं कांश्यं ताम्रं वा तत्र घृतं द्रव्यं निधाय तेजोऽसीत्यादि पठन् छायां निरिक्षेत् ॥ ॐतेजोऽसीति परमेष्ठी ऋषिर्गायत्रीछन्द आज्यं देवता आज्यावेक्षणे विनियोगः ॐतेजोऽसिशुक्रममृतमायुष्पाऽ आयुर्मे पाहि ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामाददे ॥ ॐध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरासि विश्वजनस्य छाया ॥

टी० तेजोऽसीति प्राजापत्यानुष्टुप् । हेघृत तेजोऽसि अग्निप्रज्वलनात् । शुक्रं शुक्लं शुद्धं चासि अमृतं मिष्टरूपमसि । यद्वा तेजोऽसि शरीरकान्तिहेतुत्वात्तेजस्त्वम् । शुक्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीप्तिमदसि स्निग्धरूपत्वाद्दीप्तिमत्त्वम् । विनाशरहितमसि बहुदिवसात्रस्थानेऽप्योदनादिवत्पर्युषितत्वादिदोषाभावादविनाशित्वम् । आयुष्पाः आयुः पातीति आयुषोगोपायिता अतोयाचे मे ममायुः पाहि रक्ष । सवितुर्देवस्य प्रसवेऽनुज्ञायां वर्त्तमानोऽहं त्वा त्वां घृतं अश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामाददे ॥ ध्रुवासीति । हेघृतच्छाये त्वं ध्रुवासि स्थिरा भवसि । त्वमिवायं यजमानोऽस्मिन्नायतने स्वकीये गृहे ध्रुवोभूयात् प्रजया पुत्रादिकयापशुभिर्गवादिभिश्च सह स्थिरोऽस्तु । दृश्यमानेनानेन घृतेन द्यावापृथिवी द्यावापृथिव्यौ पूर्येथां पूरिते भवताम् हेघृतछाये त्वमिन्द्रस्य छदिरसिछायारूपासिभवसि । अतस्त्वं विश्वजनस्य छाया भवेति शेषः सर्वजनस्य यजमानर्त्विग्रूपस्य छायाभवेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत आज्यं पृष्ट्वा इति पठेत ॐअलक्ष्मीर्यच दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥ ॐआज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् ॥ आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥ ॐनमोऽन्तरिक्षंदिव्यं वा यन्मे किल्विषमागतम् ॥ सर्वं तदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ॥ ततोदूर्वां पृष्ट्वा इति पठेत ॐकाण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नोदूर्वे प्रतनु सहस्रेण शतेनच ॥

टी० काण्डात्काण्डादिति । व्याख्याता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐयाक्षीरसागरोत्पन्ना दूर्वा पीयूषसंभवा ॥
तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोवलम् ॥
ततः कुशतिलजलानि तदाज्यपात्रं चादाय
ॐअद्येहेत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारि
ष्टोपशमनपूर्वकसमानतेजः प्रज्ञाशौर्ययशोवला
युर्लक्ष्मीपुष्टिवर्धनार्थमिदमाज्यं मृत्युञ्जयदैवतं
रौप्यं वा कांश्यं वा पात्रं चन्द्रदैवतं ताम्रपात्रं
वा सूर्यदैवतममुकगोत्रायेत्यादि ॥ ततः कर्त्ता
स्वबन्धुवर्गैः सह स ब्राह्मणयज्ञे पुष्पाक्षताःक्षि
पन् कुर्यात् यानि कानि इति मन्त्रेण ॥ ॐ
यानि कानि च पापानि जन्मान्तरकृतानि च
तानि तानि प्रणश्यन्ति प्रदक्षीणपदे पदे ॥
ततः कर्त्ता वा आचार्योवा उत्तिष्ठ ब्रह्मणस्पते
इति ब्रह्माणं पुष्पाक्षतैः संपूज्य विसर्जयेत् ॥
ॐउत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ॥ उप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयन्तु मरुतः सुदानव इन्द्र प्राभर्शूवा सचा ॥

टी० उत्तिष्ठ इति । ब्रह्मणस्पतिर्दैवतः बृहती । हेब्रह्मणोवेदस्य पते पालक उत्तिष्ठ अस्मदनुग्रहाय त्वदीयनिवासादुत्स्थानं कुरु उतिष्ठ ऊर्ध्वकर्मत्वादात्मनेपदाभावः यतोवयं देवयन्तोदेवान्कामयमानाः त्वां स्वामीमहे फलसिद्ध्यर्थं याचामहे। मरुतः भवन्तं गच्छन्तमुपसमीपे प्रयन्तु गच्छन्तु । किंभूताः मरुतः सुदानवः शोभनं ददति ते सुदानवः । हेइन्द्र त्वमपि सचा सह गमनाय प्राशूः प्रकर्षेणशीघ्रोभव यद्वा सचा ब्रह्मणस्पतिना सह प्राशूः सोमस्य प्राशकोभव । यद्वा वृत्रस्य हिंसकोभव देवान्कामयन्ते देवयन्ति ततः शतृ प्रत्ययः । सुप आत्मनः क्यच् इति क्यच् न छन्दस्यपुत्रस्य इति निषेधात् क्यचिचेतीत्वाभावः । अश्वाघस्यात् इत्यश्वाघयोरेवाकारविधानात् अकृत्सार्वधातुकयोरिति दीर्घोऽपि न स्यात् । ईमहे याचतिकर्मसु पठितः ई गतौ दिवादित्वादागतस्य श्यनश्छान्दसोलोपः । सुदानवः दाभाभ्यां नुरिति नुः । आशुशब्दे दीर्घश्छान्दसः । अथवा शॄ हिंसायाम् प्रकर्षेण आ समन्तात् शृणाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिनस्तीति प्राशूः बहुलं छन्दसि इति उत्वम् । र्वोरुपधाया इति दीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम् । अत्रा संहितायां द्व्यचोऽतस्तिङ इति दीर्घः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ इति पठित्वा पुष्पाक्षतैः पीठदेवता विसर्जयेत् ॥ तत आचार्यादयोब्राह्मणा ऐशान्यां स्थापितशान्तिकलशजलेन मङ्गलगीतवाद्यादिपुरःसरं यजमानस्याभिषेकं कुर्युः । तत्र पुराणोक्ताः वेदोक्ताः ॥ ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथा संकर्षणोविभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ आखण्डलोऽग्निर्भगवान् यमोवै निरृतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहितः शेषोदिक्पालाः पान्तु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥ एतास्त्वामभिषि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ञ्चन्तु देवपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा
भौमोबुधोजीवसिता र्कजाः ॥ ग्रहास्त्वामभि-
षिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवग-
न्धर्वा यक्षराक्षसपन्नगाः ॥ ऋषयोमनवोगावो-
देवमातर एव च ॥ देवपत्न्योद्रुमा नागा दैत्या-
श्चाप्सरसोगणाः ॥ अस्त्राणि सर्वशस्त्राणि राजा-
नोवाहनानि च॥औषधानि च रत्नानि काल-
स्यावयवाश्च ये॥सरितः सागरा शैलास्तीर्थानि
जलदा नदाः॥एते त्वामभिषिञ्चन्तु सर्वकामा-
र्थसिद्धये ॥ इति पुराणोक्ताः॥ अथ वेदोक्ताः॥
ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे
ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैज्येन वी-
र्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय
श्रियै यशसेऽभिषिञ्चामि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टी० देवस्यत्वेति सवितुर्देवस्य प्रसवे अभ्यनुज्ञायां वर्त्तमानोऽहम् । अश्विनोः बाहुभ्यां पूष्णः हस्ताभ्याम् । हेयजमान अश्विनोः भैषज्येन वैद्यकर्मणा त्वामभिषिञ्चामि । भिषजः कर्मभैषज्यम् । किमर्थम् । तेजसे कान्त्यै ब्रह्मवर्चसाय सर्वत्रास्खलितवेदवेदाङ्गजनिता कीर्त्तिर्ब्रह्मवर्चसम् । सरस्वत्यै भैषज्येन षष्ट्यर्थे चतुर्थी । सरस्वत्याः भिषक्कर्मणा च भवन्तमभिषिञ्चामि । किमर्थम् । वीर्यायान्नाद्याय वीर्यं सामर्थ्यम् । अन्नाद्यमन्नभक्षणसामर्थ्यम् । तस्मै इन्द्रस्येन्द्रियेण इन्द्रियपाटवेन सामर्थ्येन त्वामभिषिञ्चामि । किमर्थम् । बलाय सामर्थ्याय श्रियै सर्वसमृद्ध्यै यशसे कीर्त्यै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोऽसि कतमोऽसि कस्मै त्वा काय त्वा सुश्लोक सुमङ्गल सत्यराजन् ॥
शिरोमे श्रीर्यशोमुखं त्विषिः केशाश्च श्मश्रूणि राजा मे प्राणोऽमृतꣳसम्राट् चक्षुर्विराट् श्रोत्रम् ॥

टी० कोऽसीति । हेयजमान त्वं कः प्रजापतिरसि अत्यन्तं कः कतमः श्रेष्ठः प्रजापतिरसि प्रजापतयोबहवः तत्रोत्तमोऽसि । कस्मै प्रजापतिपदप्राप्तये त्वामहमभिषिञ्चामीति शेषः । सर्वनामसंज्ञत्वं आर्षः । काय प्रजापतिभावाय चाभिषिञ्चामि । हेसुश्लोक शुद्धोभवेति शेषः । शोभनः श्लोकः कीर्तिर्यस्य स । शोभनं सङ्गलमुदयोयस्य स सुमङ्गलः त्वं श्रिया युक्तोभव । हेसत्यराजन् विनाशरहितोभव । सत्योऽविनाशी राजा प्रभुर्यस्य स ॥

टी० शिरोमइति । अभिषिक्तोयजमान इन्द्ररूप आत्मानं सर्वातरकं पश्यन्नाह । मम शिरः श्रीः शोभास्तु अर्तेजे वा मे मुखं यशोऽस्तु । केशाः श्मश्रूणि मुखलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जिह्वा मे भद्रं वाङ्महोमनोमन्युः स्वामः ॥
मोदाःप्रमोदा अङ्गुलीरङ्गानि मित्रं मे सह ॥

मानि च त्विषिर्द्युम्निरस्तु । राजा दीप्यमानो मम प्राणो- मुखमायुरमृतमस्तु । चक्षुरिन्द्रियं सम्राट् अस्तु सम्यक् राजते सम्राट् श्रोत्रमिन्द्रियं विविधं राजमानमस्तु ॥

टी० जिह्वाम इति मे जिह्वा रसनेन्द्रियं भद्रं कल्याणरूपमस्तु । वाक् वागिन्द्रियं महःमह्यते पूज्यते महः पूज्यमानास्तु महतेरसुन् प्रत्ययः । मनोमन्युः क्रोधरूपमस्तु । क्रोधफलं ददातु स्वामः क्रोधः स्वराट् स्वेनैव राजमानोऽस्तु । न तु कुतश्चित् प्रतिहन्यतामित्यर्थः । तदुक्तम् शक्तिरहितोऽपि कुप्यति मानं चोद्वहति सेवकजनोऽपि । अर्थरहितोऽपि कामी जानाति विधिं विडंबयितुमिति । अङ्गुलयोमोदाः आनन्दरूपाः सन्तु । मोदन्ते ते मोदाः पचाद्यच् । अङ्गानि प्रमोदाः प्रकृष्टहर्षाः सन्तुमे मम मित्रं सहः अस्तु । सहते अभिभवति शत्रुमिति सहः रिपुनाशकमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाहू मे बलमिन्द्रियꣳहस्तौ मे कर्म वीर्यम् ।
आत्मा क्षत्रमुरोमम ॥
पृष्ठीर्मे राष्ट्रमुदरमꣳसौग्रीवाश्च श्रोणी ॥ ऊरू
अरत्नीजानुनीविशोमेऽङ्गानि सर्वतः ॥

टी० बाहु म इति मे बाहू बलमस्तु । बलवन्तौ स्तामित्यर्थः । इन्द्रियं च बलं स्वकार्यक्षममस्तु मे हस्तौ कर्म वीर्यं चास्तु सत्कर्मकुशलौ सामर्थ्यवन्तौ वास्तामित्यर्थः । मम आत्मा अन्तरात्मा उरोहृदयं च क्षत्रं क्षतात्राणकरमस्तु ॥

टी० पृष्ठीर्म इति मे मम पृष्ठीः पृष्ठप्रदेशोराष्ट्रं देशोदेशवत्सर्वाधारमस्तु । मे मम उदरमंसौ स्कन्धौ ग्रीवाः कण्ठदेशाः श्रोणी कटिदेशौ ऊरू सक्थीनी हस्तदेशौ जानुनी च सर्वतोऽन्यान्यङ्गानि च विशः प्रजावत्पोष्याः सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ॥
आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा
प्रतिष्ठितः ॥

टी० नाभिर्म इति । मे नाभिः चित्तं ज्ञानरूपमस्तु । पायुर्मे गुदेन्द्रियं विज्ञानं ज्ञानजनितसंस्काराधारमस्तु । सुभगमस्तु । भसत् स्त्रीजननं अपचितिः पूजारूपमस्तु । सुभगमस्तु यजमानपत्नीविषयमेतत् मे आण्डौ वृषणौ आनन्दनन्दौ स्ताम् । आनन्देन संभोगजनितसुखेन नन्दतस्तौ तत्सुखभोक्तारौ भवतामित्यर्थः । पसः स्पृशतिकर्मण इति यास्कोक्तेः । पसोलिङ्गं भगः सौभाग्यंचास्तु । भग ऐश्वर्यं सौभाग्यं संपत्तिः । सर्वदा भोगासक्तमस्त्वित्यर्थः । जङ्घाभ्यां पद्भ्यां चाहं धर्मोऽस्मि । उपलक्षणमेतत् । सर्वाङ्गैः धर्मरूपो ऽस्मि धर्मारूपत्वादेव विशि प्रजायां राजा प्रतिष्ठितोऽस्मि धर्मप्रतिष्ठितोहि राजा भवति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रति प्राणेषु प्रतितिष्ठामि पुष्टे प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥

टी० प्रतिक्षत्र इति अहं क्षत्रे प्रतितिष्ठामि क्षत्रियजातौ प्रतिष्ठायुक्तोभवामि । राष्ट्रे देशे अश्वेषु गोषु करपादाद्यवयवेषु आत्मन् आत्मनि चित्ते प्राणेषु, पञ्चसु पुष्टे पुष्टौ समृद्धौ द्यावापृथिव्योः स्वर्गेहलोकयोः यज्ञे ज्योतिष्टोमादौ च प्रतितिष्ठामि क्रियापदावृत्तिः फलातिशयद्योतनार्था क्षत्रियदेशयो; प्रतिष्ठा वशीकरणम् गोऽश्वप्रतिष्ठा तत्प्राप्तिः प्राणाङ्गप्रतिष्ठा नीरोगत्वम् । आत्मप्रतिष्ठा निराधित्वम् । पुष्टप्रतिष्ठा धनसमृद्धिः । द्यावापृथिव्योः प्रतिष्ठा उभयलोककीर्तिः । यज्ञप्रतिष्ठा यज्ञकरणम् वश्यविश्वः पशुमान् निराधिव्याधिः श्रीमान् यज्ञकर्ता च भवेयमिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रया देवा एकादश त्रयस्त्रिꣳशाः सुराधसः ॥ बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥

टी० त्रया देवा इति । एकादशदेवाः देवैर्वर्त्तमानैः सह मामवन्तु । कीदृशाः । त्रयाः त्रयोऽवयवा येषान्ते संख्याया अवयवे तयप् । द्वित्रिभ्यां तयस्यायज्वा इत्ययजादेशः । एकादशत्रिगुणा इत्यर्थः । ते च कतीति स्वयमेवाह । त्रयस्त्रिंशाः तिसृभिरधिका त्रिंशत्संख्याका येषान्ते । त्रयत्रिंशत्संख्या इत्यर्थः । सुराधसः शोभनं राधोयेषान्ते राध इति धननाम राध्नुवन्त्यनेनेति यास्कोक्तेः । तथा बृहस्पतिपुरोहिताः बृहस्पतिः पुरोहितोयेषान्ते । तथा सवितुर्देवस्य सवे आज्ञायां वर्तमानाः देवाः दीप्यमानाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्कारा आहुतिभिराहुतयो मे कामान्समर्द्धयन्तु भूः स्वाहा ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

टी० प्रथमा द्वितीयैरिति। व्याख्याता ॥

टी० द्यौः शान्तिरिति। व्याख्याता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥

टी० तच्चक्षुरिति । तत् प्रसिद्धं चक्षुर्जगतां नेत्रभूत-मादित्यरूपं पुरस्तात् पूर्वस्यां दिशि उच्चरत् उच्चरति उदेति इतश्च लोपः परस्मैपदेषु इतीकारलोपः कीदृशं तत् देवहितं देवैर्हितं स्थापितं देवानां हितं प्रियम् । शुक्रं शुक्लं पाप-संस्पृष्टं शोचिष्मद्वा । तस्य प्रसादात् शतं शरदः वर्षाणि वयं पश्येम शतवर्षपर्यन्तं वयमव्याहतचक्षुरिन्द्रिया भवेम । प्रार्थनायां लिङ् । अत्यन्तसंयोगे द्वितीया । शतं शरदः जीवेम । अपराधीनजीवना भवेम शतं शरदः शृणुयाम स्पष्टश्रोत्रेन्द्रिया भवेम । शतं शरदः प्रब्रवाम अस्खलित-वागिन्द्रिया भवेम शतं शरदः अदीनाः स्याम न कस्या-प्यग्रे दैन्यं कुर्याम शतात् शरदः शतवर्षोपर्यपि भूयश्च बहु-कालं पश्येमेत्यादियोज्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वस्ति न इन्द्रोवृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नोबृहस्पतिर्दधातु ॥

विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥

यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याᳬ शूद्राय चार्याय च स्वायचारणाय च । प्रियोदेवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादोनमतु॥

टी० स्वस्ति न इति व्याख्याता ॥

टी० विश्वानि देव इति । हेसवितर्देव विश्वानि सर्वाणि दुरितानि पापानि परासुव दूरे गमय । यद्भद्रं कल्याणं तन्नोऽस्मान्प्रति आसुव आगमय ॥

टी० यथेमांवाचमिति व्याख्याता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वेदोक्ता अभिषेचनमन्त्राः ॥ अथ पुष्पा द्यभिमन्त्रणमन्त्रा वेदोक्ताः ॐआ ब्रह्मन्ब्राह्मणोब्रह्मवर्चसी जायतामा राष्ट्रे राजन्य : शूर इषव्योऽतिव्याधी महारथोजायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू-रथेष्ठाः सभेयोयुवास्य यजमानस्य वीरोजायतां निकामे निकामे नः पर्जन्योवर्षतु फलवत्योन ओषधयः पच्यन्तां योगक्षेमोनः कल्पताम् ॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैर्घृतेनत्वंतन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥

टी० आ ब्रह्मन्निति । व्याख्याता ॥

टी० पुनस्त्वेति । त्रिष्टुप् आद्यपादश्चतुर्दशार्णस्तृतीयोदशकस्तेन द्व्यधिका । हेयजमान आदित्याः रुद्राः वसवश्च त्वा त्वां पुनः समिन्धतां दीपयन्तु पुष्पादिग्रहः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥

णात् ज्ञानेन प्रकाशयन्तु । हेवसुनीथ वसु धनं तन्निमित्ता नीथा स्तुतिर्यस्य यद्वा वसूनि नयतीति वसुनीथः तत्संबुद्धौ हेधननेतः ब्रह्माणः ब्राह्मणा ऋत्विग्यजमाना यज्ञैः कृत्वा त्वां पुनःसमिन्धतां त्वं च तन्वं स्वशरीरं घृतेन उपलक्षणत्वात् अन्नादिनापि वर्धयस्व । यजमानस्य तव कामाः सत्याः सन्तु ॥

टी० दीर्घायुरिति । ओषधे हेपुष्पादे ते तव खनिता खननकर्ता साधनकर्ता दीर्घायु र्भूयादिति शेषः । यस्मै यजमानायाहं त्वां खनामि सोऽपि दीर्घायुरस्तु । अथो अपि च त्वं दीर्घायुरखण्डितजीवना भूत्वा शतवल्शा बह्वङ्कुरा सती विरोहताद्विरोह बह्वङ्कुरोत्पद्यस्व । तुह्योतातङिति तातङ् वल्शशब्दोऽङ्कुरवाची । शतं वल्शाः यस्याः सा शतवल्शा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आयुष्यं वर्चस्यꣳरायस्पोषमौद्भिदम् । इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादुमाम् ॥ न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳह्येतत् । योबिभार्ति दाक्षायणꣳस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

टी॰ आयुष्यमिति । उष्णिक् दक्षदृष्टा । इदं पुष्पादि जैत्राय सर्वत्र जयाय मामुमामेवाविशतात् आविशतु मम शिरसि तिष्ठतु । कीदृशम् । आयुष्यमायुषे हितम् । वर्चस्यं वर्चसे तेजसे हितम् । रायोधनस्य पोषंपोषयितृ वर्धकम् । औद्भिदम् उद्भिनत्तीति उद्भिद्उद्भिदेवौद्भिदमुद्भेतृ धनस्य स्वर्गस्य वा प्रकाशकम् । हिरण्यं हिरण्यप्रदम् वर्चस्वत् अन्नसंयुक्तम् ॥

टी॰ न तदिति । शक्वरी दक्षदृष्टा । रक्षांसि पिशाचाश्च तत् पुष्पादि न तरन्ति न हिंसन्ति हि यस्मात् एतत् पुष्पादि देवानां पूजनार्थं प्रथमजमोजः प्रथमोत्पन्नं देवानां तेज एवेदम् । अत एव यो हिरण्यं हितरमणीयं हिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳरूपमन्नस्य रसोयशः श्रीः श्रयताम् ॥ ततोरक्षाबन्धनम् ॥ ॐ त्वं यविष्ट दाशुषोनॄः पाहि शृणुधी गिरः । रक्षा तोकमुतात्मना ॥

एयवत्प्रीतिकरं वा पुष्पादि दाक्षायणं बिभर्ति अलंकारत्वेन धारयति । दाक्षायणशब्दोऽलंकारार्थः । स देवेषु देवलोकेषु दीर्घमायुः कृणुते कुरुते देवलोके चिरं वसतीत्यर्थः । स च मनुष्येषु मनुष्यलोकेषु स्वमायुर्दीर्घं कृणुते मनुष्यायुरतिक्रम्य जीवति ॥

टी० मनस इति । व्याख्याता ॥

टी० त्वंयविष्ठ इति । हेयविष्ठ युवतम यद्वा मिश्रयितम हेरक्षाबन्धन गिरोऽस्मदीयाः स्तुतिवाचः श्रुणुधी शृणु अशृणु इत्यादिना हेर्धि अन्येषामपि दृश्यते इति संहितायांदीर्घः गिर, श्रुत्वा दाशुषोपूजां दत्तवतोयजमानान् ऊन्मनुष्यान् पाहि रक्ष । दाशुष इति षष्ठी वा यजमानस्य ऊन्पाहीति । दाश्वान्साह्वान्मीढ्वाँश्च इति निपातः । किञ्च उतापि च त्मना आत्मना तोकं यजमानापत्यं रक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येन बद्धोवलीराजा दानवेन्द्रोमहाबलः ।। तेन त्वां प्रतिवध्नामि रक्षे मा चलमा चल ।। इति मन्त्रद्वयेन रक्षावन्धनं कुर्यात् ।। ततस्तिलकम् ।। ॐत्र्यायुषं जमदग्नेरिति ललाटे ।। ॐ कश्यपस्य त्र्यायुषमितिग्रीवायाम् ॐयद्देवेषुत्र्यायुषमितिदक्षिणबाहुमुले
ॐतन्नोऽअस्तु त्र्यायुषमिति हृदि ।।
ॐस्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिहस्तिधनधान्यसमृद्धि रस्तु । ऐश्वर्यमस्तु विजयोऽस्तुरिपुक्षयोऽस्तु संतानवृद्धिसहिता

द्वयचोऽतस्तिङ इति संहितायां दीर्घः मन्त्रेष्वाङ्यादेरात्मन इति आकारलोपः तोकमपत्यप्रसुतात्मान च रक्षेति विभक्तिव्यत्ययो वा ।।

टी० व्याख्याना ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिभक्तिरस्तु ॥ ततोयजमान इदं मण्डला
द्युपकरणमाचार्याय प्रतिपादयामिति जलेनो-
त्सर्गं कुर्यात ॥ ॐप्रमादात्कुर्वतां कर्म प्रच्य-
वेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः संपूर्णं
स्यादिति श्रुतिः ॥ ॐयस्य स्मृत्या च नामो-
क्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति
सद्योवन्दे तमच्युतम् ॥ ॐअच्युताय नमः ॥
इति श्रीमद्भगवन्तं पुराणपुरुषं लक्ष्मीनाराय-
णं प्रभुं हृदि ध्यात्वा तच्चरणारविन्दयुगले
तत्कर्मफलं समर्पयेत् । अवशिष्टकुशातिलजला
न्यादाय ॥ ॐकायेन वाचा मनसेन्द्रियैर्वा बु-
द्ध्यात्मना वानुसृतस्वभावात् ॥ करोमि यद्य-
त्सकलं परस्मै नारायणायेति समर्पयामि इति
ध्यात्वैवोत्सृजेत् ॥

टी॰ आत्मना चित्तनाहंकारेण वा अनुसृतोयः स्वभा वस्तस्मा त ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽञ्जलिं वध्वा ब्राह्मणान्प्रार्थयेत् । मया यत्कृ
तं कर्म्म अन्न्यूनातिरिक्तं भगद्वचनात्सर्व्वं परिपू-
र्णमस्तु ॥ ॐ अस्तु परिपूर्णमिति ब्राह्मणाब्रुयुः ।
ततोब्राह्मणपादं प्रक्षाल्य पादोदकं गृहीत्वा
तान्ब्राह्मणान्भोजयित्वा ब्राह्मणाशिषोगृहीत्वा
सुहृद्बन्धुवर्गादिभिः सह सोत्साहोभुञ्जीत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलीकरणमिश्रान्सर्षपानग्नौ आवपति ॐशण्डामर्का उपवीर :शौण्डिकेय उलूखलोमलिम्लुचोद्रोणासश्च्यवनो-नश्यतादितः स्वाहा ॥ ॐआलिखन्ननिमिष; किंवदन्त उपश्रुतिर्हर्यक्ष; कुम्भीशत्रु; पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनोनश्यतादितः स्वाहा ॥ प्रजापतिः अनुष्टु वजायालिङ्गोक्ता आवपने ॥ शण्डा शण्ड: मर्का; मर्क; तत्र शृणोतीति शण्डोबालग्रहः। इतः स्वस्थानात् नश्य. तात् अपगच्छतु । अयञ्च वाक्यार्थ उभयत्रापि योज्यः। मारयतीति मर्कः उपघाते वीरः समर्थः उपवीरः विघ्नकुश-लः। शौण्डिकेयः आश्रितघातकः उलूखलः अप्रतिकार्यः मलिम्लुचः अतिमलिनाशय इत्यर्थः दीर्घनासोद्रोणासः च्यावयत्यङ्गानि सर्वेन्द्रियाणि वा तच्छक्तिर्वा च्यवनः एते सर्वे मत्कृतावपनोद्धुता भीताश्चापसर्पन्त्वित्यर्थः ॥ एवमा-समन्ततोभावेन लिखन् भक्षयन् य आस्ते स आलिखन्-पराभवितुमव्यवच्छिन्नदृष्टिरनिमिषः उप समीपे श्रुत्वा अप-कर्त्ता उपश्रुतिः हर्यक्षः पिङ्गलनयनः कुम्भयति स्तम्भयत्ये वं शीलः कुम्भी शातयतीति शत्रुः कर्परहस्तः करपात्रह-स्तोवा पात्रपाणि; नॄन् मिनोति हिनस्तीति नृमणि; हन्त्री हिंसाहननं मुखे यस्यासौ हन्त्रीमुखः सर्षपवदरुण उग्रोधू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरोवा सर्षपारुण; । च्यवत्यनेनेति च्यवन; येनोपद्रुतश्च्यवति प्रकृते; परिभ्रश्यतीत्यर्थः इतः स्थानान्नश्यतादिति सर्वपदानामेवान्वयः ॥ अथ परिशिष्टविधिः ॥ अथातोहस्त्यारोहणम् ॥ एत्य हस्तिनमभिमृशति ॥ ॐहस्तियशसमसि हस्तिवर्चसमसि ॥ १ ॥ अथारोहति । ॐइन्द्रस्य त्वा वज्रेनाभितिष्ठामि स्वस्ति मा संपारय ॥ एतेनैवाश्वारोहणं व्याख्यातम् ॥२॥उष्ट्रमारोक्ष्यन्नयते॥ ॐत्वाष्ट्रोऽसि त्वष्टृदेवत्य; स्वस्ति मा संपारय ॥ ३ ॥ रासभमारोक्ष्यन्नभिमन्त्रयते॥ ॐशूद्रोऽसि शूद्रजन्माग्नेयोवै द्विरेता; स्वस्ति मा संपारय ॥ ४ ॥ चतुष्पथमभिमन्त्रयते ॥ ॐनमोरुद्राय पथिषदे स्वस्ति मा संपारय ॥ ५ ॥ नदीमुत्तरिष्यन्नभिमन्त्रयते॥ ॐनमोरुद्रायाप्सुषदे स्वस्ति मा संपारय॥६॥ नावमारोक्ष्यन्नभिमन्त्रयते ॥ ॐसुनावमारुहेयमस्रवन्तीमनागसम् ॥ शतारित्राᳪस्वस्तये ॥ ७ ॥ उत्तरिष्यन्नभिमन्त्रयते ॥ ॐसुत्रामाणं पृथिवीं द्यामनेहसᳪसुशर्माणमदितिᳪसुप्रणीतिम् । दैवीं नावᳪस्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ ८ ॥ वनमभिमन्त्रयते ॥ ॐनमोरुद्राय वनसदे स्वस्ति मा संपारय ॥ ९ ॥ गिरिमभिमन्त्रयते ॥ ॐनमोरुद्राय गिरिषदे स्वस्ति मा संपारय ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलीकरणमिश्रान्सर्षपानग्नौ आवपति ॐशण्डामर्का उपवीर :शौण्डकेय उलूखलोमलिम्लुचोद्रोणासश्च्यवनो-नश्यतादितः स्वाहा ॥ ॐआलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनोनश्यतादितः स्वाहा ॥ प्रजापतिः अनुष्टु बजायालिङ्गोक्ता आवपने ॥ शण्डा शण्ड: मर्का; मर्कः; तत्र शृणोतीति शण्डोवालग्रहः । इतः स्वस्थानात् नश्य. तात् अपगच्छतु । अयञ्च वाक्यार्थ उभयत्रापि योज्यः । मारयतीति मर्कः उपघाते वीरः समर्थः उपवीरः विघ्नकुशलः। शौण्डकेयः आश्रितघातकः उलूखलः अप्रतिकार्यः मलिम्लुचः अतिमलिनाशय इत्यर्थः दीर्घनाशोद्रोणासः च्यावयत्यङ्गानि सर्वेन्द्रियाणि वा तच्छक्तिर्वा च्यवनः एते सर्वे मत्कृतावपनोद्धुता भीताश्चापसर्पन्त्वित्यर्थः ॥ एवमासमन्ततोभावेन लिखन् भक्षयन् य आस्ते स आलिखन्-पराभवितुमव्यवच्छिन्नदृष्टिरनिमिषः उप समीपे श्रुत्वा अपकर्त्ता उपश्रुतिः हर्यक्षः पिङ्गलनयनः कुम्भयति स्तम्भयत्येवं शीलः कुम्भी शातयतीति शत्रुः कर्परहस्तः करपात्रहस्तोवा पात्रपाणिः न्नृन् मिनोति हिनस्तीति नृमणिः हन्त्री हिंसाहननं मुखे यस्यासौ हन्त्रीमुखः सर्षपवदरुण उग्रोधू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरोवा सर्षपारुणः । च्यवत्यनेनेति च्यवनः येनोपद्रुतश्च्यवति प्रकृतेः परिभ्रश्यतीत्यर्थः इतः स्थानान्नश्यतादिति सर्वपदानामेवान्वयः ॥ अथ परिशिष्टविधिः ॥ अथातोहस्त्यारोहणम् ॥ एत्य हस्तिनमभिमृशति ॥ ॐहस्तियशसमसि हस्तिवर्चसमसि ॥ १ ॥ अथारोहति । ॐइन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा संपारय ॥ एतेनैवाश्वारोहणं व्याख्यातम् ॥२॥उष्ट्रमारोक्ष्यन्नयते॥ ॐत्वाष्ट्रोऽसि त्वष्टृदेवत्यः स्वस्ति मा संपारय ॥ ३ ॥ रासभमारोक्ष्यन्नभिमन्त्रयते॥ ॐशूद्रोऽसि शूद्रजन्माग्नेयौवै द्विरेताः स्वस्ति मा संपारय ॥ ४ ॥ चतुष्पथमभिमन्त्रयते ॥ ॐनमोरुद्राय पथिषदे स्वस्ति मा संपारय ॥ ५ ॥ नदीमुत्तरिष्यन्नभिमन्त्रयते॥ ॐनमोरुद्रायाप्सुषदे स्वस्ति मा संपारय॥६॥ नावमारोक्ष्यन्नभिमन्त्रयते ॥ ॐसुनावमारुहेयमस्रवन्तीमनागसम् ॥ शतारित्राᳬंस्वस्तये ॥ ७ ॥ उत्तरिष्यन्नभिमन्त्रयते ॥ ॐसुत्रामाणं पृथिवीं द्यामनेहसᳬंसुशर्माणमदितिᳬंसुप्रणीतिम् । दैवीं नावᳬंस्वरित्रामनागसस्रवन्तीमारुहेमा स्वस्तये ॥ ८ ॥ वनमभिमन्त्रयते ॥ ॐनमोरुद्राय वनसदे स्वस्ति मा संपारय ॥ ९ ॥ गिरिमभिमन्त्रयते ॥ ॐनमोरुद्राय गिरिषदे स्वस्ति मा संपारय ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्मशानमभिमन्त्रयते ॥ ॐनमोरुद्राय पितृषदे स्वस्ति मा संपारय ॥ ११ ॥ गोष्ठमभिमन्त्रयते ॥ ॐनमोरुद्राय शकृत्पिण्डसदे स्वस्ति मा संपारय ॥ यत्र चान्यत्रापि नमोरुद्रायेत्येवं ब्रूयाद्रुद्रोह्येवेदꣳसर्वमिति श्रुतेः ॥ १२ ॥ सिचात्रधूतोऽभिमन्त्रयते ॥ ॐसिगसि न वज्रोऽसि नमस्ते अस्तु मा माहिꣳसीः ॥ १३ ॥ स्तनयित्नुमभिमन्त्रयते ॥ ॐशिवा नोवर्षाः सन्तु शिवा नः सन्तु हेतयः । शिवा नस्ताः सन्तु यास्त्वꣳसृजसि वृत्रहन् ॥१४॥शिवां वाश्यमानामभिमन्त्रयते ॥ ॐशिवोनामासि स्वधितिस्ते पिता नमस्ते अस्तु मा माहिꣳसीः । निवर्त्तयाम्यायुषे नाद्याय प्रजाननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ १५ ॥ शकुनिं वाश्यमानमभिमन्त्रयते ॥ ॐहिरण्यपर्ण शकुने देवानां प्रहितंगम । यमदूत नमस्तेऽस्तु किन्त्वा काकारिणोब्रवीत ॥ १६ ॥ लक्षण्यं वृक्षमभिमन्त्रयते ॥ ॐमा त्वाऽशनिर्मा परशुर्मा वातोमा राजप्रेषितोदण्डः । अङ्कुरास्ते प्ररोहन्तु निवाते त्वाभिवर्षतु । अग्निष्टे मूलं माहिꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्त वनस्पते ॥१७॥ स यदिकिञ्चिल्लभेत तत्प्रतिगृह्णातु ॥ द्यौस्त्वा ददातु । पृथिवी प्रतिगृह्णातु ॥ साऽस्य न ददतः क्षीयते भूयसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च प्रतिगृहीता भवति ॥ १८ ॥ अथ यद्योदनं लभेत तत्प्रतिगृह्य द्यौस्त्वेति ॥ तस्य द्विः प्राश्नाति ॥ ॐब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नातु ॥ १९ ॥ अथमन्थं लभेत तं प्रतिगृह्य द्यौस्त्वेति ॥ तस्य त्रिः प्राश्नाति ॥ ॐब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राऽश्नातु ब्रह्मा त्वा पिबतु ॥२०॥ अथातः सभाप्रवेशनम् ॥ सभामभ्येति ॥ ॐसभाङ्गिरसि नादिर्नामासि त्विषिर्नामासि तस्यै ते नमः ॥ २१ ॥ अथ प्रविशति ॥ ॐसभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ । योमा न विद्यादुपमा स तिष्टेत्सचेतनोभवतु शक्सथे जनः ॥ २२ ॥ पर्षदमेत्य जपेत् ॥ ॐअभिभूरहमागम विराडप्रतिवाश्याः। अस्याः प्रर्षद ईशानः सहसा सुदुष्टरोजनः ॥ २३ ॥ स यदिमन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते ॥ ॐया त एषा रराट्या तनूर्मन्योः क्रोधस्य नाशा नीतां देवा ब्रह्मचारिणोविनयन्तु सुमेधसः द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्यसहामौ ॥२४॥ अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते ॥ ॐतां ते वाचमास्य आद धेहृदये आदधे यत्र यत्र निहिता वाक् तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरोत्तमां यस्व ॥२५॥ अथ रथारोहणम् ॥ रथो युङ्क्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सारथिनायुक्तो रथ इत्युक्ते सति ॥ ॐसा विराट् इति मन्त्रेण रथसमीपमागत्य । चक्रे अभिमृशति ॥ ॐरथन्तरमसि । इति मन्त्रेण दक्षिणं चक्रम् ॥ ॐबृहदसि । इति मन्त्रेण उत्तरं चक्रम् ॥ ॐवामदेव्यमसि । इति मन्त्रेण ईषादण्डाग्रम् ॥ २६ ॥ हस्तेन रथमध्यम् अङ्कौ न्यङ्कौ इति मन्त्रेणाभिमृशति ॥ ॐअङ्कौ न्यङ्कावभितोरथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तौ । दूरे हेतिरिन्द्रियवान्पतत्रि तेनोऽग्नय; पप्रयः पारयन्तु ॥ २७ ॥ ॐनमोमाणिचराय इति मन्त्रेण दक्षिणधुरायां युक्तं अश्वं प्रतोदेन प्रेरयति तूष्णीं वामम् ॥ एवं गवां मध्ये रथं स्थापयति ॥ अग्रे दूरत एव देवता दृष्टा रथादवतरेत् ॥ सद्ब्राह्मणान्समीपे रथादवतरेत् ॥ गा दृष्ट्वा मध्ये रथादवतरेत ॥ पित्रादीन्मान्यान् दृष्ट्वा अभिमुखमेत्य रथादवतरेत् ॥ स्त्रीब्रह्मचारिणौ सारथी न भवेताम् ॥ मुहूर्त्तं अतीत्य ॥ २८ ॥ ॐइह रतिरिह रमध्वमेके मास्त्विहरतिरितिमन्त्रं जपेत् ॥ २९ ॥ यदि दुर्बलरथोभवेत् ॥ तं रथमास्थाय इमं मन्त्रं जपेत् ॥ ॐअयं वामश्विना रथोमा दुर्गे मा स्तरोरिषत् ॥ स रथोयदि चलने कुटिलोभवेत् ॥ तदा रथध्वजदण्डं भूमिं वा उपस्पृश्य ॥ ॐएष वामश्विना रथ इत्यादिपूर्वोक्तं मन्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपेत् ॥ ३० ॥ तस्य न काचनार्त्तिनरिष्टिर्भवति ॥ याः त्राऽश्वानं विमुच्य रथं यवसोदके दापयेत् ॥ एष उ ह वाहनस्यापह्नव इति श्रुतेः ॥ ३१ ॥ अथातोऽधीत्याधीत्या निराकरणम् ॥ ३२ ॥ ॐप्रतीकं मे वि चक्षणं जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरि शुश्रुवे मा त्वं हार्षीः श्रुतं मयि ॥ ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्म- कोशं मे विश ॥ वाचा त्वा पिदधामि वाचा त्वा पिदधा- मांति तिष्ठ प्रतिष्ठ स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधा- रणोच्चारणाशक्तिर्मयि भवतु ॥ आप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशोबलम् ॥ यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥

टी० ॐहस्तियशसमिति । ब्रह्मा यजुः हस्ती स्पर्शने हस्तिनामैरावतत्वेन प्रसिद्धं यश एव हस्तियशसं तद्रूपोऽसि । तथा तेषां वर्चो दीप्तिरेव हस्तिवर्चसं तद्रूपश्चासीति॥१॥ इन्द्रस्येति ब्रह्मा यजुः आरोहणे । इन्द्रस्य वज्रेणायुधेन सहाहमिन्द्रोभूत्वा त्वा त्वामधितिष्ठामि सर्वशत्रुजयार्थमा- रोहामि । त्वं च मा मां स्वस्ति कल्याणं यथा तथा पार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येत्यु क्तार्थम् ।। एवमेवाश्वारोहणं कर्त्तव्यम्।। तत्र मन्त्रोहः। ऊहश्च हस्तिस्थाने अश्वाभिधानम्।।एतदाद्यर्थः सुगमः।।२।। वाष्ट्रोऽसीति परमेष्ठी यजुरुष्ट्रस्तदारोहणे ।। ३ ।। रासभं चाश्वतरं मन्त्रलिङ्गात् । तदर्थः । तत्र शूद्रोऽसीति विश्वामित्रः पङ्क्तिः रासभस्तदारोहण । हेरासभ त्वं शूद्रः हीनः असि । यतः शूद्रं शोकानहं जन्म यस्य स आग्नेय अग्निदेवत्यः अश्वाद्गर्धभ्यामुद्भृतत्वात् द्विरेताः ।। ४ ।। नमोरुद्रायेति परमेष्ठी अनुष्टुप् रुद्रोरक्षणे । पथिषु सीदति तिष्ठतीति पथिषत्तस्मै ।। ५ ।। एवमुत्तरत्रापि ।। ६ ।। सुनावमिति । गयप्लातः गायत्री नौः आरोहणे । सुनावं शोभनं नावं स्वस्तयेऽविनाशाय नदीजलोत्तारणायाहमारुहेयमारोहेयम् । कीदृशीम् । अस्रवन्तीमच्छिद्राम् । अनागसं ऽरपराधां सर्वैष्टदामित्यर्थः। शतारित्रां वहुकेन्दुवालांम्।७।। सुत्रामाणमिति गयप्लातः त्रिष्टुप् अदितिः उत्तरणे । दैवीं देवसंवन्धिनीं नावं स्वस्तये कल्याणायाविनाशाय । वयमारुहेय । कीदृशीं नावम् । सुत्रामाणं सुष्ठु त्रायते रक्षति सुत्रामा ताम् । पृथिवीं विशालाम् द्यां स्वर्गरूपां । स्वर्गहेतुभूतामित्यर्थः । अनेहसं एह इति क्रोधनाम नास्ति एहोयत्र क्रोधरहिताम् । यद्वा लुप्तोपमानम् । पृथिवीमिव सुत्रामाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पालयित्रीम् द्यामित्यनेहसमक्रोधाम् । सुशर्माणं साधुशरण-
भूताम् ! अदितिमखण्डितामदीनां वा सुप्रणीतिं सुष्ठुप्र-
णयतीति सुप्रणीतिः साधुप्रणेत्री ताम् । स्वरित्रां साधुके-
न्द्रवालाम् । अरित्रशब्दः केन्द्रवालत्रा चकः । अरित्रं के-
निपातक इत्यभिधानात् । अस्रवन्तीमच्छिद्राम् । निर्दोषामि-
त्यर्थः । ईदृशीं नावमारुहेम संहितायां दीर्घः ॥ १० ॥
पेतृषदे पितृवनवासिने ॥ ११ ॥ यत्रेत्यनुक्तप्रत्यङ्गेष्वपि
नमोरुद्रायेत्येव ब्रूयात् । कुतः हि यतः इदं सर्वं रुद्रमेवेति
श्रुतेः ॥ एवं कृते निर्विघ्नताविध्यनुष्ठानफलं च स्यात् १२
सिचछब्देन वस्त्रप्रान्तैकदेशदशेति प्रसिद्धः तदुत्थोवायुरम-
ङ्गलः । तथाचापस्तम्बसूत्रम् यदावाऽपहतं सिचा वा शुना
ा अन्नमभोज्यं स्यात् इति तया सिचाऽवधूतो वीजित-
तदा तामभिमन्त्रयते । सिगसीति मन्त्रेण । तत्र त्रयाणां
प्रजापतिरनुष्टुप् लिङ्गोक्ता अभिमन्त्रणे ॥ १३ ॥ हेइन्द्र
शिवाः कल्याणकारिण्योनोऽस्माकं वर्षा वृष्टयः सन्तु ।
तथा हेतयः ऐन्द्राण्यायुधानि शिवा नोऽस्माकं सन्तु
हेवृत्रहन् याश्च हेतीस्त्व शत्रुषु सृजसि क्षिपसि ता अपि
नः शिवाः सन्तु ॥ १४ ॥ यद्यप्ययं मन्त्रः क्षुरादाने
विनियुक्तस्तथापि नानाशक्तित्वादन्यत्रापि विनियुज्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेशिवाशब्द त्कं नाम नाम्ना शिवः कल्याणकारी असि स्वधितिर्वज्रं ते तव पिता । महच्छब्दकारित्वात् यद्वा शिवा उ नामेति छेदः । उ चार्थे । हेसृङ्गाल त्वं नाम नाम्ना शिवा च असि शिवः शिवा देवतास्त्यस्याः शिवा अर्श आद्यच् । शकुनावेदकत्वात् । स्त्रियां शिवा भूरिमाय गोमायुमृगधूर्तका इत्यमरः । ते तव पिता पितृवद्रक्षकः स्वधितिः स्वं धियतीति स्वधितिरायुधं त्रिशूलमित्यर्थः । धि धारणे क्विच् । यद्वा शिवदेवतात्वात् शिवरूपेण स्तूयते हेसृङ्गाल त्वं नाम नाम्ना शिवोऽसि ते तव स्वधितिः त्रिशूलं फिता भक्तानां पितृवद्रक्षकः अत एव ते तुभ्यं नमोऽस्तु मामां मा हिंसीः हिंसां मा कुरु । हेसृगाल त्वां त्वच्छब्दं वा निवर्त्तयामि मन्त्रवलेनामङ्गलेभ्योनिवृत्तिं करोमि । किमर्थम् । आयु षेजीवनाय अन्नाद्यायान्नभक्षणाय प्रजनाय सन्तानाय रायोधनस्य पोषाय पुष्टौ सुप्रजास्त्वाय शोभनापत्यतायैसुवीर्याय शोभनसामर्थ्याय १५ शकुनिं कृष्णकाकम् । हेहिरण्यपर्ण शीघ्रग हेशकुने देवानां प्रहितं प्रेपितं स्थानं गच्छातीति देवादिष्टं शुभाशुभं गमयतीति वा भो यमस्य दूत ते तुभ्यं नमोऽस्तु । त्वा त्वां काकारिण इति द्वितीर्थे पष्ठी काकारं काकजात्यनुरूपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दं कुर्वन्तं प्रति यमः किमब्रवीत् । यद्वा काकारिणस्तत्र स्वामी यमस्त्वाकिमब्रवीत् । मा ब्रवीत्त्वित्यर्थः ॥ मात्वेति प्रजापतिरनुष्टुप् वनस्पतिस्तद्रक्षणे । हेवृक्ष त्वा त्वां अशनिर्वज्रोमाहिंसीत मा नाशयतु । एवमुत्तरात्रापि योज्यम् । परशुः कुठारः राजप्रेषितोदण्डोराजोपद्रवः अग्निश्च ते तव मूलं मा हिंसीत् । ते तवाङ्कुराश्च प्ररोहन्तु पल्लवा उद्गच्छन्तु । निवाते निर्वाते अल्पवायौ त्वा त्वां प्राप्य देवेन्द्रोऽभिवर्षतु ते तव स्वस्ति कल्याणमस्तु तथा हेवनस्पते मे ममापि स्वस्त्यस्तु ॥१७॥ द्यौस्त्वेति प्रजापतिरुष्णिक् दक्षिणास्वीकारे । हेदक्षिणे द्यौराकाशाभिमानिनीदेवता त्वा त्वां ददातु यजमानोदेवरूपोभूत्वा ददात्वित्यर्थः । पृथिवीसर्वंसहा त्वा त्वां प्रतिगृह्णातु पृथिवीरूपोमानुषोभूत्वा प्रतिगृह्णात्वित्यर्थ ः ॥ त्वत्पदावृत्तिर्दक्षिणायाः कर्मसाद्गुण्यकर्तृत्वख्यापनार्था । एवं संस्कृता दक्षिणा दातृप्रतिग्राहिणोः सिद्धिकरी भवति तत्र दातुः सिद्धिरपूर्वोत्पादकत्वेन प्रतिग्राहिणोऽपि कर्मानुष्ठानयोग्यत्वात् प्रतिग्रहधना विप्रा इत्यादिवचनात् । सा एवं संस्कृता सती अस्य ददतो न क्षीयते वर्धते इत्यर्थः । एवं प्रतिगृहीता सती प्रतिग्रहीतुर्भूयसी प्रचूरतरा भवति ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं च सर्वप्रतिग्रहे मन्त्रः । अस्यार्थः सुगमः एवं प्रति-ग्रहेण दोषाभावोऽपि भवति । दोषश्च प्रतिग्रहेण विप्राणां ब्राह्मं तेजोविनश्यति इति । योन धर्म्म निधिं वेद इत्यादि-वचनात् । यो दाता प्रतिग्राहो वा न विधिज्ञः सस्तेनः दण्डेन दण्ड्य इत्यर्थः ॥ २० ॥ सभाङ्गिरसीति अङ्गिरा गायत्री सभा तत्प्रवेशने । सह धर्मेण सद्भिर्वाभातीति सभा । तथा नादिर्नंदनशीला नाम नाम्नासि । हेआङ्गिरसि अङ्गिरोदेवते वृहस्पत्याधिष्टिते वा त्विषिर्दीप्ता नाम प्रसि-द्धम् । असि धर्मनिरुपणात् । तस्यै उक्तगुणवत्यै ते नमोऽस्तु ॥ २१ ॥ सभाचेति प्रजापतिस्त्रिष्टुप् सभा समितिश्च प्रवेशने । सभा च संसत् समितिश्च सङ्गरः ते उभे प्रजा-पतेर्ब्रह्मणोदुहितरौ पुत्र्यौ मामां अवतामिति शेषः । यत एते सचेतसौ शोभनज्ञानवत्यौ ॥ अथ सभावचनं सभा-सदः प्रति यः पुमान् न विद्यात् मद्व्यवहारं न जानीयात् सपुमान् मा मां उपतिष्ठेत उपासीत ततोऽसौ शंसथे सं-भाषणाय सचेतनः सुबुद्धिः वादकुशल इत्यर्थः । भवतु मत्प्रभावादित्याशंसा ॥ २२ ॥ अभिभूरिति । प्रजापति-रनुष्टुप् पर्षत सभोपस्थाने । अभिभूः परेषामभिभवनशी-लोऽहम् । आगम् आगतोऽस्मि । किंभूतः । अविराट्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विरुद्धतया राजते स विराट् रुद्धवीर्यः न विराट् अविराट् तथा अप्रतिवाशी प्रतिवादिशून्यः आः इत्यव्ययम् । संबुद्ध्यर्थम् । यद्वा अप्रतिवाश्याः इति पर्षदोविशेषणम् । अप्रतिक्षेपायाः अस्याः पर्षदः सभायाः ईशानः स्वामी स्वासु प्रजासु दुष्टरोऽपि स मयि सुजनः अस्त्वितिशेषः । दुष्टरश्चोग्रः ॥ २३ ॥ या त इति प्रजापतिरनुष्टुप् लिङ्गोक्ता क्रोधापनयते । हे असौ अमुकनामन् सभेश ते तव ररार्ट ललाटं तत्रभवा रराट्या या क्रोधस्य तनूः शरीरं तां देवा इन्द्राद्याः ब्रह्मचारिणश्चसनकाद्याः विनयन्तु अपनयन्तु कथंभूतस्य क्रोधस्य ? मन्योदीप्तस्य । हेमन्यो इति क्वचित्पाठः । किंभूता देवाः सुमेधसः स्वबुद्ध्या क्रोधमपाकर्तुं शक्ताः । किंभूता तनूः ? नाशनी चतुर्वर्गस्येत्यर्थात् । एषा ललाटत्रिवलिरूपा । मन्त्राभ्यासेनाप्युत्कर्षमाह । द्यौराकाशरूपोऽहमिति क्रोधावरकत्वमुक्तम् । पृथिवी च क्षातिरूपश्चाहमितिक्रोधाधारत्वेन स्वातन्त्र्यञ्चोक्तम् अतस्तौ तत्स्वरूपोभूत्वा ते तव क्रोधं नयामसि मन्त्रबलेनापयामि थम् । यथा अश्वतरी गर्भपुष्टिमसहमाना अमार्गेण मुञ्चन्ती तथेति व्याख्येयम् ॥ २४ ॥ तां त इति । प्रजापतिरनुष्टुप् ईशोवशीकरणे । हे सभेश भवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मद्द्रोहकारिणीं वाचं आस्ये मुखे वर्तमानाम् । आदत्ते उपक्रामति तामहं ते तव हृदय एवादधे स्थापयामि । किञ्च यत्र तत्र स्थाने वाक् वायुवशान्निहिता तां ततः स्थात् आददे मद्वश्यां करोमि । किञ्च यदहं ब्रवीमि तत्तत्सत्यमस्तु त्वं च मत् मत्तः अधरोनीचः द्य अद्य इदानिं स्व भव अद्येत्यत्र वर्णलोपः अधर उ इति छेदः तत्र उ दार्ढ्यार्थम् । अतिशयेन स्व भूयाः । यद्वा तां मद्द्रोहकारिणीं वाचम् । तव हृदय एव अतिशयेन द्यस्व अवखण्डय । शिष्टं समानम् ॥ २५ ॥ सा विराडिति त्रयाणां परमेष्टी यजूंषि अङ्गानि अभिमर्शने । योऽयं रथः सा विराट् अन्नदात्री देवता रथन्तरादीनि सामानि ॥ २६ ॥ अङ्काविति प्रजापतिस्त्रिष्टुप् अङ्कं तदभिमर्शने । अङ्कौ द्वौ अङ्काख्यगणपावग्निविशेषौ । एवं न्यङ्कावपि एवं भूतौ यावग्नी अभितोरथं रथस्य सर्वतोरक्षकत्वेन ध्वान्तं दुर्गमं प्राप्य वातस्याग्रं मुखम । अनु अनुसृत्य सञ्चरन्तौ सम्यग् गच्छन्तौ वर्तेते ये चापरे दूरे हेतिः बृहज्ज्वलः तथा इन्द्रियानुग्राहकः । इन्द्रियसञ्चात्रेन्द्ररथः । तथा पत्रत्रि पक्षिकुलानुग्राहकमग्निवृन्दम् । एतेऽग्नयः । नोऽस्मान्पारयन्तु निर्विघ्नतामिष्टं देशं प्रापयन्तु । किंभूताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः अस्मन्मनोरथपूरणशीलाः ॥ २७ ॥ माणिचरा- येति प्रजापतिरुष्णिक् माणिचरः प्रेरणे । माणिचरोरथा- धिष्ठातृदेवता ॥ २८ ॥ इहरतिरिति प्रजापतिर्यजुरग्निः रमणे । हेअग्नयः यूयं एके मुख्या इह रथे रमध्वम् क्रीड- ध्वम् । यतोमम इह रथे रतिरस्ति अतोमा मां प्राप्य भव- तामपि इह मद्रथे सुशोभना रतिरस्तु ॥ २६ ॥ अयं वा- मिति । द्वयोः प्रजापतिरनुष्टुप् अश्विनौ अयं वां युवयो- रथः दुर्गे विषमस्थाने स्तरः हिंसकाद्धेतोर्मा मां मा रिषत् मार्हिसिष्ट । स्तृञ् रिषौ हिंसार्थौ । एतेनोत्तरोऽपि व्याख्या- तः ॥ ३० ॥ तस्येति अर्त्तिः पीडा रिष्टिर्विघ्नः । उ नि- श्चये । एष घासोदकदानरूपोऽपह्नव: अपराधमार्जनम् ३१ अथेति । अथेदानीम् यतोद्विजानां प्रतिदिनं अध्ययनं विहितम् । अतः कारणात् । अधीत्याऽधीत्य पठित्वा प- ठित्वा अनिराकरणं अपरित्यागः कर्त्तव्यः वक्ष्यमाणनिवा- देन ॥ ३२ ॥ प्रतीकमिति । भोवेदपुरुष प्रतीकं मुखम् मे मम विचक्षणं साधुशब्दोच्चारणसमर्थमस्तु इति सूत्र शेषः मे मम जिव्हा यद्वचोवचनम् मधु मधुरं रसवत् । तद्वद- त्विति शेषः । एवमभीप्सितः सर्वत्र पूरणीयः । कर्णाभ्यां भूरि बहु बहुकालं वा शुश्रुवे शृणुयाम् मयि विषये यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतमधीतं पठितं वर्त्तते तत् त्वं माहार्षीः मापनय मयि विषये ब्रह्मणोवेदस्य प्रवचनं पाठनं व्याख्यानं वा असि भवेत्यर्थः । तथा ब्रह्मणो वेदस्य प्रतिष्ठानं प्रतिष्ठा स्थिति-रित्यर्थः । असि । मयीत्यनुवर्त्तते । ब्रह्मकोशोऽसि ब्रह्मणः शब्दरूपस्य कोशोगोपनगृहं गुप्तिस्थानं मयि असि तथा सनिः समं जीवनमसि संभजनीयं वा तथा शान्तिः अनिष्टस्य अनिष्टहेतोश्च शमनमसि निराकरणं परित्यागः न निराकरणं अनिराकरणं अविस्मरणं वा असि मे मम ब्रह्मकोशं वेदाशयं विश वा हृदयं विश । सर्वेषां वेदानाꣳ हृदयमेकायनमिति श्रुतः । वाचा गिरा सत्यवाचा वा त्वा त्वां अपिदधामि छादयामि आवृत्तिरादरार्था । स्वरा उदात्तानुदात्तस्वरिताः करणानि संवृतादीनि शब्दस्य उत्पत्तेरभिव्यक्तेर्वा साधनानि वा उरः कण्ठशिरोजिह्वामूलदन्तनासिकौष्ठतालूनीत्यष्टौ । कण्ठेभवाः कण्ठ्या अवर्ण-केवलहकारकवर्गविसर्गाः । उरसि भवा औरसाः सहकार-वर्गपञ्चमान्तस्थाः । दन्तेषुभवाः दन्त्याः लृवर्णतवर्गसकाराः । ओष्ठे भवा औष्ठ्याः उवर्णपवर्गोपध्मानीयाः । स्वराश्च करणानि च कण्ठ्याश्च औरसाश्च दन्त्याश्च औष्ठ्याश्च स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्याः एतेषां ग्रहणं उपादानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारणं स्थिरीकरणं उच्चारणं प्रयोगः । ग्रहणं च धारणं च उच्चारणं च ग्रहणधारणोच्चारणानि तेषु शक्तिः स्वरादीनां धारणादिसामर्थ्यं मप्यस्तु । मे ममाङ्गानि गात्राणि आप्यायन्तु वर्धन्ताम् । न केवलमङ्गानि किन्तु वाक् गीः प्राणवायुः सूत्रात्मेति यावत् । चक्षुर्नयनेन्द्रियम् यशः कीर्त्तिः । वल शारीरमोजः । एतान्यपि वागादीनि आप्यायन्त्वित्यनुषङ्गः यत् मे मया श्रुतं मीमांसादि अधीतं ऋगादि यद्वा श्रुतं गुरुमुखात् अधीतं अभ्यस्तं अधिगतं वा तत्सर्वं मे मनसि तिष्ठतु सुस्थिरमस्तु वीप्सात्रार्थभूयस्त्वप्रतिपादनपरा ग्रन्थसमाप्तिज्ञापनार्था वा॥२२॥

इत्यग्निस्थापनमन्त्रार्थदीपिका
टीका समाप्ता शुभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

गोरक्षदेशाचलभूनिवासी
श्रीदुर्लभो दुर्लभसिद्धकर्मा ॥
तस्यान्वयेऽभूच्छुभशास्त्रशाली
श्रीमङ्गलो मङ्गलकर्मयुक्तः ॥१॥
तस्यात्मजः पण्डितवर्यमुख्यो
नाम्नाऽच्युतानन्त इति प्रसिद्धः ॥
तस्यात्मजोविष्णुहरेश्च शिष्यः
श्रीवेदनाथोद्विजदेवभक्तः ॥२॥

धावाख्यग्रामे संजातोऽचानेग्रामं समाश्रितः ॥
वेदभाष्यविचारेण कृतभूरिपरिश्रमः ॥ ३ ॥
इत्थं लौकिकशब्दैस्तु पर्यायः क्रियते मया ॥
ईश्वरप्रीतये भूयादेषा मन्त्रार्थदीपिका ॥४॥
परैरदर्शितोमार्गोमया स्वीयमनीषया ॥
यथाकश्चिदुन्नीतः सुधियः शोधयन्तु तम् ॥५॥
नगाङ्कनन्देन्दुमिते विक्रमार्कस्य वत्सरे ॥
आश्विने शुक्लविजयातिथौ च गुरुवासरे ॥६॥
नक्षत्रे श्रवणे चैव धृतियोगे ध्वजे तथा ॥
अग्निस्थापनमन्त्रार्थदीपिका पूर्णतामगात् ॥७॥

समाप्तं शुभम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Acc. No. 3256

Class No 294.5446 Book No SHA

Author शर्मा, लामिछाने

Title अग्नि स्थापना

Due on	Borrower's Name	Returned on

294.5446
SHA

3256

महेन्द्र संस्कृत विश्वविद्यालय
बाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu